।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र


आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशायनमः॥ ॥कैलासेपूर्णराकाहिमकररुचिरेवीक्ष्यबिंबंस्वकीयंभूयोभूयोपिधाव
त्यतिभटकरटिस्पर्धयाचंडशुंडः माधावल्लंबदंघ्रिप्रहरतिभिरतोधूयतेसौधरित्रीत्संबावाग्भि
र्निरुद्धाःकपटकरटिनःकेलयोनःपुनंतु १ मुहूर्तचिंतामणिसंज्ञकस्यस्वयंकृतस्यप्रमिताक्ष
राख्यामुरामोविधत्तेविरतिंप्रणम्यविष्वक्सेनरुद्रान्पितरौगुरूंश्च २ मारिप्सितस्यग्रंथस्यनि
र्विघ्नपरिसमाप्त्यर्थंशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकःस्वाभीष्टगणेशदेवताशीर्वाद
रूपंमंगलमिंद्वज्ञयोपनिबध्नाति गौरीश्रवइति द्विपस्यगजस्यआस्यंमुखंयस्येतिद्विपा

श्रीगणेशायनमः गौरीश्रवःकेतकपत्रभंगमाकृष्यहस्तेनददन्मुखाग्रे॥विघ्नं
मुहूर्त्तांकलितद्वितीयदंतप्ररोहोहरतुद्विपास्यः १ स्योगणेशोविघ्नंहरतुनाशयतु यु
ष्माकमितिशेषः कीदृशोगणेशः गौरीश्रवः केतकपत्रभंगंहस्तेनाकृष्यमुखाग्रेददत्गौरीपावं
तीतस्याः श्रवणयोःस्थितंकेतक्याःपुष्पंकेतकंतस्यपत्रंपर्णंतस्यभंगंखंडंहस्तेनशुंडादंडेना
कृष्यहठाद्गृहीत्वास्वमुखाग्रेस्वमुखोष्ठेददातिस्थापयतीतिददत् अनेनगणेशस्यबालक्रीडा
सूचिता बालोपिमातृसमीपवर्तियत्किंचित्स्वेष्टंवस्तुबलात्कारेणगृहीत्वामुखेनिक्षिपतीति अ
तएवमुहूर्तांकलितद्वितीयदंतप्ररोहः मुहूर्तंक्षणमात्रंआकलितोनिःसृतोद्वितीयदंतप्ररोहो
द्वितीयदंतोद्गमोयेनसः अनेनकेतकपत्रस्यमुखस्थापनसमयेयावन्निगिरणंनकरोतितावद्व

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णेशोपिहिदंतएवालौकिकैरित्यभूतोपमेयम् १ अथज्योतिषग्रंथमारभमाणोविषयप्र
योजनसंबंधाधिकारिणःसूचयन्कर्तव्यंउपजातिकयाप्रतिजानीते क्रियाकलापेति अनंता
स्यज्योतिर्वित्पुत्रःसःप्रसिद्धःरामोमुहूर्तचिंतामणिंमुहूर्तानांदिनशुद्धिविशेषाणांलक्षण
यातदुपलक्षितःकालोमुहूर्तशब्देनोच्यते तस्यचिंताशुद्धाशुद्धिस्तस्यामणिरिवमुहूर्तचिंता
मणिस्तंज्योतिषग्रंथमातनोति निषेधतीनामाधारस्तथायमपिग्रंथोनिखिलमुहूर्तानामा
धारइत्यन्वर्थनामानंमुहूर्तचिंतामणिंज्योतिषग्रंथमातनोति निषेधविध्यादिसंनिवेशवि

क्रियाकलापप्रतिपत्तिहेतुंसंक्षिप्तसारार्थविलासगर्भम् अनंतदैवज्ञसुतः
सरामोमुहूर्तचिंतामणिमातनोति २ शेषेणनिरूपयतीत्यर्थः ननुजीर्णग्रंथैरे
वमुहूर्तविचारेसिद्धेकिमनेनेत्यतआह कीदृशंमुहूर्तचिंतामणिंक्रियाकलापप्रतिपत्तिहे
तुंक्रियाजातकर्मादिकास्तासांकलापःसमूहःतस्यअमुकस्मिन्शुभदिनेकार्यमेतदस्मि-
न्नशुभदिनेनकार्यमित्येवंरूपाद्युततरंप्रतिपत्तिःसम्यक्ज्ञानंतस्यहेतुंकारणम् अयम
र्थः अन्यग्रंथेषुतिथ्यादिप्रकरणेषुतिथ्यादिशब्दैरुक्तातज्ज्ञानंतत्तत्प्रकरणानांपुनःपुन
रालोडनेनसिध्येदितिगौरवम् अत्रैकस्मिन्नेवपद्येयोमुहूर्त्तोविचार्यतेतस्यतत्रैवनिर्वा
हइतिलाघवम् नन्वन्येष्वपिग्रंथेषुएवंविधमुहूर्तनिरूपणात्व्यर्थोयंश्रमइत्यतआह पुनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कीदृशंमुहूर्तचिंतामणिंसंक्षिप्तसारार्थविलासगर्भंसंक्षिप्तश्चासौसारार्थविलासगर्भश्चनि-
ष्कृष्टार्थस्तस्य विलासःप्रकाशःसगर्भोयस्यासौ अत्रशब्दलाघवेनिष्कृष्टार्थस्यनिरूपणाद्यथा
गुरुमुखविनैवार्थज्ञानंसद्योमनसिजागर्तितथानान्यग्रंथेतेषुतत्रशब्दकाठिन्याद्गुरुमुखादपि
झटित्यर्थज्ञानंनभवतीत्येतदर्थमस्यारंभइति ननुसंबंधादिचतुष्टयकथनंविनाकथंश्रोतृप्र
वृत्तिः उक्तंच सिद्धिःश्रोतृप्रवृत्तानांसंबंधकथनाद्यतः तस्मात्सर्वेषुशास्त्रेषुसंबंधःपूर्वमुच्यते
किमेवात्राभिधेयंस्यादितिपृष्टस्तुकेनचित् यावत्प्रयोजनंनोक्तंतावत्तत्केनगृह्यतेइति उच्यते मु
हूर्तचिंतामणिमित्यनेनपदेनैवसर्वंसूचितम् तथाचनारदः अस्यशास्त्रस्यसंबंधोवेदांगमिति
धीतृतइति यद्वात्राभिधेयपदार्थानांमुहूर्तानांग्रंथस्यचप्रतिपाद्यप्रतिपादकभावः संबंधः प्रयो
जनंतुशुभाशुभनिरूपणंविवाहादिकालनिर्णयश्च यदाहनारदः प्रयोजनंचजगतः शुभाशुभ
निरूपणमिति कश्यपोपि ग्रहणग्रहसंक्रांतियज्ञाध्ययनकर्मणाम् प्रयोजनंव्रतोद्वाहक्रियाणां
कालनिर्णयइति तज्जिज्ञासुरधिकारी सचद्विजएवनान्यःउक्तंचनारदेन सिद्धांतसंहिताहोरा
रूपस्कंधत्रयात्मकम् वेदस्यनिर्मलंचक्षुर्ज्योतिःशास्त्रमकल्मषम् विनैतदखिलंश्रौतस्मार्तक
र्मनसिध्यति तस्माज्जगद्धितायेदं ब्रह्मणानिर्मितंपुराअतएवद्विजैरेतदध्येतव्यंप्रयत्नतः अत्रै
वकारस्यपाठक्रमेणयोजनेप्रयोजनंविनैवज्योतिःशास्त्राध्ययनस्यावश्यकत्वंप्रतीयतेद्विजैरे
वेतिव्याख्यानेद्विजव्यतिरिक्तैः शूद्रैर्नाध्येयमितिचप्रतीयते व्याख्यानद्वयमपियुक्तमेव ननुक

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थंश्रोतस्मार्तकर्मोपयोगिज्योतिषमितिचेत् उच्यते अष्टवर्षेब्राह्मणमुपनयीत वसंतेब्राह्म
णोग्नीनादधीत दर्शपौर्णमासाभ्यांयजेतेत्यादिश्रुतयःसंति तत्रवर्षादिज्ञानंवसंताद्यृतुज्ञा
नंदर्शपूर्णमासयोर्ज्ञानंचज्योतिषंविनासर्वथा ननिर्वहतीत्यवश्यमध्येतव्यंज्योतिःशास्त्रम्
उक्तंचवेदांगज्योतिषे वेदाहियज्ञार्थमभिप्रवृत्ताःकालानुपूर्वाविहिताश्चयज्ञाः तस्मादिदंकाल
विधानशास्त्रंयोज्योतिषंवेदसवेदयज्ञान् यथाशिखामयूराणांनागानांमणयोयथा तद्वेदां
गशास्त्राणांज्योतिषंमूर्धनिस्थितम् तस्मात्कर्मोपयोगिकतयावश्यमध्येतव्यंज्योतिःशास्त्र
म् तच्चसूपरीक्षितशिष्यायदेयम् तदुक्तंश्रुतौ विद्याहवैब्राह्मणमाजगामगोपायमाशेवधि
ष्टेहमस्मि असूयकायानृजवेहितायनमांब्रूयाअवीर्यवतीयथास्याम् अन्यच्च नैतद्देयंदु
र्विनीतायजातुज्ञानंगुसंतद्धिसम्यक्फलाय अस्थानेहिस्थाप्यमानेववाचांदेवीकोपान्निर्द
हेत्तंचिराय विनयावनतायदीयमानंपभवेत्कल्पलतेवसत्फलायउपकृत्यनुचिंतकानिशा
स्त्राण्युपकारस्यपदंहिसाधुरेवेति शूद्रपाठेचमहान्दोषःगर्गः स्नेहाल्लोभाच्चमोहाच्चयोवि
प्रोज्ञानतोपिवा शूद्राणामुपदेशंतुदद्यात्सनरकंव्रजेदिति ज्योतिःशास्त्राध्ययनेफलमाहमां
डव्यः एवंविधस्यश्रुतिनेत्रशास्त्रस्वरूपभर्तुःखलुदर्शनंवै निहंत्यशेषंकलुषंजनानांपंड
ब्दजंधर्मसरस्वास्पदंस्यात् अत्रज्ञानविशेषेणज्योतिर्विदः पूजातारतम्यंजीर्णैरभ्यधायि
दशदिनकृतपापंहंतिसिद्धांतवेत्तात्रिदिनजनितदोषंतत्रवेशिष्टएव करणभगणवेत्ताहं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यहोरात्रदोषंजनयतिघनमंहस्तत्रनक्षत्रसूची नक्षत्रसूचीलक्षणवराहसंहितायाम् अ-
विदित्वैवयःशास्त्रंदैवज्ञत्वंप्रपद्यते सपंक्तिदूषकःपापोज्ञेयोनक्षत्रसूचकः तिथ्युत्पत्तिंनजा
नंतिग्रहाणांनैवसाधनम् परवाक्येनवर्त्ततेतेवैनक्षत्रसूचकाः नक्षत्रंसूचयतीतिनक्षत्र-
सूची नक्षत्रसूचकोदृष्टमुपवासंकरोतियः सव्रजत्यंधतामिस्रंसार्धमृक्षविडंबिना नक्षत्र-
जीविनंपापंभिषजंशुल्कजीविनम् तादृक्पौराणिकादींश्चवाग्मात्रेणापिनार्चयेत् ऋक्षविडं
बिनानक्षत्रसूचकेनसहांधतामिस्रेनरकंव्रजति अतश्चायथाशास्त्रमादेशकएवनक्षत्रसूच
कः नतुसंपूर्णशास्त्रपरिज्ञातादैवज्ञत्वंप्रपद्यतइत्यक्तत्वात् पूर्वकर्मार्जितसदसत्कर्मविपा-
कोदैवंतज्जानातीतिदैवज्ञः तस्यभावोदैवज्ञत्वं गुरुः दैवज्ञैः शास्त्रतत्वज्ञैर्मुहूर्तोन्विष्यतेयदि
सन्मुहूर्त्तःसमन्वेष्योनान्यैर्नक्षत्रसूचकैरिति अतएवकश्यपोवेदपारगसाहित्येनैवनक्षत्र
सूचकस्याह्नभोजनमाह अरिर्विघ्नंहंतान्वंगोनक्षत्रसूचकः काणःकुब्जश्चमंदश्चपि
त्रीमूर्खश्चकुष्टवान् सर्वेभ्याद्देनियोक्तव्यामिश्रितावेदपारगैरिति वसिष्ठःत्रिस्कंधपारंगमए
वपूज्यः श्राद्धेसदाभूसुरवृंदमध्ये नक्षत्रसूचीरवलुपापरूपोहेयःसदासर्वसुधर्मकृत्ये वराहो
पि ससांवत्सरिकेदेशेवस्तव्यंभूतिमिच्छता चक्षुर्मूर्तोहियत्रैषःपापंतत्रनविद्यते मुहूर्ततिथि-
नक्षत्रमृतवश्चायनानिच सर्वाण्येवाकुलानिस्युर्न्यात्सांवत्सरोयदि अतोगणकानांयद
पांक्तेयत्वमभ्यधायिधर्मशास्त्रेतत्रसूचकाभिप्रायेणज्ञेयम् महाप्रयोजनंतुएतच्छास्त्रस्यस

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्यक्ज्ञानाद्ब्रह्मसायुज्यमिति तथाचगर्गः ज्योतिश्चक्रेतुलोकस्यसर्वस्योत्तंशुभाशुभम् ज्यो तिर्ज्ञानंतुयोवेदसयातिपरमांगतिम् सूर्यसिद्धांते दिव्यंचक्षुर्ग्रहाणांतुदर्शितंज्ञानमुत्तमम् विज्ञायार्कादिलोकेषुस्थानंप्राप्नोतिशाश्वतम् वराहः नसांवत्सरपाठेचनरकेपरियच्यते ब्र- ह्मलोकप्रतिष्ठांचलभतेदैवचिंतकइति तस्माज्ज्योतिःशास्त्रमवश्यमध्येतव्यमितिस्थितम् तत्राप्यार्षवाक्यानांपाठमात्रेणापिफलमस्तिस्मृत्यादिपठनवदिति अथमुहूर्तप्रयोजनमाह सत्याचार्यः शुभक्षणक्रियारंभजनितापूर्वसंभवाः संपदःसर्वलोकानांज्योतिस्तत्रप्रयोजनमि ति तेनशुभमुहूर्तारब्धंकार्यसिध्येदशुभमुहूर्तारब्धंतुनसिध्येदितितन्नयुज्यते॥ येनतुयत्प्रा प्तव्यंतस्यविपाकेसूरेशसचिवोपि यःसाक्षात्रिपतिज्ञःसोपिनशक्तोन्यथाकर्तुमितिशौनको क्तेः प्राचीनसदसत्कर्मरूपदैवस्यावश्यंभाविलादितिचेत् नविवाहाविवाहादिषुविहितकाल स्य पुरुषप्रयत्नसाध्यत्वादुभययोगेसत्येवकार्यसिद्धिर्नकेवलदैवेनेति तदुक्तंकेशवार्किणा फलेद्यदिप्राक्तनमेवतत्किंकृष्याद्युपायेषुपरः प्रयत्नःश्रुतिःस्मृतिश्चापिनृणांनिषेधविध्यात्म केकर्मणिकिंनिषण्णेति यदितुदैवमेवफलेत्तदासर्वोजनः कृष्याद्युपायेषुकथंप्रवर्तेतेति किं च श्रुतिस्मृत्यादयोपिनिषेधविध्यात्मकानिरर्थकाःस्युःनवृक्षमारोहेन्नवाहुभ्यांनदींतरेन्न संशयमध्यापद्येतेत्यादीनामाश्वलायनादिवचनानांचिकित्साशास्त्रस्यइववैय्यर्थ्यप्रसंगःस्या दित्यर्थः याज्ञवल्क्योपि दैवेपुरुषकारेपिकर्मसिद्धिर्व्यवस्थिता तत्रदैवमभिव्यक्तंपौरुषंपो ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्वदैहिकमिति कर्मसिद्धिःफलावाप्तिरिष्टानिष्टाचलक्षणा साचकेवलदैवेनव्यवस्थिता अ
पितुपुरुषकारेपि पुरुषकाराभावेदैवमेवनास्तीत्याह तत्रदैवमिति पूर्वदे
हार्जितंपौरुषमेवदैवमित्युच्यते तच्चाल्पपुरुषप्रयत्नानंतरंमहाफलोदयेनअभिव्यक्तंभवति
अतएववसंतराजः पूर्वजन्मजनितंपुराविदःकर्मदैवमितिसंप्रचक्षते उद्यमेनसमुपार्जितंतदा
वांछितंफलतिनैवकेवलमिति दैवप्रयत्नयोरन्यतरेणसिद्धिर्नभवतीत्यत्रदृष्टांतमाहयाज्ञव
ल्क्यः यथाह्येकेनचक्रेणरथस्यनगतिर्भवेत् तद्वत्पुरुषकारेणविनादैवंनसिध्यति केशवार्को
पि माक्कर्मबीजंसलिलानलोर्वीसंस्कारवत्कर्मविधीयमानम् शोषायपोषायचयस्यतस्यत-
स्मात्सदाचारवतांनहानिरिति यत्पाक्कर्मजन्मांतरोपार्जितंकर्मदैवरूपंतस्यविधीयमानंअ
धुनाक्रियमाणंकर्मशोषायचभवति किंवटबीजंसलिलानलोर्वी संस्कारवत् यथासद्बीजंशु
भसलिलादिसंस्कारैःसंस्कृतंसदुदेतिवर्धतेच तद्वत्पाक्कर्मापिऐहिकेनसत्प्रयत्नेनवर्धतेअन्य
थाक्षीयतइत्यर्थः तस्मात्ज्योतिःशास्त्रविहितकालेविवाहादिकुर्वतांशांतिचिकित्सादिस
दाचारवतांपुरुषाणांसदानहानिःस्यात् अन्यच्च दैवंहिपुरुषनिष्ठंतद्देशकालवशातएव
विपच्यते दुष्टमपिदृष्टांतरमाहित्येनैतत्दुष्टकारिभवति यथादुर्जनोरंध्रान्वेषणेन अतए
ववसंतराजः सर्पवन्हिविषकंटकादिकंयेनदैवशरणोपिमानवः दूरतस्त्यजतिपौरुषंतदा
तेननःस्फुरतिदैवतोधिकम् पौरुषेणहृदयेप्सितांगतिंप्राप्नुवंतिपुरुषाःसुमेधसः यांतिदैव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शरणालयमयशःपादप्रज्वलितदावपावकेइति शकुननिमित्तादिभिःसूचितमशुभंदैवफल
शुभेनप्रयत्नेनवंच्यतएव तथाचवसंतराजः तन्निरूप्यशकुनेनदुःखदंवंचयंतिनियतंसमु
द्यतम् पौरुषेणपुरुषाःस्वमेधसःसंश्रयंतिपुनरात्मनोहितमिति तदेवफलंदुःखंसमुद्यतंशा
कुनेननिरूप्यज्ञातारःपुरुषाःपौरुषेणवंचयंतीत्यर्थः यथायेनग्रहेणयावतीदशांतर्दशावादत्ता
तस्याः फलपरिपाकः तावंतंकालमशिव्याप्यभवेदेवेतिस्थितेदशाप्रवेशकालीनचंद्राद्यच्छु
भाशुभफलनिरूपणंयथातस्यदशाफलस्यान्यथात्वमल्पत्वमाधिक्यंवारुध्यतितद्वदेतद-
पिबोद्धव्यम् ननुनंतरोक्तसर्पविषवैद्यादिदृष्टांतेनपौरुषमेवफलसाधनंकथंनस्यात् तथा
चबृहद्यात्रायांवराहः तथापरमुपेक्ष्यैवदैवंधैर्यावलंबिनः प्रत्यक्षतःक्रियासिद्धौकेवलंज
गुरुद्यमम् उत्थानहीनोराजाहिबुद्धिमानपिसर्वदा प्रधर्षणीयःशत्रूणांभुजंगइवनिर्विषः वि
धानगणना जडःपुरुषकारमुक्तादरोमनोरथपरिश्रमैर्नपरिचुंबतिश्रीमुखम् पराक्रमविनि
श्चितैकसूनयोहिसद्यःकृतंहरिर्मदस्रवासितंपिबतिकुंजरासृक्कमधुइत्यादि उच्यते समानभू
मिषुसमानसलिलादिप्रयत्नेपिफलवैचित्र्यदर्शनात्कारणांतरंकल्प्यतेतदेवदैवमिति अतउ
भयोर्योगेसत्येवफलसिद्धिरिति एतदर्पितमेव ऋषिदृष्टिसमायोगाद्दृश्यतेफलसिद्धयः अ
स्मिन्नर्थेशृणुश्लोकान्द्वैपायनमुखोद्गतान् ऋषिःपौरुषंवृष्टिर्दैवंकर्षकःपौरुषेणऋषिंकरो
तिताम् दैववृष्ट्यासाधयति अथऋषिंकरोतिचेत्तदावृष्ट्याविनानकिंचित्फलमाप्नोति यदिपु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नःकर्षकोबीजंवपतिदैवंचवर्षतिनदाफलमधिकृत्यगाने एवंदैवपुरुषकारयोःसमगोर्गर्ग
लसिद्ध्योदृश्यंते अत्रार्थेश्रीव्यासमुखोद्गताइमेश्लोकाः नविनामानुषंदैवाद्दैवंवामानुषाद्विना नैकोनिवर्तयत्यर्थमेकारणिरिवानलमिति केचिद्बुद्धिः कर्मानुसारिणीतिमन्यमानाः प्रयत्नोपिदैवरूपइतिकृत्वादैवमेवफलसिद्धेःकारणमितिवदंतितन्न अनवस्थादोषप्रसंगात् तथाहि प्राक्कर्मार्जितपौरुषमेवकिलदैवशब्देनोच्यते अत्रयः प्रयत्नः प्राचीनपौरुषलक्षणेन दैवेनजन्यते तदपितत्प्राचीनपौरुषजन्यमित्यनवस्थाऽतःप्रयत्नोपिदैवप्रेरितइत्यनुपपन्नम् ननुबीजांकुरन्यायेनानवस्थादोषोनभविष्यतीतिचेत्ननहिबीजांकुरन्यायेनदैवमेवमूलमितिनिश्चीयतेनापिप्रयत्नः अतःसत्कप्रयत्नयोगेफलसिद्धिरितितत्त्वम् एवंचेत्तर्हिपूर्वोक्तानांशौनकादिवाक्यानाम् येनतुयत्नासाध्यंतस्यविपाकंस्मरेशसचिवोपि यःसाक्षात्क्रियतिज्ञः सोपिनशक्तोऽन्यथाकर्त्तुमित्यादिकानांकागतिः उच्यते दैवंतुद्दढकर्मजमद्दढकर्मजंचेतिद्विविधंतत्रद्दढकर्मजस्यावश्यंभावित्वाद्ब्रह्मशांत्यादिरूपापूर्वप्रयत्नादपितन्निवारयितुंनशक्यतेद्दढमूलत्वात् प्रबलवातायातेपिद्दढमूलपादपवत् अद्दढकर्मजंतुदैवंप्रयत्नेननिर्वर्त्यमतिशिथिलमूलपादपवत् तथाचजातकेऽपिधर्मकर्मनिरताविजितेंद्रियायेयेपथ्यभोजनजपोद्विजदेवभक्ताःलोकेनरादधतियेकुलशीललीलांतेषामिदंकथितमायुरुदारधीभिरिति प्रयत्नाभावेतुविपच्यंते तथाचतत्रैव पापिष्ठायेदुराचारादेवब्राह्मणनिंदकाः अपथ्यभोजिनस्तेषामका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लमरणंश्रेयमिति वैद्यकेपि पूर्वजन्मकृतंपापंव्याधिरूपेणबाधतेइतिसर्वव्याधीनांसाधारण्ये नकर्मजत्वेपिसाध्यासाध्यत्वेनद्वैविध्यम् तत्रापि कृच्छ्रोपायःसुखोपायोद्विविधःसाध्यउच्यते असाध्येद्विविधोज्ञेयोसाध्योयश्चाप्रतिक्रियः साध्यायाशुलभायांतियाप्याश्चासाध्यतांतथा यांति प्राणानसाध्यास्तुनराणांक्रियावतामित्यादिनाचिकित्सव्याधेर्दृढमूलत्वमन्येषामदृढकर्ममूलत्वंनिश्चीयते अतोदैवस्येदृशंद्वैविध्यमस्ति अतःशौनकवाक्यानामयमर्थः येनखिति येनपुरुषेणयत्प्राप्तव्यंअवश्यंभोक्तव्यंदृढकर्मोपार्जितमितियावत् तदन्यथाकर्तुबृहस्पतिरपिनशक्तः अर्थादन्यद्दृढकर्मोपार्जितमन्यथाकर्तुशक्तइत्यर्थः अतोनिमित्तशकुनादिभिर्दुष्टफलेज्ञातेबो

तिथीशावन्हिकौगौरीगणेशोहिर्गुहोरविः शिवोदुर्गातकोविश्वेहरिःकामःशिवः शशी ३ धायनादिविहितेनतच्छांतिदानादिरूपधर्मेणप्रयत्नेनतन्निवर्त्यतेशक्यंवर्धते अत एवतेनेवोक्तं सुपरीक्षितंविलग्नंधर्मार्थसुखायदंपत्योः अपरीक्षितंविलग्नंनहिदेयंपंडितेनदैवविदा अयशोंबुनिधौमज्जतिशास्त्रमविज्ञाययोद्यादिति बृहस्पतिरपीद्रंप्रत्याह स्वभावादेवकालोयं शक्याशक्यसमन्वितःअनादिनिधनःसर्वोनिर्दोषोनिर्गुणःतस्मान्निर्दोषकालार्थेमुहूर्तमधिगच्छता म् कालःशक्योगुणैर्युक्तोबलवद्भिःशक्यप्रदःदोषैर्युक्तोपिचाशक्यैर्बहुभिर्व्यत्ययंह्ययोरिति अतःशक्या मुहूर्तबलेनपूर्वकर्मार्जितमशक्यमपिदैवफलंनिवार्यतेइत्यवद्यम् २ अथतिथीशाननुष्टुभाह तिथी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शारदि गनेनिशीषाःनिशीनांनाशिनः नन्दिश्रुक्रश्वशोब्रह्मा शेषंशुष्यम् प्रयोजनंनुनन्दनेनगा
पूजाप्रतिष्ठादि अथमुहूर्तविचारस्यप्रतिज्ञातत्वात्संवत्सरादिकथनंनोक्तंततएवावधार्यम् ३ अ
थतिथीनांसंज्ञासफलाह नंदेति प्रतिपदादिपंचतिथयोनंदाभद्राजयारिक्तापूर्णासंज्ञाःस्वस्वनाम
सदृशफलदाःस्युःइति एवंप्रकारेणसर्वाःषष्ठ्यादयोज्ञेयाः नाःशुक्लपक्षेअशुभमध्यमशुभफल
दाःस्युः असितेकृष्णपक्षेशुभमध्यअधम फलदाःस्युःताएवनंदादितिथयःशुक्रबुधमंगलशनि
गुरुवारेषुसिद्धिकराःस्युःयथानंदाशुक्रवारे एवंभद्राबुधवारेजयाभौमेरिक्ताशनौपूर्णागुरौइ

नंदाचभद्राचजयाचरिक्तापूर्णेतितिथ्योःशुभमध्यशस्ताः सितेःसितेशस्त
समाधमाःस्युःसितज्ञभौमार्किगुरौचसिद्धाः ४ नंदाभद्रानंदिकाख्याजया
चरिक्ताभद्रापूर्णासंज्ञाःधमार्कात् नि ४ अथसूर्यादिवारेषुयथासंख्यंनिषिद्धतिथी
र्दग्धनक्षत्राणिचशालिन्याहनंदेति अर्कादितित्यपुलोपेपंचमी अर्कमारभ्यनंदादिकातिथिरध
मास्यात् यथासूर्यवारेनंदाधमा एवंसोमेभद्रा भौमेनंदा बुधेजया गुरौरिक्ता शुक्रेभद्रा शनौ
पूर्णेति इदमाधुनिकानाम् प्राच्यानांमतंवस्तुतस्तुतेशुभाः अमृतयोगाः तथाचवसिष्ठः नंदाभौ
मार्कयोर्भद्राशुक्रेहोभ्यजयाबुधे शुभयोगागुरौरिक्तापूर्णामंदेःमृताङ्गया गुरुरपि आदित्य
भौमयोर्नंदाभद्राशुक्रशशांकयोः जयाज्ञस्यगुरौरिक्तापूर्णार्कीश्चामृताशुभाइति नारदवाक्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शनौपूर्णाचमृत्यवेतिकल्पितपाठः वसिष्ठादिवचनविसंवादात् बहुषुपुस्तकेषुशनौपूर्णाःमृता ॥ श्रु. ग्र.
श्रुभेतिपाठाच्चपूर्णसंज्ञाःमृतार्कादितिपाठः साधुः तथारविवारादिषुयाम्यंभरणीतदादीनिनक्ष
त्राणियथाक्रमेणदग्धनक्षत्राणिस्युःयथारविवारेभरणीदग्धा सोमेचित्रा भौमेउत्तराषादाबुधे
धनिष्ठा गुरावुत्तराफाल्गुनी शुक्रेज्येष्ठा शनौरेवती नारदः आदित्यभौमयोर्नंदाभद्राश्रुक्रशशां
कयोः जयासौम्येगुरौरिक्ताशनौपूर्णाःमृताशुभाइतिनारदः यमर्क्षमर्कवारेस्यैचित्राभौमेनु
विश्वभम् बुधेश्रविष्ठार्यम्णर्क्षंगुरौज्येष्ठाभृगोर्दिने रेवतीशनिवारेतुदग्धयोगाभवंत्यमी एता

याम्यंत्वाष्ट्रंवैश्वदेवंधनिष्ठार्यम्णंज्येष्ठांत्यंरवेर्दग्धभंस्यात् ५

न्येवनक्षत्राणिरव्यादीनांजन्मभानीत्युक्तानितान्यपिनिषिद्धान्येव लल्लः याम्यंत्वाष्ट्रोत्तराषादे ॥ ग्र.
धनिष्ठोत्तरफाल्गुनी ज्येष्ठाचरेवतीचैवजन्मर्क्षाभानुतःक्रमात् क्रमात्सप्तेंद्वर्कदशसूर्यैर्नवाष्टौपौ-
र्णिमास्यमा १४ १० १२ ११ ९ ८ १५ ३० सूर्यादिजन्मनिथयःसंत्याज्याः शुभकर्मणि जन्मर्क्षंज-
न्मतिथिषुशुभकर्माणिवर्जयेत् बलाच्चेत्कुरुतेकर्मनतत्फलमवाप्नुयादिति ५ अथक्रकचादिनि- ६
द्ययोगाननुष्टुभाह षष्ठ्यादीति क्रमेणषष्ठ्यादितिथयः मंदाश्चनैश्चरादिलोमंविपरीतगणन
याःधमाःस्युः यथाशनौषष्ठी अधमाशुक्रेसप्तमी गुरावष्टमी बुधेनवमी भौमेदशमी सोमे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकादशी रवौ १२ द्वादशी एतेयोगाः ककचास्त्र्याज्ञेयाः तथाप्रतिपत्बुधवासरे सप्तमीरविवा
रे संवर्तयोगाअधमास्यात् अथषष्ठीआद्याप्रतिपत् अमाअमावास्यारदधावनेदंतानांकाष्ठा
दिभिर्मलनिराकरणेअधमाः निषिद्धाःस्युः क्वचिन्नवमीरविवारयोरपिनिषेधः काशीखंडेप्रति
पद्दशमीषष्ठीनवम्यांरविवासरे दंतानांकाष्ठसंयोगोदहेदासप्तमंकुलमिति ॥ अथकृत्यविशे
षेषुनिषिद्धतिथिरिंद्रवंशाछंदसाह षष्ठ्यष्टम्यौप्रसिद्धे भूतश्चतुर्दशी विधुक्षयोमावास्या एता
स्तिथिषुनापुरुषः तैलंपलंमांसम् क्षरंक्षौरम् रतंमैथुनम् नोसेवेत यथाषष्ठ्यांतैलम् अष्ट

षष्ठ्यादितिथयोमंदाद्दिलोमंप्रतिपद्युधे सप्तम्यर्केऽधमाःषष्ठ्याद्यामाश्चरद्
धावने ॥ षष्ठ्यष्टमीभूतविधुक्षयेषुनोसेवेतनातैलपलेक्षरंरतम् नाभ्यंज
नंविश्वदशादिकेतिथौधात्रीफलैःस्नानमथादिगोश्वसत् ॥

म्यांमांसम् चतुर्दश्यांक्षौरम् अमावास्यायांमैथुनंनसेवेतेत्यर्थः विधुक्षयःसर्वोपलक्षकः वसि
ष्ठः स्त्रीसेवनंपर्वसुपक्षमध्येपलंचषष्ठीषुचसर्वतैलम् नृणांविनाशायचतुर्दशीषुक्षरक्रियास्या
दसकृत्तदासु नारदः व्यतीपातेचसंक्रांतावेकादश्यांचपर्वसु अर्कभौमदिनेविष्ट्यांनाभ्यंगंनच-
वैधृताविति पर्वाणिवसिष्ठआह चतुर्दश्यष्टमीकृष्णाअमावास्याचपौर्णिमा पुण्यानिपंचपर्वा
णिसंक्रांतिर्दिनपस्यचेति अत्रतिथिस्तात्कालिकीग्राह्या उक्तंच स्नानेवाभ्यंजनेचैवदंतधाव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमैथुने तिथिस्नानादिकंगाद्यानथामरणजन्मनोरिति अथविशेषतयोदशी दशदशमी दि
केद्वितीया एतासुतिथिषुअभ्यंजनंअभ्यंगंमलापहात्वंचनसेवेत् अयंनिषेधोब्राह्मणव्यतिरि
क्तस्य तथाचभट्टभास्करोनिर्णयामृते त्रयोदश्यांद्वितीयायांसप्तम्यांचविशेषतः शूद्रविट्क्षत्रि
याःस्नानंनाचरेयुःकदाचनेति अथधात्रीफलैरामलकैः स्नानममाद्विगोषु अमावास्यासप्तमीन
वमीषुअसन्निधिरित्यर्थः अत्रवसिष्ठादिमतेत्रयोदश्यादितिथिषुआमलकस्नानस्यैवनिषे-
धोनाभ्यंगस्य वसिष्ठः कामदुर्गातकरविनष्टेंदर्कदिनेषुच सकृदामलकस्नानंसंपत्सुचविनाशन

सूर्येशपंचाग्निरसाष्टनंदावेदांगसप्ताश्विगजांकशैलाः

म् भट्टभास्करस्तुनवम्यादिष्वेवामलकस्नानंनिषेधति सप्तम्यचंद्रानवमीषुदेहश्रीसंततीराम
लकैर्नरस्य स्नानंनिहत्यंत्यदिनेतुधत्तेतिलैःश्रियंपुण्यकरंसदैवेति ७ अथसूर्यादिवारेषुदग्धा
दियोगचतुष्टयमिंद्रवज्रोपजातिकाभ्यामाह सूर्येति सूर्यादीति सूर्येशपंचाग्निरसाष्टनंदाःतिथयः
सूर्यादिवारेदग्धसंज्ञाभवंति यथा द्वादशीरविवारेदग्धा सोमेएकादशी भौमेपंचमी बुधेतृतीया
गुरौषष्ठी शुक्रेऽष्टमी शनौनवमी उक्तंचनारदेन एकादशीचेंदुवारेद्वादशीचार्कवासरे षष्ठी
बृहस्पतेर्वारेतृतीयाबुधवासरे अष्टमीशुक्रवारेचनवमीशनिवासरे पंचमीभौमवारेचदग्धयो-
गाःप्रकीर्तिताः अथविषयोगाः वेदेति चतुर्थ्यादितिथयः अर्कादिवारेषुविषाख्याभवंति यथा रवौ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुर्थीविषाख्या चंद्रेषष्ठी भौमेसप्तमी बुधेद्वितीया बुधेषष्ठ्यादयः सिद्धियोगस्तुसप्तमीह्या
दश्योश्चरितार्थः एवंनवमीशन्यादावपि गुरावष्टमी शुक्रेनवमी शनौसप्तमी तथाचगुरुः षष्ठी
शशांकेनवमीचशुक्रेबुधेद्वितीयातपनेचतुर्थी जीवेष्टमीसौरिकुजेऽसप्तमीयोगाविषाख्याकु
लनाशनाःस्युः अथहुताशनाख्याः सूर्योगेनि ह्यादश्यादितिथयः सूर्यादिवारेषुहुताशनाख्याः
स्युः वसिष्ठः सप्तषष्ठ्यादितिथयःसोमवारादिभिर्युताः अग्निजिह्वाःसप्तयोगामंगलेष्वतिगर्हि
ताः ८ अथयमघंटाः मघाविशाखादिदिनर्क्षाणिरविवारादिषुयमघंटसंज्ञानिस्युःयथा

सूर्योगसप्तोरगगोदिगीशादग्धाविषाख्याश्चहुताशनाश्च ८ सूर्यादिवारे
तिथयोभवंतिमघाविशाखाश्विनमूलवन्हिः ब्राह्म्यंकरोर्कोद्यमघंटकाश्च
शुभेविवर्ज्यागमनेत्ववश्यम् ९ अर्कवारेमघायमघंटा एवंसोमवारेविशाखाइत्या

दि गर्गः मघाविशाखाआर्द्राचमूलमृक्षंचकृत्तिका रोहिणीहस्तइत्युक्तायमघंटाःक्रमाद्रवेः एते
दग्धादियोगाः शुभेविवाहादिकार्येवर्ज्याः गमनेतुयात्रायामवश्यंवर्ज्याः एषामपवादोवसिष्ठेनो
क्तः दिवामृत्युप्रदाःपापदोषास्त्वेतेनरात्रिषु शुभकार्येप्रसूतौचसर्वदापरिवर्जयेदिति आवश्य
कृत्येदीपिकायां यमघंटेत्यजेद्दष्टौमृत्योर्ह्यादशनाडिकाइति अन्येषांपापयोगानांमध्यान्न्यूना
तःशुभमिति ९ ७ ७ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथचैत्रादिमासेशून्यतिथीः शार्दूलविक्रीडितेनार्द्धानुष्टुभार्द्धेनाह भाद्रेइति शक्राइतिच भाद्रपदादिश्लोकोक्तमासेषुचंद्रदृशौप्रतिपद्द्वितीयेइत्यादिक्रमोक्ततिथयः उभयपक्षगाः शुक्लकृष्णपक्षगताः शून्यसंज्ञकाः बुधैः कीर्तिताः कथिताः यथा भाद्रपदेप्रतिपद्द्वितीयेउभयपक्षेशून्ये एवंनभसिश्रावणेउभयपक्षेतृतीयाद्वितीयेशून्येइत्यादि अनुक्तमासानांउर्जाषादतपस्यशुक्लतपसांकार्तिकाषाढज्येष्ठफाल्गुनमाघानांकृष्णपक्षेक्रमेणशरांगाब्धयः शक्राः पंचएतास्तिथयः शून्या यथा कार्तिककृष्णेपंचमीशून्या एवमाषादकृष्णेषष्ठी फाल्गुनकृष्णेचतुर्थी ज्येष्ठकृष्णेचतुर्दशी माघकृष्णेपंचमी अथैषामेवकार्तिकादिमासानांशुक्लपक्षेशक्राब्ध्यग्निविश्वरसाः

भाद्रेचंद्रदृशौनभस्यनलनेत्रेमाधवेद्वादशीपौषेवेदशराइषेदशशिवामार्गेद्विनागामधौ गोदौचोभयपक्षगाश्चतिथयः शून्याबुधैः कीर्तिताऊर्जाषादतपस्यशुक्लतपसांकृष्णेशरांगाब्धयः १०

क्रमाच्छून्याः यथा कार्तिकशुक्लेचतुर्दशीशून्या आषादशुक्लेसप्तमी फाल्गुनशुक्लेतृतीया ज्येष्ठशुक्लेत्रयोदशी माघशुक्लेषष्ठीचेति वसिष्ठः अष्टमीनवमीचैत्रेपक्षयोरुभयोरपि माधवेद्वादशीत्याज्यापक्षयोरुभयोरपि ज्येष्ठेत्रयोदशीनिंद्याभिते कृष्णेचतुर्दशी आषादेकृष्णपक्षस्यषष्ठीशुक्लेतुसप्तमी द्वितीयाचतृतीयाचश्रावणेसिनकृष्णयोः प्रथमाचद्वितीयाचनभस्येमासिनिंदिते दशम्येकादशीनिंद्यामासीषेशुक्लकृष्णयोः ऊ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्जेचतुर्दशी शुक्लाकृष्णपक्षेतुपंचमी सप्तमीचाष्टमीसौम्येपक्षयोरुभयोरपि पौषेपक्षद्वयेचैवच
तुर्थीपंचमीतथा माघेतुपंचमीषष्ठीशुक्लेकृष्णेयथाक्रमम् तृतीयाचचतुर्थीचफाल्गुनेसितकृ
ष्णयो स्तिथयोमासशून्यास्त्यावंशवित्तविनाशना आसूश्राद्धंप्रकुर्वीतनैवमंगलमाचरेदिति
अथनक्षत्रसंबंधिदोषान्सार्धानुष्टुपद्वयेनाह तथेति अनुराधेति स्वातीतिच शुभेकृत्येद्वादश्यां
सार्पमाश्लेषानिंद्या आदिमेप्रतिपदिवैष्णमुत्तराषाढा राक्षसंमूलम् लक्षः द्वितीययाचानुराधा
युत्तराचतृतीययां पंचम्याचमघायुक्तावित्रास्वात्योस्त्रयोदशी प्रतिपद्युत्तराषाढानवम्यांकृत्तिका

शक्राःपंचाग्नितेशक्राद्यग्निविश्वरसाःक्रमात् तथानिंद्यंशुभेसार्पद्वादश्यां
वैश्वमादिमे ११ अनुराधाद्वितीयायांपंचम्यांपित्र्यभंतथा युत्तराश्चतृती
यायामेकादश्यांचरोहिणी १२ स्वातीचित्रेचयोदश्यांसप्तम्यांहस्तराक्षसं न
वम्यांकृत्तिकाष्टम्यांपूभाषष्ठ्यांचरोहिणी १३ यदि सप्तम्यांहस्तमूलेचषष्ठ्यांबास्यं
भवेद्यदि पूर्वाभाद्रपदाष्टम्यामेकादश्यांचरोहिणी द्वादश्यांचयदाश्लेषात्रयोदश्यांमघायदि इत्या
दि एषुकार्येकृतेचेत्स्यात्षण्मासान्मरणंध्रुवमिति ११ १२ १३ अथचैत्रादिमासेषुशून्यनक्षत्रा
ण्यनुष्टुप्द्वयेनाह कदास्त्रमेरोहिण्यश्विन्यौचैत्रेशून्येनक्षत्रेषुशुभकार्यनकार्यम्
यतोवित्तविनाशदाः धननाशकरादत्यर्थः एवंवैशाखेत्वाष्ट्वायूवित्रास्वात्यौशून्यभे याशीवरुण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तद्वंशततारा अजपात्पूर्वाभाद्रपदावसिष्ठः अश्विनीरोहिणीचैत्रेभून्यपेपरिकीर्तिते चित्रास्वा तीचवैशाखेज्येष्ठेविश्वेज्यतारके भगवासवभाषादेश्रावणेहरिविश्वभे नभस्येवारुणास्यक्षेमज पादश्वयुज्यपिकार्तिकेपितृवन्त्य क्षेसौम्येचित्राहिदैवते पौषेदस्रकरार्द्राःस्कर्माघेमूलंचविष्णु भम् तपस्येशक्रभरणीभून्यभान्याहुरग्रजाः एषुयत्तुकृतंकर्मधनैःसहविनश्यतीति १४ १५ अथचैत्रादिमासेषुभून्यराशीननुष्टुभाह घटइति वसिष्ठः घटमत्स्यवृषायुग्ममेषकन्याःसवृश्चि काः तुलाचापकुलीरास्याम्रगसिंहाश्वराशयः चैत्रादौमासभून्यास्याव्यंशवित्तविनाशनाःइति

कदास्वभेत्वाष्ट्रवायूविश्वेज्यौभगवासवौ वैश्वश्रुतीपाशिपौष्णेअजपादग्निपि त्र्यभे १४ चित्राह्यशौशिवाश्व्यर्काःश्रुतिमूलेयमेद्रभे चैत्रादिमासेभून्यास्यास्ता रावित्तविनाशदाः १५ घटोझषोगौमिथुनंमेषकन्यालितौलिनः धनुःकर्कोमृगः सिंहश्चैत्रादौभून्यराशयः १६ पक्षादितस्त्वोजतिथौघटेणौपंचास्यनक्रौमिथुनं गनेच १६ अथविषमतिथिषुदग्धलग्नानींद्रवज्रयाह पक्षादितइति शुक्लपक्षकृष्णप क्षादितः प्रतिपदमारभ्यओजतिथौविषमतिथौप्रतिपत्तिथौघटेणौतुलामकरौ तृतीयायांमृगे द्रनक्रौसिंहमकरौ पंचम्यांमिथुनकन्ये सप्तम्यांचापेंदुभेधनुःकर्कौ नवम्यांकर्कहरीकर्कसिंहौ एकादश्यांहयांत्यौधनुर्मीनौ भयोदश्यांगोंत्यौवृषभीनौ एतेतिथिभून्यलग्ने तस्यांतस्यांतिथौ ९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नदेनिधिद्वे वसिंहः मृगसिंहौनृतीयायांमेषमायांतुलामृगे पंचम्यांवृषराशौद्वौसप्तम्यांचापंच
द्रमे नवम्यांसिंहकीटाख्यावेकादश्यांगुरोर्गृहे वृषभीनौत्रयोदश्यांदग्धसंज्ञास्त्वमीग्रहादग्धस
मनियत्कर्मकृतंसर्वंप्रणश्यति ११ अथैषांदुष्टयोगानांशमकृत्यावश्यकत्वेसतिपरिहारमाह ना
रदः तिथयोमासशून्याइतिद्वाभ्याम् पंग्वंधकाणलग्नानिविवाहप्रकरणेवक्ष्यंतेजगन्मोहने कें
चैवत्रिकोणेचशमेत्युपचयेपिवा एकोपिबलवांश्चापिभून्यतिष्युडुनाशकइति १८ १९ अथवा

चापेंदुमेकर्कहरीहयांत्यौगोंत्यौचनष्टेतिथिभून्यलग्ने १७ तिथयोमासशून्याश्च
भून्यलग्नानियान्यपि मध्यदेशेविवर्ज्यानिनदूष्याणीतरेषुतु १८ पंग्वंधका
णलग्नानिमासशून्याश्चराशय गौडमालवयोरुक्ताज्याअन्यदेशेनगर्हिताः १९ व
र्जयेत्सर्वकार्येषुहस्तार्कंपंचमीतिथौ भौमाश्विनीचसप्तम्यांषष्ठ्यांचंद्रेदवंतथा २०

स्तार्कादिसिद्धियोगानांतिथिविशेषेणातिनिंद्यत्वमनुष्टुप्द्वयेनाह वर्जयेदिति बुधानुराधामितिच
श्रीपतिः हस्तेरवौशशधरेचमृगोत्तमांगंभौमेश्विनीबुधदिनेचतथानुराधा पुष्योगुरौभृगुसुतेपि
चपौष्णधिष्ण्यंरोहिण्यथार्कतनयेमृतसिद्धियोगा एतेपंचम्यादितिथिषुचेद्भवंतितदावर्ज्याः य
थापंचम्यांहस्तार्कोवर्ज्यः एवमग्रेपिषष्ठ्यादौ अन्येउक्तंच अर्केहस्तः पंचमीचसोमेषष्ठीचचंद्रभम्
अश्विनीसप्तमीभौमेबुधेमैत्रंतथाष्टमी गुरौपुष्यंचनवमीदशमीरेवतीभृगौ एकादशीशनौश्रा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यंवर्जयेत्सर्वदाबुधैरिति २० २१ अन्यदप्याह गृहप्रवेशइति ननुभौमाश्विन्यादीनांगृहप्रवेशा दौस्वतएववारनक्षत्रदोषादप्राप्तेःकिमर्थमिदंवचनम् उच्यते यदिविष्टिर्व्यतीपातोदिनंवाप्यशुभंभवेत् हन्यतेःमृतयोगेनभास्करेणतमोयथेतिवचनात्कार्यमात्राभाशास्त्यप्राप्तेआवश्यकेग्रहे शादिसंभावनास्यातदर्थमपवादवचनंयुक्तमेव २२ अथानंदादियोगान्शास्त्रिन्युपजातिकाभ्या

बुधानुराधामघहस्तमैत्र्यांदशम्यांभृगुरेवतीम् नवम्यांगुरुपुष्यंचैकादश्यांशनिरोहिणीम् २३ गृहप्रवेशेयात्रायांविवाहेचयथाक्रमम् भौमेश्विनीशनौब्राह्म्यंगुरौपुष्यंविवर्जयेत् २४ आनंदाख्यःकालदंडश्चधूम्रोधातासौम्योध्वांक्षकेतू क्रमेणश्रीवत्साख्योवज्रकंमुद्गरश्चछत्रंमित्रंमानसंपद्मलुंबौ २५ उत्पातमृत्यू काणसिद्धीशुभोमृतारव्यासुसलंगदश्च मातंगरक्षश्चरस्थिराख्याःप्रवर्धमानाःफलदाःस्वनाम्ना २६ दास्त्रादर्कमृगादिदोसार्पात्भौमेकराहुधे मे त्राहुरौभृगोवैश्वात्गण्यामंदेचवारुणात् २७ मद आनंदइति उत्पातइतिच २३ २४ अथैषांगणनोपायमनुष्टुभाह दास्त्रादिति अत्रनक्षत्राणांसाभिजितांगणनाकार्यातो शविंशतियोगाः यथाऽर्कदिनेअश्विदिननक्षत्रंश्रवणस्तदाश्विनीतःसाभिजिद्गणनयात्रयोविंश- तिसंख्यमस्ति तथासत्यानंदादियोगेषुत्रयोविंशतिसंख्योगदयोगोजातः एवमिंदुवारेमृगशीर्षा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृणनया आनंदादयोनेगाः २५ अथैनेषुनिगनांदुष्टयोगनामनष्यन्दूनेषदिनंशाह ध्वांक्षइति ध्वांक्षवज्रमुद्गरयोगेषुआद्याद्यनाड्यः पंचघटिकावर्ज्याः पद्मलुंबयोर्वेदाश्चत स्रः एवंगदेऽश्वाःसप्त धूम्रेभूरेकैव काणेघटिद्वयम् मुसलेद्वेघटिके राक्षसमृत्यूत्पातकालाः सर्वेषष्टिघटिकात्मकावर्ज्याः कालः कालदंडः अत्रानुक्तेपिचरेयोगेघटित्रयंवर्ज्यम् उक्तंचज्योतिः सागरे ध्वांक्षेंद्रायुधमुद्गरेषुघटिकास्त्याज्यास्तुपंचादितः पद्मलुंबकयोश्चतस्रउदिताधूम्रेसदैका

ध्वांक्षेवज्रेमुद्गरेचेषुनाड्योवर्ज्यावेदाः पद्मलुंबेगदेश्वाः धूम्रेकाणेमौसले भूर्द्वयंद्वेरक्षोमृत्यूत्पातकालाश्चसर्वे २६ सूर्यभाद्वेदगोतर्कदिग्विश्वनख संमिते चंद्रर्क्षैरवियोगाःस्युर्दोषसंघविनाशकाः २७

पुनः द्वेकाणेमुसलाह्वयेपि

चगदेससैवतिस्रश्चरेमृत्यूत्पातकरक्षसांदिनगतास्ताः कालदंडेतथा २८ अथदोषापवादभू तान्नक्षत्रवियोगाननुष्टुभाह सूर्यभादिति सूर्योयत्रतन्नक्षत्रमारभ्यचंद्रर्क्षेदिननक्षत्रेचतुर्नवषट्द शत्रयोदशविंशतिसंख्याकेसतिरवियोगाःस्युः तेचदोषसमूहानांनाशकराःउक्तंच सूर्याच्चतुर्थे दशमेचषष्ठेविश्वर्क्षकेविंशतिमेनवर्क्षे भवंतिषट्भानुसदृक्षयोगाःकुयोगविध्वंसकराःप्रदि ष्टाः २७ ७ ७ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सूर्यादिवारेषुनक्षत्रविशेषैः सिद्धियोगानिंदवज्जोपजातिनाप्याह सूर्येदनि जीवेदनि च रविवारेहस्तमूलश्युत्तराषुष्याश्विनीनक्षत्राणिपूर्वैराचार्यैः सर्वार्थसिध्येकथितानि एवंचंद्रे श्रवणादीनि एतेसिद्धियोगाः दास्त्रादर्केमृगादिंदाविंत्यादिप्रकारेणआनंदादिसमीचीनसद्योग संबंधिनक्षत्रैरुपनिबद्धाः भौमपराक्रमेणकुयोगा अप्युक्ताः ज्येष्ठावन्हिमघाविशाखवसवोमैत्रं यमाख्यंरवौसोमेशैवविशाखपुष्यपवनाश्विन्नाखषादाद्वयम् भौमेविश्वजलेशमित्रवसवः प्राग्भाद्रसार्पैशिवः बुधेरेवतिपूर्वयोनिभरणीवस्वश्विमूलाबुधे जीवेमूलमघार्द्रयाम्यवरुणापूषा

सूर्यार्कमूलोत्तरपुष्यदास्रंचंद्रेश्रुतिब्राह्मशशीज्यमैत्रम् भौमेधनिर्बुध्यकृशानुसार्पेज्ञेब्राह्ममैत्रार्ककृशानुचाद्रम् २८ जीवेत्यमैत्राश्व्यदितीज्यधिष्ण्यंशुक्रेत्यमैत्राश्व्यदितिश्रवोभम् शनौश्रुतिब्राह्म्यसमीरभानिसर्वार्थसिध्येकथितानिपूर्वैः २९ हीशान्तोयाद्वासवार्योष्णभाच्चब्राह्मात्पुष्यादर्यमर्क्षं चतुर्भैः

शशीरोहिणीशक्रेस्वातिर्भुजंगदैवतमघापुष्योत्तरारोहिणी सौरावर्यममूलहस्तवरुणाषाढाद्वयंरेवतीचित्राविष्णुमघाश्वसर्वसमयेस्याज्याअयोगाबुधैरिति २८ २९ अथावश्यकवर्ज्यस्तेनशटित्युपस्थित्यर्थंउत्पातमृत्युकाणसिद्धियोगान्शालिन्याह हीशादिति विशाखादिचतुर्नक्षत्रैरुत्पातमृत्यु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काणवसिद्धियोगा रविवारेषु यथा रवौ विशाखानक्षत्रे उत्पातमृत्युकाणयोगा भवन्ति मूलसिद्धिरिति एवं सोमवारादौ पूर्वाषाढादितोज्ञेयम् तत्फलं नामसदृशं उत्पातमृत्युकाणानिषिद्धा सिद्धिः शुभइत्यर्थः नारदः विशाखादिचतुर्वर्गमर्कवारादिषुक्रमात् उत्पातमृत्युकाणास्त्याज्यायोगाश्चामृतसंयुताइति २० अथ देशविशेषेणकुयोगानांपरिहारमनुष्टुभाह कुयोगाइति तिथिवारोत्थाः कुयोगाः ककचादयः तिथिभोत्थाः अनुराधाद्वितीयायामित्यादयः भवारजाः याम्यंत्वाष्ट्रंवैश्वदेवमित्यादयः तथात्रितयजाः तिथिवारनक्षत्रजाः

स्यादुत्पातोमृत्युकाणौचसिद्धिर्वारेर्कद्यैतत्फलनामतुल्यम् २० कुयोगास्तिथिवारो त्थास्तिथिभोत्थाभवारजाः हूणवंगखशेषुवर्ज्यास्त्रितयजास्तथा २१ सर्वस्मिन्वि धुपापयुक्तनुलवावर्द्धनिशान्होर्धटीत्र्यंशवैकुनवांशकंग्रहणतः पूर्वदिनानांत्रयम् उत्पातग्रहनोः ग्रहांश्चशुभदोत्पातैश्चदुष्टदिनषण्मासंग्रहभिन्नभंत्यजशुभेयौदुत थोत्पातभम् २२ वर्जयेत्सर्वकार्येषुहस्तार्कपंचमीतिथावित्येवमादयस्तेसर्वे हूणवंगखशदेशेषु वर्ज्याः अन्यदेशेननिषिद्धाइत्यर्थः नारदः तिथिवारोद्भवानेष्टायोगावारर्क्षसंभवाः हूणवंगखशेभ्योन्य देशेषुतेशुभप्रदाइति २१ अथसमस्तशुभकृत्येवर्ज्यान्शार्दूलविक्रीडितेनाह सर्वस्मिन्निति सर्वस्मिन् शुभैकार्येएतानिवैनिश्चयेनत्यजपरिहरेत्यर्थः विधुनापापेनवापापैः क्षीणेंदूर्कमहीसुतार्कतनयैर्वायुजौ युक्तौतनुलवौलग्नलग्ननवांशोत्याज्यौ पूर्णः क्षीणोपिवाचंद्रोलग्नेसर्वत्रगर्हितइतिकश्यपोक्तेः पापेंदूल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रगौवांशगतौवज्यौशुभेसदेतिच निशान्होरार्धेरात्र्यर्धेदिनार्धेचघटीत्र्यंशंविंशतिपलानिदशापूर्वंदशा
पश्चाच्चपरिहर्त्तव्यं मूर्तःकालोनिवसतिमहानिशायांचदिनदलेयस्मान्दशापूर्वंदशापरतस्तस्माद्
र्ज्यानिचपलानि कुनवांशकंपापग्रहनवांशकंपरिहरेत् अथग्रहणतः पूर्वंदिनानांत्रयंपरिहरेत् उत्पातग्रह
तः उत्पातादिव्यभौमांतरिक्षास्तेयस्मिन्दिनेभवंतितन्नोऽग्रहाश्चसप्तदिनानिवर्ज्यानि ग्रहोग्रहणंतस्मा
त् अपिसप्तदिनानिवर्ज्यानिउक्तंच चंद्रसूर्योपरागेषुत्र्यहंपूर्वंशुभेत्यजेत् सप्ताहमशुभंपश्चात्स्मृतंग्रह
णसूतकम् त्रिविधोत्पातनक्षोर्ध्वंसिंहिकासूनुदर्शने सप्तरात्रंनकुर्वंतियात्रोद्वाहादिमंगलमिति अंगि
राअपि सर्वग्रासेतुसप्ताहमर्धग्रासेदिनत्रयम् त्रिद्येकांगुलतोग्रासेदिनमेकंविवर्जयेत् वसिष्ठः सर्व
ग्रासेदिनान्यष्टौसर्वकार्येषुविवर्जयेत् षट्दिनानित्रिभागोने अर्धग्रासेचतुर्दिनम् चतुर्थांशोत्रिरात्रंस्या
द्ग्रहणेचंद्रसूर्ययोः अत्रकार्यस्यावश्यकत्वेपरिहारोज्योतिर्निबंधेपंचदिनानिवसिष्ठस्यदिनंगर्गस्यकौ
शिकस्यैकम् यवनाचार्यस्यमतंपंचमुहूर्तानिदूषयतिराहुरिति अयंचनिषेधोनित्यनैमित्तिकादिकृत्या
तिरिक्तविषयः तत्रनित्येनैमित्तिकेकाम्येजपहोमक्रियासुच उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यतइ-
ति शुभदोत्पातेश्वदुष्टंदिनमिति शुभदोसातावराहसंहितायांवंडाशनिमहीकंपसंध्यानिर्घातनिस्व
नाःपरिवेषरजोधूमरक्तार्कास्तमनोदयाःदुर्मेध्यान्नरसस्नेहमधुपुष्पफलोद्भवाःगोपक्षिमद्यदृष्टिश्च
शुभायमधुमाधवेत्यादयःक्रतुपरत्वेनोक्ताःअनेयद्दिनेभवंतितद्दिनमेवत्यजेत् अथग्रहभिन्नभंग्रहैर्भौ
मादिभिर्भिन्नंभोदिनंतथायोर्युद्धंग्रहयोर्युद्धंयस्मिन्दिननक्षत्रेयुद्धंजातंभूतथाउत्पातभंयस्मिन्नक्ष

शु॰ प॰ १२

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रेहिव्यांतरिक्षभौमास्त्रिविधोत्पाता संभूता एतानिग्रहभिन्नयोर्दुरुत्पातनक्षत्राणिषण्मासंत्यज
भेदस्तारारवेटयोर्यत्रवास्यादितिविवाहदीपनेनारदः ग्रहणोत्पातभत्याज्यंमंगलेष्वृक्षत्रयमिति न
नुनक्षत्रसंधौजायमानेग्रहणेकिंनक्षत्रंदूषयेदित्यत्राहुश्चार्डधरः यस्मिन्विधुंराहुरिनंचधिष्ण्येगृह्णा
तितत्याज्यमृतुत्रयंस्यात् पाणिग्रहेपुंमरणंविधत्तेद्वयोर्भयोश्चेद्वयमेवजह्यात् अन्यत्र पक्षांतरेण
ग्रहणद्वयंस्याद्यदानदानद्ग्रहणोपगंभम् पक्षाद्दशकंभवतिद्वितीयंपाणिग्रहेशुध्यतिभोगषट्का
दृति ३२ अथग्रहणनक्षत्रेग्रासभेदेननिंद्यान्मासदिवसांश्चेंदवज्रयाह नेष्टमिनि ग्रहर्क्षग्रहणन
क्षत्रंक्रमात्संपूर्णार्धचतुर्थांशग्रासेसतिषट्त्र्येकमासान्नेष्टम् गुरुःसर्वग्रासेषुषण्मासान्त्रीन्मासां

नेष्टंग्रहर्क्षंसकलार्धपादग्रासेक्रमात्तर्कगुणेंदुमासान् पूर्वपरस्तादुभयोस्त्रिय
स्त्राग्रस्तेस्तगेवाप्युदितेर्धखंडे ३३ स्तुदलेग्रहे आपादग्रहणेधिष्ण्येमासमेकंविवर्जये
त् अथक्रमात्ग्रस्तेऽस्तगेग्रहणार्धग्रासेऽभयोराक्पश्चाच्चत्रित्रिघस्रानेष्टा तथाअर्धखंडेग्रस्ता
स्तग्रस्तोदययोरभावेपिअर्धग्रासेऽभयोराक्पश्चाच्चत्रित्रिघस्रानेष्टाः गुरुःग्रस्तास्तेत्रिदिनंपूर्वप-
श्चाद्ग्रस्तोदयेतथाखंडग्रासेत्रित्रिदिनंनिःशेषेसतसप्तचेति कश्यपः ग्रस्तोदयेपरोदोषोग्रस्तास्तेग्रो
कृशशीनयोर्युनिशार्धेनूभयंतत्खंडोखंडव्यवस्थयोरिति ३४ अथसामान्यतोवश्यवर्ज्यानिपंचां
गदूषणादीनिवसंततिलकानुष्टुभ्याह जन्मर्क्षेति परिघार्धेतिच जन्मनक्षत्रजन्ममासजन्मति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थयःशुभकर्मसुवर्ज्याः अयंनिषेधआद्यगर्भस्यैव नारदः नजन्ममासेजन्मर्क्षेनजन्मदिवसेपिवा आद्यगर्भसुतस्याथदुहितुर्वाकरग्रहइति जन्ममासःसविज्ञेयोवर्जितः सर्वकर्मसुवस्तुतस्तुयत्रशु क्लादिचांद्रमसेचैत्रादौजन्माभूत्सचांद्रोमासोजन्ममासस्त्याज्यः रुद्राग्नीयत्रद्वयेतेमासादिःसंप्रकी-र्तितः अग्नीषोमौस्मृतौमध्येसमासःपितृसोमकइतिहारीतोक्तमासलक्षणान्न्यतीपातादयश्चव-र्ज्याः पितृदिनंमातापित्रोर्मरणदिनंतिथिक्षयर्द्धितिथिक्षयस्तिथिवृद्धिश्चतल्लक्षणमाहवसिष्ठःसु

जन्मर्क्षमासतिथयोव्यतिपातभद्रावैधृत्यमापितृदिनानितिथिक्षयर्द्धिन्यूनाधिमा सकुलिकप्रहरार्धपातविष्कंभवज्रयटिकात्रयमेववर्ज्यम् ३४ परिघार्द्धंपंचशूले षट्चगंडातिगंडयोःव्याघातेनवनाड्यश्चवर्ज्याःसर्वेषुकर्मसु ३५ वेदागाष्टनवा कैंद्रपक्षरंध्रतिथौत्यजेत् स्तिस्रस्तिथयोवारेएकस्मिन्नवमातिथिः तिथिर्वारत्रयेचैकाद्विद्यु-स्मृक्द्वेपिनिंदिते न्यूनमासः अधिमासश्चवर्ज्यः संक्रमद्वयसहितः क्षयमासः अधिकमासोऽसंक्रांतःकु लिकार्धं प्रहरौवक्ष्यमाणौ पातोमहापातः विष्कंभयोगवज्रयोगयोराद्यंघटिकात्रयमेववर्ज्यम् एवं प्रकारेणकैश्चिद्वज्रयोगेनवघटिकावर्ज्याइत्युक्तम् यथा विष्कंभाद्यघटीत्रयंचनवकंव्याघातवज्रोद्भवे इति वृत्तशतेतथा व्याघातेवज्रकेकाइतिगणेशज्योतिर्विदुक्तिरपिनिरस्ता विष्कंभवज्रयोस्तिस्रः ष ट्चगंडातिगंडयोःव्याघातेनवशूलेतुपंचनाड्योविगर्हिताइतिकश्यपोक्तेः परिघस्याद्यार्धवर्ज्यम् शूल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण्याः पंच गंडांतिगंडयोराद्याः षट्कद्वयटिकाः व्यायातेचादिमानवघटिकाः वर्ज्याः ३४ ३५ अथ पक्षरंध्रतिथीनावश्यकत्वेतन्निषेधवर्ज्यघटीश्चानुष्टुभार्द्ध वेदांगेति चतुर्थीषष्ठीअष्टमीनवमीद्वादशी चतुर्दशीरेनाः पक्षरंध्रतिथयोज्ञेयाः आसुरुक्षमकृत्यस्यावश्यकत्वेसतिआदिमाः क्रमात् वस्वंकमनुतत्वाशाशरानाडीस्त्यजेत् यथा चतुर्थ्याः आदिमा अष्टघटिकाः षष्ठ्यांनव अष्टम्यांचतुर्दशनवम्यांपंचविंशतिः द्वादश्यांदशाचतुर्दश्यांपंचघटिकास्त्याज्या इत्यर्थः पराउर्वरिताः शुभाज्ञेयाः अस्मिन् चतुर्दशीचतुर्थीचअष्टमीनवमीतथा षष्ठीचद्वादशीचैवपक्षरंध्रेद्वयादिमाः क्रमादेतासुतिथिषुवर्जनी

वस्वंकमनुतत्वाशाशरानाडीःपराःशुभाः ३६ कुलिकः कालवेलाचयमघंट श्चकंटकः याश्चनाडिका भूताष्टमनुतत्वांकदशशेषास्तुशोभनाः दोषनाडीषुयत्कर्मकृतं सर्वंविनश्यतीत्यादि कश्यपेनसर्वसाधारण्येनदशैववर्जिताः ३६ अथकुलिककालवेलायमघंटकंटकदोषानाह कुलिकइतिवर्तमानवारान्मंदेशनैश्चरेगणितेसतियोंकोभवतितस्मिन्द्विगुणेयोंकस्तत्संख्यालक्षणोमुहूर्तः कुलिकोभवति एवंबुधेजीवेभौमेवर्तमानवाराद्गणितेयोंकोभवतिससद्विघ्नःक्रमात्कालवेलायमघंटकंटकसंज्ञादुष्टमुहूर्ताःस्युःयथारविजशनिःसप्तसंख्याकस्तस्मिन्द्विगुणेचतुर्दशजाताःतेनरवौचतुर्दशोमुहूर्तः कुलिकः एवंबुधसंख्याचत्वारस्तद्द्विगुणोऽष्टमोमुहूर्तः कालवेलाजीवेपंचद्विघ्नेदशमोयमघंटः भौमेतृतीयेद्विघ्नेषष्ठोमुहूर्तः कंटकसंज्ञ इत्यर्थः ए-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वंशोमवारादावपि अथशुभकृत्यावश्यकत्वेसतिदेशभेदेनकुलिकादिदोषपरिहारमाह मर्म विंध्य
स्योत्तरकूलेतुयावदातुहिमाचलस्य यमकंटकदोषोस्तिनान्यदेशेषुविद्यते मत्स्यांगमागधांध्रेषुय
मघंटस्कदोषकृत् काश्मीरेकुलिकंदुष्टमर्धयामस्तुसर्वतइति केचिन्मतेस्यात्कालवेलारवितः शा-
राक्षितर्कानलांगांबुधयो ५ २ ६ ३ ७ ४ गजेंदू ८ १ दिनेनिशायामृतुवेदनेत्रनगेषुरामा ६
४ २ ७ ५ ३ विधुदंतिनौ १ ८ च गजेंदूरत्यर्धप्रहरद्वयंशनौ यात्रायांमरणंकालेवैधव्यंपाणिपीड
नेव्रतेब्रह्मवधःप्रोक्तःशुभकर्मनतस्त्यजेत् गौडा सूर्यवेदशरौ ४ ५ चंद्रेहयपक्षौ ७ २ कुजेक्षि
भूः २ १ क्षेबाणाग्नी ५ ३ गुरौदंतिहयौ ८ ७ शुक्रेत्रिवेदकौ ३ ४ मंदेतर्कगजौ ६ ८ क्षेयौयामा

धाराद्विघ्नेकमान्मंदेबुधेजीवेकुजेक्षण ॥ सूर्येषट्स्वरनागदिग्भ्रनुमिताश्चंद्रे
श्विषट्कुंजरांकार्कावश्वपुरंदराक्षितिसुतेद्व्यब्ध्यग्नितर्कादिशः सौम्येद्व्यब्धिग
जांकदिग्भ्रनुमिताजीवेद्विषट्भास्कराः शुक्रारव्यास्तिथयःकलाश्चभृगुजेवेद
षुतर्कायहाः ॥ धीवशुभौसदेति ॥ अथसूर्यादिवारेषु शिष्याणांसद्यएवदोषज्ञानार्थंदु
र्मुहूर्तादिनामकान् मुहूर्तान्शार्दूलविक्रीडितवसंततिलकाभ्यामाह सूर्येइति दिग्भास्कराइतिच र
विवारेषष्ठसप्ताष्टमदशमचतुर्दशमुहूर्त्तानिंद्याएवंसर्वत्र अयमर्थोमूलेन्यासतःस्पष्टएव एषुमुहूर्त्ते
षुकश्चिद्दुर्मुहूर्तःकश्चित्कुलिकःकंटकःकालवेलाख्यःअर्धयामाख्यःयमघंटाख्यःस्यात् ज्ञेयमाणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कलांशादिनमानस्यषोडशांशः १६ ५९ अथविवाहादिशुभकृत्येहोलिकाष्टकनिषेधंदेशपरत्वेना
ह विपाशेति विपाशाद्रावतीशतद्रूएनाः पश्चिमदेशमसिद्धा नद्य स्तासांतीरेउभयतटवर्तिदेशेषि
पुष्करदेशेचहोलिकाफाल्गुनशुक्लपौर्णिमातनप्राग्दिनाष्टकंविवाहादिशुभकृत्येनेष्टंनिषिद्धंअर्थाद्
न्यदेशेननिषिद्धम् ६० अथमृत्यकयोगादिदुष्टयोगपरिहारमप्युशनाह मृत्युकचेतिमृत्युयोगादा
स्यादर्कइत्यादिनाआनंदादिपूर्वका ककचाःषष्ठ्यादितिथयोमंदाद्विलोममित्युक्ता दग्धादियोगाःसू

दिग्भास्करामनुमिताश्चशनौशशिद्विर्नागादिशोभवदिवाकरसंमिताश्च दुष्ट
क्षणाःकुलिककंटककालवेलास्युश्चार्धयामयमघंटगताःकलांशाः ५८ विपाशे
रावतीतीरेशतद्वाश्चत्रिपुष्करे विवाहादिशुभेनेष्टंहोलिकाप्राग्दिनाष्टकम् ५९
मृत्युककचदग्धादीनिंदोशास्तेशुभान्जगुः केचिद्यामोत्तरंचान्येयात्रायामेवनिं
दितान् ६० र्येशपंचाग्नीत्यादिनोक्ता वंद्देशस्तेकर्तुर्गोचरेणसमीचीनेसतिएतान्योगान्
शुभान्शुभफलदान्जगुःऊचुः राजमार्तंडः ककचामृत्युयोगास्त्यादिनंदग्धंतथैवच वंद्देशुभेक्षयंग
तिरुक्षावज्रहताइव अथकेचिदाचार्याः यामोत्तरंमहरोत्तरंमृत्युककचदग्धादीन्शुभान्जगुःसएवा
ह उत्पातेयमघंटेचकाणेचककचेतथा तिथौदग्धेचकालेचप्राग्यामात्परतःशुभमिति अथान्येआचा
र्याः मृत्युककचदग्धादीन्यात्रायामेवनिंदितान्जगुः विवाहादौतुनदोषः ६१ वारर्क्षतिथियोगेषुयात्रा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेवविवर्जयेत् विवाहादीनिकुर्वीतगर्गादीनामिदंवचः निंद्योधितिशेषः अन्यच्च अयोगेषुचसर्वेषुव
र्जयेद्घटिकाद्वयम् उत्पातमृत्युकाणानांपंचषट्सप्तनाडिकाः ४१ पुनरप्यपवादंभृजंगप्रयातेनाह
अयोगेइति अयोगेकृकचादोसनिचेत्सूयोगः सिद्धियोगोपिस्यात् तदाएषः सिद्धियोगः अयोगफलं
निहत्यसिद्धिंतनोतिनिष्पादयति मार्तंडः अयोगः सिद्धियोगश्चद्वावेतौभवतोयदि अयोगोहन्यतेतत्र
सिद्धियोगःप्रवर्त्तते परेआचार्याः लग्नर्क्षाद्यांकुयोगादिनाशमाहुः यदाहसएव यत्रलग्नंविनाकिंचित्
क्रियतेशुभसंज्ञकम् तत्रतेषामयोगानांप्रभवाज्जायतेफलम् अथावश्यकृत्येकालांतराभावेपरिहा

अयोगेसूयोगोपिचेत्स्यात्तदानीमयोगंनिहत्यैषसिद्धिंतनोति परेलग्नर्क्षाद्या
कुयोगादिनाशंदिनार्द्धोत्तरंविष्टिपूर्वंचशास्तम् ४२ शुक्लेपूर्वार्धेष्टमीपंचदश्यो
र्भद्रैकादश्यांचतुर्थ्यांपरार्द्धे कृष्णेत्यार्धेस्यात्तृतीयादशम्योः पूर्वेभागेसप्तमीशं
भुतिथ्योः ४३ रमाहविष्टिपूर्वमिति विष्टिर्भद्रासापूर्वार्धस्थविष्ट्यादिकंमध्यान्हानंतरंशस्तमाह
उक्तंच विष्टिरंगारकश्चैवव्यतीपातःसवैधृतिः अन्यरंजन्मनक्षत्रंमध्यान्हात्परतःशुभमिति ४२ अथभ
द्रांशालिन्याह शुक्लेइति शुक्लेशुक्लपक्षेः ष्टम्यांपौर्णिमायांचपूर्वार्द्धेभद्रास्यात् एकादश्यांचतुर्थ्यांचउ
त्तरार्धेभद्रा कृष्णेपक्षेतृतीयायांदशम्यांचअंत्यार्धेउत्तरार्धे सप्तम्यांशुक्लतिथौचतुर्दश्यांचपूर्वार्द्धेपू
र्वभागेभद्रास्यात् भद्रास्वरूपंरत्नमालायांउद्दंडोद्दंडतरेत्यादि ४३ ७ ५ ६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथचतुर्थ्यादितिथिषुभद्रायाःमुखपुच्छविभागंशार्दूलविक्रीडितेनाह पंचद्व्यष्टीनिचतुर्थ्यादितिथी
नांपंचादिप्रहरेषु आदिघट्यःशराःपंचसंख्याविशेषेभद्रायाआस्यंमुखम् यथा चतुर्थ्याः पंचमप्रहरे
आदिभूताःपंचघट्योभद्रामुखं एवमष्टम्यांद्वितीयप्रहरे एकादश्यांसप्तमप्रहरे पूर्णिमायांचतुर्थप्र
हरे तृतीयायामष्टमे सप्तम्यांतृतीये दशम्यांषष्ठे चतुर्दश्यांप्रथमेप्रहरेभद्रामुखंस्यात् तदसत् अशु
भमित्यर्थः अथपुनश्चतुर्थ्यादितिथीनांक्रमेणगजेंद्रित्यादिप्रहरेषु अंत्यभवंघटीत्रयंपुच्छसंज्ञंतच्छु
भकरंयथा चतुर्थ्याअष्टमप्रहरस्यांत्यघटीत्रयंभद्रापुच्छम् एवमष्टम्यादिषुप्रथमादिप्रहरस्यांत्य

पंचद्व्यष्टिकृताद्रामरसभूर्यादिघट्यःशराविष्टेरास्यमसृक्जेंदुरसरामाब्धि
बाणाक्षिषु यामेषुंत्यघटीत्रयंशुभकरंपुच्छंतथावासरेविष्टिस्तिथ्यपरार्धजाशु
भकरीरात्रौचपूर्वार्धजा ॥५५॥

घटीत्रयंपुच्छंज्ञेयम् अत्रभद्राकर्माणि वसिष्ठः वधबंधविषाग्नि
शस्त्रछेदनोच्चाटनादियत्नं तुरंगमहिषोष्ट्रादिकर्मविष्यांतुसिध्यति अंगविभागः कश्यपसंहितायाम् मु
खेपंचगलेत्वेकावक्षस्येकादशस्मृता नाभौ चतस्रः षट्कट्यांतिस्रः पुच्छेतुनाडिका कार्यहानिर्मुखेमृ
त्युर्गलेवक्षसिनिस्वता कट्यामुन्मत्तताभौच्युतिः पुच्छेधनोजय अथविष्टिपरिहारमाह तिथेनि
तिथ्यपरार्धजातिथ्युत्तरार्धभूताविष्टिर्वासरेदिवसेयदिस्यात्तदाशुभकरी तथातेनैवप्रकारेणातिथिपू
र्वार्द्धोत्थारात्रौशुभकरी नारदःनिषेधमाह पूर्वार्धोत्थायदानिशि तदाविष्टिःशुभायेतिकमलासनभा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षितम् ॥ ॥ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रपाजलशालाप्रथमकोपाकर्मप्रथमारभ्यमाणंश्रावणीकर्मवेदव्रतंमहानाम्न्यादित्रयम्महानाम्नीव्रतम्उपनिषद्व्रतम्वेदव्रतंचौलोद्वाहकाम्यवृषोत्सर्गअतिपन्नशिशुसंस्कारअतिपन्नअतिक्रांताजातकर्मादयश्चिभूनांसंस्काराःदेवस्थापनम् [illegible] दीक्षामंत्रग्रहणादिकंमौंजिविवाहोप्रसिद्धौमुंडनंचौलम्अपूर्वदेवेक्षणंनार्थेक्षणंचसन्यासप्रसिद्धअग्निपरिग्रहोग्निहोत्रम्अपूर्वराजदर्शनंराजाभिषेकश्चागमंगमनंअपूर्वमेवचातुर्मास्यंचातुर्मास्ययागसमाप्तिर्मौंजीविसर्गश्रवणयोर्वेधकर्णवेधपरीक्षानसमाषादि

दीक्षामौंजिविवाहमुंडनमपूर्वदेवनार्थेक्षणंसंन्यासाग्निपरिग्रहौनृपतिसंदर्शाभिषेकोगमम्

रूपादिव्यमितियावत्एतानिकर्माणिबुधोनकुर्यात्कदाईज्यसितयोर्बृहस्पतिशुक्रयोर्वृद्धत्वेअस्तेचशिशुत्वेबाल्येचतथान्यूनाधिमासेक्षयमासेअधिमासेचनकुर्यात्अन्यमूलवचनानि [illegible] अस्तंगतेगुरौशुक्रेबालेवृद्धेमलिम्लुचेद्यापनमुपारंभंव्रतानांनैवकारयेत्अस्तोक्तंवापीकूपतडागयागगमनंक्षौरंप्रतिष्ठाव्रतंविद्यामंदिरकर्णवेधनमहादानवनंसेवनम्तीर्थस्नानविवाहदेवभवनंमंत्रादिदेवेक्षणंदूरेणैवजिजीविषुःपरिहरेदस्तंगतेभार्गवेउपनयनंगोदानंपाणिग्रहणंगृहप्रवेशगमनानिअस्तमितेषुनकुर्यात्क्षरगुरुभृगुपुत्रचंद्रेषुअन्यमयादिफलमाहव्यासादयश्चगुरोरस्तेपतिंहन्याच्छुक्रास्तेचैवकन्यकामुदंदेनष्टेऽभौहन्यात्तस्मादस्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विवर्जयेत् बालभावेस्त्रियंहन्यात्दृष्टभावेनरंतथा नस्माद्बाल्येचवार्द्धेचविवाहंनैवकारयेत्
अथाधिमासेवर्ज्यानिगृह्यपरिशिष्टे सोमयागादिकर्माणिनित्यान्यपिमलिम्लुचेतथैवाग्रयणाधान
चातुर्मास्यादिकान्यपिमहालयाष्टकाश्राद्धोपाकर्माद्यपिकर्मयत् स्यष्टमासविशेषाख्याविहितंवर्ज
येन्मलेगर्भगृहस्थानी अग्न्याधानंप्रतिष्ठांचयज्ञदानव्रतानिच वेदव्रतदृषोत्सर्गचूडाकरणमेखला
मांगल्यमभिषेकंचमलमासेविवर्जयेत् नवीनैः गृहप्रवेशगोदानस्थानाश्रयमहोत्सवम् नकुर्यान्मल
मासेतुसंसर्पेहस्यतौतथा वापीकूपतडागादिप्रतिष्ठायज्ञकर्मच नकुर्यान्मलमासेतुसंसर्पी

चातुर्मास्यस्मारनिश्चयणयोर्वेधंपरीक्षांत्यजेद्दृष्ट्वास्तशिशुलईज्यसितयो
र्न्यूनाधिमासेतथा ४७

हस्यतौतथा यदाक्षयमासोभवतितदाक्षयमासस्यपूर्वोत्तराव
धिमांसौभवत तत्रपूर्वसंसर्पःद्वितीयोंहस्पति एतानिगुरुशुक्रयोरस्तादावपिवर्ज्यानीत्याहगार्ग्यः
बालेवायदिवाद्वेशुक्रेवास्तंगतेगुरौ मलमासइवैतानिवर्जयेद्देवदर्शनम् अपूर्वदेवतांदृष्ट्वाशुचः
स्युर्नष्टभार्गवे मलमासेप्यनावृत्ततीर्थयात्रांविवर्जयेत् अनावृत्ताअपूर्वतीर्थयात्रा अत्रनियतका
लानिसीमंतनामकरणादीनिपूर्वादस्तादिसत्वेपिस्वस्वकालएवकार्याणि गुरुः मासप्रयुक्तकार्येषु १७
मूढत्वंगुरुशुक्रयो नदोषदुन्मलेमासेगुर्वादित्यादिकंतथा अन्यत्रापि सीमंतजातकादीनिप्राशनां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तानियानिवै नदोषोमलमासस्यमौढ्यस्यगुरुशुक्रयोरिति अतीतकालान्यखिलानितानि
कार्याणिसौम्यायनगोदिनेषे सितेगुरौवाप्यथदृश्यमानेतदुक्तपंचांगदिनेप्यखंडे अतएवातिपन्न
शिशुसंस्काशदत्युक्तम् अथसिंहकस्थगुर्नादिघनिदेशमाह अस्तेवर्ज्यमितिवदस्तेगुर्व
स्तेवर्ज्यनिषिद्धमुक्तंसिंहस्थेगुरौमकरस्थेचगुरौवर्ज्यनिषिद्धम् देवीपुराणे सिंहसंस्थेगुरौयत्ना
त्सर्वारंभान्विवर्जयेत् पुत्रभ्रातृकलत्राणिहन्याच्छीघ्रंनसंशयः कारकोवक्रतेनाशंसंतानंम्रियतेऽ
चिरात् देवारामतडागानिप्रपोद्यानगृहाणिच विवाहयज्ञोपनयचूडादिदर्शनंसिध्यति यथासिंह-

अस्तेवर्ज्यसिंहनक्रस्थजीवेवर्ज्यकेचिदूक्तेचातिचारे

स्थितोजीवस्तथैवमकरस्थित अयमपिनिषेधोनियतकालानांनसंग्रह वसिष्ठः नीचराशिगतोजी
वः प्रशस्तःसर्वकर्मसु नीचेनीचांशकस्याज्योयस्मादंशेषुनीचता विशेषोमांडव्येनोक्तः देवीपुराणे म
करस्थोयदाजीवोवर्जयेत्संचमांशकम् शेषेषपिचभागेषुविवाहःशोभनोमतः नारदः अतिचारे
समदिनवक्रेद्वादशमेवच नीचस्थितेपिवागीशोमासमेकंविवर्जयेत् ज्योतिर्निबंधे हरिनीचारिभागे
पिवृतोद्वाहादिमंगलम् अनिषिद्धंयदिस्वोच्चेस्वभेवासंस्थितोगुरुः यदांत्यस्त्रायदागच्छेफाल्गुनींच
रहस्पतिः पुत्रिणीधनिनोकन्यासौभाग्यंसप्तजन्मसु कश्चिदपूर्वतीर्थयात्रायांमौढ्यादिदोषोना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्ति गोदावर्यांगयायांचश्रीशैलेग्रहणद्वये सुरासुराणांगुर्वोश्चमौढ्यदोषोनविद्यते वापुत्रस्ते
त्रिस्थलीसेतौगयायांसर्वकालेषुपिंडदद्यादिधानम् अधिमासेजन्मादिनेह्यस्तेचगुरुशुक्रयोः नत्व
क्त्यंगयाश्राद्धंसिंहस्थेचबृहस्पतौ अधिमासेसिंहगुरावस्तेचगुरुशुक्रयो तीर्थयात्रानकर्तव्यागः
यांगोदावरींविनेति अथगुर्वाद्यस्तेयद्दर्ज्यंतद्दक्रगेगुरौ अतिचारगेपिगुरौवर्ज्यम् यात्रोद्वाह
प्रतिष्ठांचगृहचूडाव्रतादिकम् वर्जयेद्यत्नतश्चैवजीवेवक्रातिचारगे अस्यामादेशजमांडे वक्राति
चारगेजीवे वर्जयेत्तदनंतरम् ततोद्वाहादिचूडायामष्टाविंशतिवासरान् दीपिकायाम् त्रिकोणजाया
धनलाभरांशौवक्रातिचारेणगुरुःप्रयाति यदातदाप्राहशुभंविलग्नंविहायपाणिग्रहणंवसिष्ठः अ

गुर्वादित्येविश्वघस्रेपिपक्षेप्रोच्चुस्तद्वद्वंतरत्नादिभूषाम्

अकेचिद्गुरुसहिते आदित्येएकराशिगतौगुरुसूर्यौविनियावत् गुर्वादित्येपिसर्वशुभकर्मवर्ज्यम् तौ
एकराशिगतौसूर्यजीवौस्यातांयदापुनः व्रतबंधविवाहादिशुभंकर्माखिलंत्यजेत् अथकेचिद्विश्व
घस्रेपिपक्षे अस्मिन्पक्षेतिथिद्वयनाशः त्रयोदशदिनः पक्षः सोनिंद्यः उक्तः पक्षस्यमध्येद्वितीया
वपेनांतदाभवेद्वीरवकालयोगः पक्षेविनष्टेसकलंविनष्टमित्याहुराचार्यवराः समस्ताः नत्र त्रयोद
शदिनेपक्षेतदासंहरतेजगत् अपिवर्षसहस्रेणकालयोगः प्रकीर्तितः तस्मिन्पक्षेशुभकर्मवर्ज्य
मित्याहुः त्रयोदशदिनेपक्षेविवाहादिनकारयेत् गर्गादिमुनयःप्राहुः कृतेमृत्युस्तदाभवेत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपनयनंपरिणयनंवेशारंभादिपुण्यकर्माणि यात्रादिक्षयपक्षेकुर्यान्नजिजीविषुः पुरुष अथन
दृत्तेनप्रकारेणदंतरत्नादिभूषाम् दंताहस्तिदंतास्तत्संबंधिनींभूषाम् रत्नसंबंधिभूषांच आदिश
ब्दात्सुवर्णमणिसंबंधिनींचभूषांवर्ज्यांप्रोक्तपूर्वस्मिन्निषेधकालेइत्यर्थः राजमार्तंडः यात्रांचूडांविवा
हंश्रुतिविवरविधिंशरवसप्रप्रवेशप्रासादोद्यानहर्म्यक्रनरभवनारंभविद्याविधाने मौंजीबंधप
तिष्ठांमणिकनकरदाधारणंकुर्वतेयेसूक्ष्मः सिंहस्थितेज्येगुरुदिनकरयोरेकराशिस्थयोश्चेत्सिंह-
स्थगुरोरुपलक्षणत्वात् गुर्वस्तादावपिप्रथमकर्तव्यसुवर्णादिधारणनिषेधइत्यर्थः अथसिंह-
स्थगुरोःप्रकारत्रयेणपरिहारमुपेंद्रवज्रयाह सिंहेगुराविति अत्रप्रथममंशभेदेनपरिहार सिंहस्थे

सिंहेगुरौसिंहलवेविवाहोनेष्टोथगोदोत्तरतश्चयावत् भागीरथीयाम्यतटंचदोषो
नान्यत्रदेशेतपनेपिमेषे ४१ गुरौसत्यपिसिंहांशेसत्यंशत्रयोदशांशे १३ २० भ्योनंतरंसत्यं
शमंशत्रयम् ३ २० पंचमोनवांशःसिंहांशस्तत्रगुरौसतिविवाहोनेष्टः सिंहस्थशौतुसिंहांशेयदा
भवतिवाक्यति सर्वदेशेष्वयंत्याज्योदंपत्योर्निधनप्रदइति राजमार्तंडोक्तेः अतोवशिष्टांशेषुविवाहा
दिशुभंभवतीत्यर्थः सिंहेपिभगदैवत्येगुरौपुत्रवतीभवेत् अत्यंतसुभगासाध्वीधनधान्यसमृद्धि
त्यादितत्रैवोक्तेः अथदेशभेदेनद्वितीयपरिहारउच्यते अथगोदोत्तरतः गोदावरीनदीतस्याउत्तर
तीरमारभ्यभागीरथीयाम्यतटंदक्षिणकूलंमर्यादीकृत्यगोदावरीगंगांतरालवर्तीयोदेशस्तत्रसिंह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थगुरुर्वर्ज्य नान्यदेशे ज्ञेयः गोदावर्युत्तरतीरेयावद्भागीरथीतटम् पाप्यं तत्रविवाहोनेष्टः सिंह स्थेदेवपतिपूज्ये अर्थाद्गोदावरीदक्षिणतटेभागीरथ्युत्तरदेशेचसिंहस्थगुरुदोषोनास्ति यदि ष्टः भागीरथ्युत्तरेकूलेगौतम्यादक्षिणेतथा विवाहोव्रतबंधोवासिंहस्थेज्येनदुष्यतीति अथवि वाहव्रतबंधावेवननिषिद्धौ आभ्यामन्यानिशुभकर्माणिनिषिद्धान्येव अपवादस्यसंकोचाश्रयत्वा दुपलक्षणायोगात् अथतृतीयःपरिहारः तपनेसूर्येमेषराशौविद्यमानेसतिवासिंहस्थगुरोर्दोषो नास्ति यतिर्निबंधे मंगलानीहकुर्वीतासिंहस्थोवाकृपतिर्यदा भानौमेषगतेसम्यगित्याहुः शौन-

मघादिपंचपादेषुगुरुः सर्वत्रनिंदितः गंगागोदांतरंहित्वाशेषांघ्रिषुनदो षकृत् ५० मेषेर्कमनुव्रतोद्वाहोगंगागोदांतरेपिच सर्वःसिंहगुरुर्वर्ज्यः कलिंगगौडगुर्जरे ५१ रेवापूर्वेगंडकीपश्चिमेचशोणस्योदग्दक्षिणेनीच ईज्यः

कादयइति ५९ सिंहराशिगतगुरुनिषेधवाक्यानांव्रतिप्रसवाक्यानांचनिर्गलितार्थ मनुष्टुप्पद्यत्रयेणाह मघादिपंचपादेषुइत्यादि ५० मेषेर्केइत्यादिच ५१ अथमकरस्थगुरोः प्रकारद्वये नपरिहारंशास्त्रिकाह रेवापूर्वेइति रेवायाः नर्मदायाः पूर्वदेशेगंडकीनद्याः पश्चिमेविभागेशोणन दस्यउत्तरदक्षिणभागेनीचईज्यः मकरस्थगुरुर्नवर्ज्यः ज्ञेयः नर्मदापूर्वभागेतुशोणस्योत्तरदक्षिणे गंडक्याःपश्चिमेभागेमकरस्थोनदोषभाक् अन्यदेशेषुनिषिद्धस्तत्रनिषिद्धदेशानाह अवंतिअ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यंमकरस्थगुरुःकोंकणदेशेगौडदेशेसिंधुदेशेचशुभकृत्येषुकर्ज्योनिषिद्ध उक्तंच मागधेगौडदेशेचसिं धुदेशेचकोंकणे ब्रतंचूडांविवाहंचवर्जयन्मकरेगुरौ एभ्योन्यदेशेषुमंगलमर्थान्मध्यमम् अथ लुप्तसंवत्सरदोषमाह गोजात्येतिगोवृष अजोमेष अंत्योमीनःकुंभः प्रसिद्ध एभ्यइतरभे अन्यराशौमिथुनादौ अतिचारगोगुरु महातिचारेणसमागतःसन्पूर्वराशिंयद्यदिनैः व र्जितः यदापूर्वराशिंनोएतिभक्तराशिंनोएतिनागच्छतितदाविलुप्ताब्द लुप्तसंवत्सरउच्यते सलुप्तसंव त्सरः शुभकृत्येअतिनिंदितःनिषिद्ध उक्तंच अतिचारगतोजीवस्तंराशिंनैतिचेत्पुन लुप्तः संवत्सरो

कर्ज्योनायंकोंकणेमागधेचगौडेसिंधौवर्जनीयःशुभेषु गोजांत्यकुंभेतरभे तिचारगेनोपूर्वराशिंगुरूरेतिवर्जितःतदाविलुप्ताब्द इहातिनिंदितःशुभेषुरे वासुरनिम्नगांतरे

त्येयोगर्हितःसर्वकर्मसुयदा तु गोजांत्यकुंभेषुपूर्वराशेःसका शान्महातिचारेणायातिपूर्वराशिंचनैतितदालुप्तसंवत्सरदोषः गुरुः मेषेवृषेमिथुनेकुंभेयद्यतीचा रेणगुरुःतत्रकालोपःस्यादित्याहभगवान्यम दशमासभोगानंतरंअतीचारेपिलुप्ताब्ददोषोना स्ति उक्तंच मासान्दशैकादशवाप्रयुज्यराशेर्यदाराशिमुपैतिजीवः भुक्तेन पूर्वंचपुनस्तथापिनलुप्त संवत्सरमाहुरार्याः पूर्वंसशिभेदेनपरिहारमुक्तेदानींदेशभेदेनपरिहारमाह सलुप्तसंवत्सरोरेवान र्मदा सुरनिम्नगाभागीरथीतयोर्नद्योरंतरेतिनिषिद्ध उक्तंच लुप्ताब्ददोषोब्रह्मतेनमध्येसोमोऽ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यायाःसुरनिम्नगायाःदक्षिणभागेसमसप्तकदोषोविवाहेवर्जितःसमदृष्टिर्गुरोःशुक्रेतन्मासेतुप्रयत्न
तःविवाहादिनंकुर्वीतनर्मदातीरउत्तरे ॥ अथवास्पष्टसिद्धमुपलक्षयन्नाह पादोनेति रेखाभूमध्यरेखा
पुरीराक्षसीदेवकन्याथकांचीत्याद्युक्तसंक्रांतआरभ्यसुमेरुमस्तकदत्तसूत्राधोवर्त्तिदेशास्तेमध्यरेखा
शब्देनोच्यंतेयस्मिन्देशेवारप्रवृत्तिश्चिकीर्षितासदेशोरेखातआक्पश्चिमेयावंतियोजनानिभवंति
तानिस्वचतुर्थांशोनानिकृत्वातावद्भिःपलैरित्यर्थःपंचदशघटिकायुक्तोनाकार्यायदामध्यरेखातःपश्चि
ग्योजनानितदायुक्तायदातुप्राग्योजनानितदोनाकार्याअथयद्दिनेवारप्रवृत्तिरिष्टातद्दिवसेयद्दिनार्धे

पादोनरेखापरपूर्वयोजनैःपलैर्युतोनास्तियथोदिनार्धतऊनाधिकास्तद्दिवसे द्वयैःपलैरूर्ध्वंतथाधोदिनपप्रवेशनम्

चरपलसुतहीनानाडिकापंचचंद्राइत्यादिप्रकारसिद्धम्तस्माद्दिनार्धात्संस्कारविशिष्टपंचदशऊ
नाधिकाश्चेद्द्वंतिनदातद्दिवसेद्वयैःपलैर्दिनार्धस्यसंस्कारविशिष्टपंचदशानांचयद्दिवसंतरंतत्संबं
धेनोत्थैरूत्पन्नैःपलैरूर्ध्वंतथाधोदिनपस्यवारस्यप्रवेशःयदासंस्कारविशिष्टपंचदशदिनार्धतश्चेदूना
स्युस्तदासूर्योदयादूर्ध्ववारप्रवृत्तिःयदासंस्कारविशिष्टपंचदशदिनार्धतोभ्यधिकास्तदासूर्योदयात्पा
क्वारप्रवृत्तिरित्यर्थःयथावाराणसीरेखाभिधानात्कुरुक्षेत्रात्याक्त्रिषष्टियोजनानि ६१ पादेनच
तुर्थांशेनोनानि ॥ ३ प्राग्योजनत्वादतःपलैरूनाःपंचदशघटिकाजाताः १४ १३ दिनार्धम् १६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३० अस्मान्न्यूनाइतिविवरम् २ १७ तेनाभिर्घटीभिःसूर्योदयादूर्ध्वंवारप्रवृत्तिःयदादिनार्धम् १२ ५७
अस्मादधिकाइतिविवरम् ० २३ एताभिर्घटीभिःसूर्योदयात्प्राक्वारप्रवृत्तिरित्यर्थः अथवारप्रवृत्ति
निमयोजनपुरःसरंकालहोरामनुष्टुभाह वारादेरिति वारप्रवृत्तिप्रकारेणयस्मिन्क्षणेवारप्रवृत्तिर्जा
तातत इष्टघट्योर्द्विगुणाःकार्याःताद्दिस्थानेस्थाप्याःतत्रपंचभिर्भक्तेयल्लब्धंतत्साज्यम् पच्छेषंतद्वि
गुणघटीमध्येवर्जितंकार्यम् एवंविधाघट्यःसैकाएकयुक्ताःकार्यास्ताभिस्तष्टाःअवशिष्टाःकालहोरे
शाःस्युःनेदिनपात्वारात्क्रमाद्गणनीयाःयथारविवारेइष्टघटिकाः ६ द्विगुणाः १२ पृथगक्षा ५ स-

वारादेर्घटिकाद्विघ्नाःस्वाक्षत्रिच्छेषवर्जिताःसैकास्तष्टानगैःकालहोरेशा
दिनपात्क्रमात् वारेप्रोक्तंकालहोरासकृतस्यधिष्ण्येप्रोक्तंस्वामिति
ष्ट्यंशकेऽस्य शेष २ वर्जिता १० सैका ११ नगैः ७ स्तष्टशेषं ४ रविवारेक्रमाद्गणनयाच
तुर्थोबुधस्तस्यहोरादित्यादि विनाहरंदाक्षे उदयमारभ्यहोराउक्ताःतत्कालार्कन्यूनलग्नांशापि
डोनक्त पंचक्षोणिभिर्भक्तहोराभास्वच्छुक्रज्ञेंदुसौरेज्यभौमासंख्यायेरन्वारतस्तेतदीशाश्च अन
योर्विषयविभागोवसिष्ठसंहितायां वारप्रवृत्तिविज्ञानंक्षणवारार्थमेवहि अखिलेषन्यकार्येषुदिना
दिरुदयाद्ग्रहेत् क्षणवारःकालहोरारूपःतदर्थंवारप्रवृत्तिः अन्यकार्येषुदिक्शूलादिषुतिथिवार
प्रयुक्तेषुवायोगेषुचसूर्योदयादेववारोग्राह्यः अथकालहोरामनुष्टुभाह वारेप्रोक्तमि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति॰ यत्कर्मयस्मिन्वारे प्रोक्तंतद्दिनस्थसदोषत्वादत्यावश्यककृत्येतस्यकालहोरायांकर्त्तव्यम् नारदः यस्यखेटस्ययत्कर्मवारे प्रोक्तंविधीयते यद्दस्यक्षणवारेपितस्यतत्कर्मसर्वदा अत्रकेचित्यस्यवारे कर्मप्रोक्तंतस्यबलिनोनवांशेसूर्यश्चंद्रोवातेतिष्ठतितदातत्कर्मकार्यमित्याहुरन्ये यस्ययद्दिने कर्मयत्किंचिदभिधीयते यस्यांशसंस्थितेचंद्रे सूर्येवातद्विधीयतेऽपि अथाधिष्ण्येनक्षत्रेयत्कर्मवस्त्रपरिधानादिकमुक्तंतदत्यावश्यकत्वेनास्याधिष्ण्यस्यस्वामितिथ्यंशकेस्वामिनोमुहूर्त्तेकुर्यात् नारदः यस्मिन्नृक्षेतुयत्कर्मनिखिलंकथितंचयत्नतद्दैवत्येतन्मुहूर्तेकार्ययात्रादिकंतथेति मुहूर्तस्वामिनोवि

कुर्याद्दिक्शूलादिचिंत्यंक्षणेषुनैवोल्लंघ्यःपारिघश्चापिदंडः मन्वाद्यास्त्रितिथीमधौतिथिरवीऊर्जेशुचौदिक्कृतिथीज्येष्ठेत्येचतिथिस्तिषेनवतपस्यश्वाःसहस्येशिवाः

वाहप्रकरणेवक्ष्यंते क्षणेषुमुहूर्त्तेषुदिक्शूलाद्यंदिक्शूलंवारशूलं नक्षत्रशूलंचिंत्यंविचारणीयं एवंपारिघोदंडः क्षणेषुमुहूर्तेषुनैवोल्लंघ्यदिक्शूलादिकमखिलंपारिघदंडादिविज्ञेयमितिवसिष्ठोक्तेः अथमन्वादीन्युगादींश्चशार्दूलविक्रीडितेनाह मन्वाद्याइतिसितेशुक्लपक्षेएतामन्वादयोचैत्रेत्रितिथीतृतीयापौर्णिमेऊर्जेकार्तिकेतिथिरवीपूर्णिमाद्वादश्यौशुचौआषाढेदिक्कृतिथीदशमीपूर्णिमेज्येष्ठेअंत्येफाल्गुनेचतिथिःउभयत्रपूर्णिमैवदर्शेआश्विनेनवमीतपसिमाघेअश्वाःसप्तमीसहस्येपौषेशिवाएकादशीभाद्रपदेअग्निस्तृतीयालुइतिपुनः नभसःश्राव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णस्यकृष्णपक्षेअमावास्याअष्टमी अर्थयुगाद्याश्चत्वारः बाहुलराधयोः बाहुलःकार्त्तिकराधो वैशाखस्तयोश्चकृष्णपक्षेगोग्नीनवमीतृतीयेयुगादि कार्तिकशुक्लनवमीकृतयुगादि वैशाखशुद्धतृतीयात्रेतादि भाद्रमाघासितेमदनदर्शौयुगादि मदनरत्नयोदशीदर्शोअमावास्याभाद्रकृष्णत्रयोदशीकलियुगादि माघकृष्णअमावास्याद्वापारादि अत्रशुक्लादयोमासाग्राह्याः कार्तिकेशुक्लनवमीत्रादिः कृतयुगस्यसात्रेतादिर्माधवेशुक्लतृतीयापुण्यसंमिताकृष्णापंचदशीमाघेद्वापारादिरुदीरिताकल्पादिःस्यात्कृष्णपक्षेनभस्येवत्रयोदशीतिनारदोक्तेः॥ ५७॥ इतिश्रीदैव-

भाद्रेग्निश्चसितेत्वमाष्टनभसःकृष्णेयुगाद्याःसितेगोग्नीबाहुलराधयो
र्मदनदर्शौभाद्रमाघासिते ५७ ७ ७ अथनक्षत्रप्रकरणं॥
नासत्यांतकवन्हिधातृशशभृद्रुद्रादितीज्योरगाऋक्षेशाःपितरोभगोर्य
मरवीत्वष्टासमीरःक्रमात्

ज्ञानंतस्कृतदैवज्ञविरचितायांस्वकृतमुहूर्तचिंतामणिटीकायांप्रमिताक्षरायांशुभाशुभप्रकरणंसमाप्तम्॥ ७ ७ ७ ७
॥ अथनक्षत्रप्रकरणंव्याख्यायते॥ ॥तत्रादौनक्षत्रस्वामिनःशार्दूलविक्रीडितेनाह नासत्येति एतेनासत्यांतकादयऋक्षेशानक्षत्रेशाःक्रमात्स्युः॥ अथध्रुवनक्षत्राणिनरूपयंश्चानुष्टुभा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह उत्तरात्रयेति उत्तरात्रयंरोहिणीचैतानिनक्षत्राणिरविवारश्चध्रुवसंज्ञानिस्थिरसंज्ञानिचेतिसंज्ञा द्वयम् एवमुत्तरत्रापिव्याख्येयम् ध्रुवनक्षत्रेषुस्थिरादिकर्मकार्यम् आदिग्रहणान्मृदुनक्षत्रोक्तंग्राह्यम् वसिष्ठः मृदुरुद्रदेवकथितान्यपिस्थिररुद्रदेवतानिकार्याणिइति २ अथचरभानितत्कृत्यंचानुष्टुभाह स्वात्यादित्येति आदिशब्दात्लघुनक्षत्रोक्तमपि ३ अथोग्रनक्षत्राणिचानुष्टुभाह पूर्वत्रयमिति

शक्राग्नीरवसुमित्ररुद्रनिर्ऋतिक्षीराणिविश्वे विधिर्गोविंदोवसुतोयपाजचरणा हिर्बुध्नपूषाभिधाः १ उत्तरात्रयरोहिण्योभास्करश्चध्रुवंस्थिरम् तत्रस्थिरंबी जगेहशान्त्यारामादिसिद्धये २ स्वात्यादित्येश्रुतेस्त्रीणिचंद्रश्चापिचरंचलम् तस्मिन्नाजादिकारोहोवाटिकागमनादिकम् ३ पूर्वात्रयंयाम्यमघेउग्रंक्रूरंकुज स्तथा तस्मिन्घातान्निशाख्यानिविषशस्त्रादिसिध्यति ४ विशाखाग्नेयभे सौम्योमिश्रंसाधारणंस्मृतम् तत्राग्निकार्यमिश्रंचवृषोत्सर्गादिसिद्धये ५ ह स्ताश्विपुष्याभिजितःक्षिप्रंलघुगुरुस्तथा तस्मिन्यण्यरतिज्ञानभूषाशिल्पक लादिकम् ६ आदिशब्दाद्दारुणनक्षत्रोक्तमपि ७ अथमिश्राण्यनुष्टुभाह विशाखेति आदि ग्रहणादुग्रभोक्तमपि ८ अथलघुनक्षत्राण्यनुष्टुभाह हस्तेति शिल्पंवर्धकिविकृत्यादिकलानृत्या दिकाश्चतुषष्टिः आदिशब्दाच्चरभोक्तमपि ९ ७ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथमृदुनक्षत्राण्यनुष्टुभाह मृगांत्येति ॥ अथनारुणभान्यनुष्टुभाह मूलेति अभिचारः कर्माणां भयंकरः कृत्यमारणादि पशुद्रमः पशुशिक्षा आदिशब्दात् बंधनादिकंसंग्रहः ॥ अथाधोमुखोर्ध्वमुखतिर्यङ्मुखनक्षत्राणिइंद्रवज्रयाह मूलाहीति मूलं अहिः आश्लेषा मिश्रंकृत्तिकाविशाखे उग्रंपूर्वात्रयमघाभरण्य एतानिनवभानि अधोमुखानिज्ञेयानि आर्द्रापुष्य श्रवणत्रयंरोहिण्युत्तरात्रयंचनवभान्यूर्ध्वमुखानि मैत्राणिचित्रारेवत्यनुराधाः हस्तस्वातीपुनर्वसूज्येष्ठाअश्विनीएतानिनवभानितिर्यङ्मुखा

मृगांत्यचित्रामित्रर्क्षंमृदुमैत्रंभृगुस्तथा ॥ तत्रगीतांबरक्रीडामित्रकार्यविभूषणम् ॥ मूलेंद्राद्रीहिभंसौरीनारुणंदारुणसंज्ञकम् ॥ तत्राभिचारघातोग्रभेदाःपशुद्रमादिकम् ॥ मूलाहिमिश्रोग्रमधोमुखंभवेदूर्ध्वास्यमार्द्रेज्यंहस्त्रित्रयंध्रुवम् ॥

नि एषुअधोमुखोर्ध्वमुखतिर्यङ्मुखेषुभेषुर्दृशंकृत्यंअधोमुखोर्ध्वमुखतिर्यक्मुखकृत्यं सत्भवति नारुडपुराणे भरणीकृत्तिकाश्लेषामघामूलविशाखिकाः तिस्रः पूर्वास्तथाचैव अधोवक्त्राः प्रकीर्त्तिताः एषुवापीतडागादिकूपभूमितृणानिच देवागारस्यखननंनिधानखननंतथा खाणितंज्योतिषारंभंखनीबिलप्रवेशनम् कुर्यादधोगतान्येवकार्याणिवृषभध्वज रोहिण्यार्द्रातथापुष्योधनिष्ठोत्तरात्रयम् मारुणंश्रवणंचैवनवचोर्ध्वमुखास्तथा एषुराज्याभिषेकंचपट्टबंधंचकारयेत् ऊर्ध्वमुखा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्युच्छितमुखानिसर्वाण्येषुचकारयेत् रेवतीचाश्विनीचित्रास्वातीहस्तःपुनर्वसू अनुराधामृगोज्येष्ठा एतास्तिर्यङ्मुखाःस्मृताः गजोष्ट्राश्वबलीवर्ददमनंमाहिषस्यच बीजानांवपनंकुर्याद्गमनागमनादिकम् चक्रयंत्ररथादीनांनौकादीनांप्रवाहणम् पार्श्वेषुयानिकार्याणिकुर्यादेषुचतान्यपि ध्रुवंचनक्षत्रमिति शेषविहितानांकर्मणामावश्यकर्तव्यलेमुहूर्तालब्धौसत्यांकर्मण अधोमुखाद्याकारंज्ञात्वातत्तन्नक्षत्रेषुतानिकर्माणिकार्याणियानिचसर्वथानोक्तानिबिलप्रवेशादीनितान्येवनक्षत्रेषुकार्याणीत्येतदर्थमुक्तम् ९ अथप्रवालादिधारणमुहूर्तवसंततिलकेनाह पौष्णाध्रुवेति रेवत्यादिनक्षत्रेषुतथारिक्तानि

तिर्यङ्मुखंमैत्रकरानिलादितिज्येष्ठाश्विनीदृशरूत्यभेषुसत् ९ पौष्णध्रुवाश्विकरपंचकवासवेज्यादित्येप्रवालरदशंखस्फवर्णवस्त्रम् धार्यंविरिक्तशनिचंद्रकुजेन्हिरक्तंभौमेभ्रवादितियुगेस्फमगानदध्यात् १०

थिशनिचंद्रभौमवर्जितेऽन्हिदिवसेप्रवालंविद्रुमंशंखंशंखवलयादिवस्त्रंश्वेतम् एतानिधार्याणिरक्तंमंजिष्ठादिरंगेनरंजितंवस्त्रंभौमवारेपिधार्यम् अथस्फमगासभर्तृकाभ्रवादितियुगेरोहिण्युत्तरात्रयेषु अदितियुगेपुनर्वसौपुष्येचप्रवालादिकंनदध्यात् क्वचिच्छतातारायांस्नानमपिनिषिद्धम् उक्तंच रोहिणीगुरुपुनर्वसूत्तरेयाबिभर्त्तिनववस्त्रविभूषणम् स्नानयोषिदवलंबतेपतिंस्नानमाचरतिवारुणेपियाइति ११ अथनवधाविभक्तस्यवस्त्रस्यदग्धादिदोषेशुभाशुभफलंशार्दूलविक्रीडितेनाह व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रत्नाणामिति वस्त्राणांनवभागाः कार्याः कोणचतुष्टयेअमरादेवाःस्थाप्याः राक्षसामध्यगतांशगता ज्ञेयाः नराःदशासहितेपाशेचपुनर्मध्ययोरंशयोर्ज्ञेयाः तत्रचेद्रक्षोंशेनवतरेनूतनेवस्त्रेदैवाद्दग्धेअ ग्निस्पृष्टे स्फुटितेपाषाणाद्याघातादिभिर्निहते पंकेनकर्दमेन आदिशब्दात् गोमयादिभिरुपहते सतितद्वस्त्रंनसत्शुभफलजनकंनभवतीत्यर्थः नृसुरांशयोः एवंवस्त्रदाहादिकेसतिशुभंकल्याणंस्या त् अथसर्वांशकेराक्षसमनुष्यदेवांशकेषुप्रांततः प्रांतभागेअसदनिष्टफलगमकम् इदंसर्वशय्यापा दुकास्वपिज्ञेयम् श्रीपतिः कज्जलकर्दमगोमयलिप्तेवासस्मिदग्धवतिस्फुटितेचचिंत्यमिदंनवधाविहि

वस्त्राणांनवभागकेषुचचतुःकोणेमरा राक्षसामध्यत्र्यंशगतानरासुरसद् शेपाशेचमध्यांशयोः दग्धेवास्फुटितेवरेनवतरेपंकादिलिप्तेनसद्रक्षोंशे नृसुरांशयोःशुभमसत्सर्वांशकेप्रांततः ११

तेस्मिन्निष्टमनिष्टफलंचसुधीभिः अत्रराक्षसांशेध्वजछत्रादिसदृशीछेदाकृतिःशुभफलाज्ञेया देवमनुष्यांशेपिकाकोलूकसदृशीछेदाकृतिरशुभफलदा कश्यपः शंखवल्कांबुजच्छत्रध्वजतोर णसन्निभा श्रीवत्ससर्वतोभद्रनद्यावर्तगृहोपमा वर्धमानस्वस्तिकेभमृगकूर्मझषाकृतिः छेदाकृ तिर्दैत्यभागेप्यायुरर्थप्रदानृणाम् खरोष्ट्रोलूककाकादिजंबूकश्वपृकोपमा त्रिकोणसूर्पाकृतयोदे वभागेप्यशोभनाः निंदितंवसनंदद्याद्विजेभ्यःस्वर्णसंयुतम् आशिषोवाचनंकृत्वालब्ध्वद्रव्यंचधार

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येदिति ११ अत्रक्वचिद्दुष्टदिनेपिवस्त्रपरिधानमनुष्टुभाह विप्राज्ञयेति धिष्ण्येनक्षत्रेवारादौ वारतिथियोगादौव्यतीपातभद्रादिदुष्टयोगेनिंद्येपि यद्वस्त्रं ब्राह्मणानुज्ञयातथोद्वाहेराज्ञासंतोषेणार्पितंदत्तंतद्वस्त्रंधार्यमितिबुधाजगुः १२ अथलतापादपारोपणराजदर्शनमद्यगोविक्रयमुहूर्तानूशार्दूलविक्रीडितेनाह राधामूलेति राधाविशाखाएतद्वादिचतुर्दशनक्षत्रैर्लतानांवल्लीनांपादपानांवृक्षाणांचारोपोवापः कार्यः अथराजदर्शनम् ध्रुवमृदुक्षिप्रश्रवोवासवैःत्रयोदशभिःकार्यम् अथमद्यंमद्यारंभः तीक्ष्णोग्रांबुपभेषुनवनक्षत्रेषुउदितःकथितः अथगवांक्रयोमूल्येनपरस्माद्ग्रहणम्

विप्राज्ञयातथोद्वाहेराज्ञाप्रीत्यार्पितंचयत् निंद्येपिधिष्ण्येवारादौवस्त्रंधार्यंजगुर्बुधाः १२ राधामूलमृदुध्रुवर्क्षवरुणक्षिप्रैर्लतापादपारोपोथोनृपदर्शनंध्रुवमृदुक्षिप्रश्रवोवासवैः तीक्ष्णोग्रांबुपभेषुमद्यमुदितंक्षिप्रांत्यवन्हींदुभादित्येंद्रांबुपवासवेषुहिगवांशास्तःक्रयोविक्रयः १३ विक्रयोमूल्यग्रहणपूर्वकंदानम् क्षिप्रांत्यवन्हींदुभादित्येंद्रांबुपवासवेषुहिनवनक्षत्रेषुशास्तःप्रशस्तःअत्रभीमपराक्रमेणपंचदशभान्यभिहितानि हस्तेनुराधात्रितयेसपौष्णेमृगेचपूर्वाश्विविशाखभेषु पुष्येधनिष्ठादितयेदितीशेगवांक्रयंविक्रयमामनंतीति १३ अथपशूनांरक्षासुहूर्तेस्थितिनिवेशनिषेधमुहूर्तेचेंद्रवज्त्रयाह लग्नेशुभेशुभस्वामिकेलग्ने अशुभसंयुतेशुभपापाक्रांतेशुभावरहितेसतिपशूनांरक्षारक्षणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रवेशादिकंचसत् नथास्वाययोनिनक्षत्रेचरभेचसत्यथाश्वानांयोनिभंअश्विनीशततारके तत्रच-
तुष्पदानांरक्षाशस्ता तीक्ष्णेपशूनांदमनंवरंस्यात्पशुपोषणमितिवचनात् अथरिक्ता ४ ९ १४ष्टमी
८ दर्शोमावास्या कुजोभौमः श्रवः श्रवणम् श्रवाण्युत्तरात्रयरोहिण्यः स्वाष्ट्रंचित्राएषुपशूनांयानंगृ
हाद्बहिर्नि.सारणंस्थितिर्गोष्ठादिवेशनंनसत् शुभंन व्यवहारोच्चये पूर्वात्रयेधनिष्ठेंद्रपौष्णेसौम्य
विशारवयोः आश्लेषायामथाश्विन्यांयात्रासिद्धिश्चतुष्पदामिति १४ अथौषधसूच्योर्मुहूर्तमंदाक्रां
तयाह भैषज्यंसदिति भैषज्यंऔषधंप्रारब्धंभक्षितंचसत् लघुमृदुचरनक्षत्रेमूलेचद्यंगलग्नेहिस्वभा

लग्नेशुभेचाष्टमशुद्धिसंयुतेरक्षापशूनांनिजयोनिभेचरे रिक्ताष्टमीदर्श
कुजश्ववोध्रुवस्वाष्ट्रेषुयानस्थितिवेशनंनसत् १५ भैषज्यंसल्लघुमृदुचरे
मूलभेद्यंगलग्नेशुक्रेंद्वीज्येविदिचदिवसेचापितेषांरवेश्च

वराशिषुमिथुनकन्याधनुर्मीनेषुलग्नगतेषुसत्सुशुक्रेंद्वीज्यबुधेषुहिस्वभावलग्नस्थेषुसत्सुचपुन-
स्तेषांशुक्रेंद्वीज्यबुधानांरवेश्चदिवसेवारे सतिथौरिक्तामारहितंतिथौभैषज्यंसत् शुभंस्यात् दीपि
कायाम् द्यंगोदयेगुरुबुधेंदुसितेप्रशस्तेतेषांरवेश्चसुविधौसुतिथौसुयोगे भैषूग्रपन्नगविशारव
शिवेतरेषुजन्मर्क्षविष्टिरहितेषुकृतःशुभायदृति अथरिःफद्युनमृतिगृहेलग्नात् द्वादशसप्ताष्टमगृ
हेषुशुद्धेषुशुभपापयहरहितेषुसत्सुऔषधंतुवर्षफलप्रश्नादिनाआयुर्निश्चयेचसत् द्यूनशत्रुनिध

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नव्ययशब्दौसद्ग्रहेषुनितरांबलवत्कआयुषश्चहितकारिणियोगेकीर्तितानियतमौषधसेवेनिश्चीपतिभट्टोक्तेः अथजनेर्भेजन्मनक्षत्रेनोभैषज्यंसत् जन्मनक्षत्रगश्चंद्रः प्रशस्तःसर्वकर्मसु क्षौरभेषजवादाध्यकेतनेषुविवर्जयेदितिवचनात् अथसूचीकर्मसूच्याः संबंधिकर्मघटनसीवनादि अदितिवस्क भत्वाष्ट्रमित्राश्विपुष्यनक्षत्रेसत्स्यात् व्यवहारोच्चये अदितिर्वासवंत्वाष्ट्रमैत्रभेंदववाजिनः सूचीकर्म तनुत्राणमेभिर्ऋक्षैः प्रशस्यतइति १५ अथान्यदनुष्टुभाह ऋयर्क्षेइति ऋयर्क्षेवक्ष्यमाणऋयनक्षत्रेविऋयोनकार्यः तथाविक्रयनक्षत्रेक्रयोपिनकार्यः दीपिकायाम् यमाहिशक्राग्निविशाखपूर्वानेष्टाःक्रये

शक्रेरिःफल्गुनमृतिगृहेसत्तिथौनोजनेर्भेसूचीकर्माप्यदितिवस्कभेत्वाष्ट्रमित्राश्विपुष्ये १५ ऋयर्क्षेविक्रयोनेष्टोविक्रयर्क्षेक्रयोपिन पौष्णांबुपाश्विनीवानःश्रवश्चित्राक्रयेशुभाः १६

विक्रयणेनिशस्ताः पौष्णाश्विचित्राशतविष्णुवानाःशस्ताः क्रयेविक्रयणेनिषिद्धाइति ननुयदायेनक्रयऽकर्तव्यस्तदा अन्येनविक्रयः कर्त्तव्यस्तत्रक्रयविक्रयनक्षत्राणांमहाभेदादुभयविधमुहूर्त्तानुपपत्तिःउच्यते विक्रेतायदामुहूर्त्तंविक्रयार्थंगृह्यतेतदावस्कृपृथक्क्रियतेतत्कर्मविक्रयशब्दवाच्यम् यदाक्रयिणाक्रयार्थंमुहूर्तःप्रार्थ्यतेतदाविक्रेत्रेमूल्यद्रव्यंदत्वाऽथकृतंविक्रेतृवस्कृयात्यंतत्क्रयशब्दवाच्यमितिमत्वायथाकथंचित्समाधेयम् तत्रक्रयमुहूर्त्तः रेवती

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शततारा अश्विनीस्वातीश्रवणाचित्राएतानिभानिक्रयेशुभानिविक्रयणेनिषिद्धानिच १६ अथविक
यविपण्योर्मुहूर्तशार्दूलविक्रीडितेनाह पूर्वाद्वीशेतिद्वीशंविशारवा पूर्वादिनक्षत्रेषु केंद्रेषुप्रथमचतु
र्थसप्तमदशमेषु द्वितीयेकोणेनवपंचमेशुभैःसद्भिःषट्त्र्यायेषुपापग्रहैःसद्भिः घटतनुकुंभलग्नंवि
नात्यल्कासत्तिथौरिक्तामारहितेतिथौविक्रयःसन्शुभोज्ञेयः अथविपणिः पण्यवीथिकागृहेस्थित्वा
क्रयविक्रयार्थंकर्मरिक्तातिथिभौमवारकुंभलग्नानिवर्जयित्वान्येषुतिथिवारलग्नेषुमित्राणिमृग
रेवतीचित्रानुराधाः ध्रुवाणिरोहिण्युत्तरत्रयंक्षिप्राणिहस्ताश्विपुष्याः एतैर्भैर्लग्नेचंद्रस्थितेमूर्तौचंद्रे

पूर्वाद्वीशेशुभानुसार्पयमभेकेंद्रद्विकोणेशुभैः षट्त्र्यायेष्वशुभैर्विनाघटतनुं
सन्विक्रयःसत्तिथौ रिक्ताभौमघटान्विनाचविपणिर्मित्रध्रुवक्षिप्रभैर्लग्नेचंद्र
सितेव्ययाष्टरहितैःपापैःशुभैर्न्यायवे १७ क्षिप्रान्यर्कसितेंदुमरुज्जलेशादित्ये
ष्वरिक्तारदिनेप्रशस्तम् सितेचसत्तिथ्ययाष्टरहितैःपापग्रहैःसद्भिःशुभैर्न्यायवेद्वितीयैका
दशदशमेषुसद्भिर्विपणिःशुभास्यात् १७ अथाश्वगजमुहूर्तमिंद्रवज्रयाहक्षिप्रांत्येति क्षिप्रादिनक्ष
त्रेषुरिक्ताभौमव्यतिरिक्तदिनेचाभिलक्ष्यमश्वानांक्रयविक्रयशिक्षास्थानाभरणादिकार्यंप्रशस्तंस्यात्
श्रीपतिः पुष्यश्रविष्ठाश्विनसौम्यभेषुपौष्णानलादित्यकराद्ध्रुवेषु सवारुणर्क्षेषुबुधैःस्मृतानिसर्वाणि
कार्याणितुरंगमाणाम् अश्वारोहणेचक्रम् अश्वाकारंलिखेच्चक्रंसाभिजिद्वानिविन्यसेत् स्कंधेतु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूर्यभात्संचपृष्ठेचदशभानिच मुच्छेद्देस्थापयेत्सप्तभिस्तुष्यादेचतुष्टयम् उदरेविन्यसेत्पंचमुरवेद्देतु रगस्यच अर्थलाभोमुखेसम्यक्कवाजीनश्यतिचोदरे चरणस्थैरणेभंगःपुच्छेपत्नीविनश्यति अर्थसिद्धिर्भवेत्पृष्ठेस्कंधेस्कंधपतिर्भवेन्नृति अथविद्वान्ज्ञानामृदुक्षिप्रचरनक्षत्रेषुरिक्तामाभौमवर्जितदिनेचहस्तिकार्यंगजानांकार्यंक्रयविक्रयभूषादिकुर्यात् वसिष्ठः हस्तत्रयेसौम्यहस्त्रयेचपौष्णाद्येपुष्यपुनर्वसौच मैत्रेचसर्वाण्यपिकुंजराणांकर्माणिशस्तान्यखिलानियानीति १८ अथभूषणघटनमुहूर्तंशार्दूलविक्रीडितेनाह स्याद्भूषेति त्रिपुष्करदिनलक्षणंभद्रातिथिरविजेत्यादिनावक्ष्यति

स्याद्वाजिकृत्यंचथहस्तिकृत्यंकुर्यान्मृदुक्षिप्रचरेषुविद्वान् १८ स्याद्भूषाघटनं
त्रिपुष्करश्चरक्षिप्रध्रुवैरत्नयुक्ततीक्ष्णोग्रविहीनभैरविकुजेमेषालिसिंहेतनौ

एवंविधेत्रिपुष्करदिनेचरक्षिप्रध्रुवनक्षत्रेषुभूषाघटनमाभरणघटनंशुभंस्यात् वसिष्ठः क्षिप्रांचलचरऋक्षेरिक्तामावर्जितेषुदिवसेषु निखिलेष्वपिवारेष्वपित्रिपुष्करेभूषणंकार्यम् अथतद्भूषणं रत्नयुतंमाणिक्यादियुतंचेत्तदातीक्ष्णोग्रविहीनभंतीक्ष्णानिमूलज्येष्ठाआर्द्राश्लेषास्वाख्यानि उग्राणि पूर्वात्रयमघाभरण्यः एतद्व्यतिरिक्तेषुदशनक्षत्रेषुतथारविभौमवारेपिकार्यम् तथामेषवृश्चिकसिंहलग्नेषुच वसिष्ठः स्थिरसाधारणचरभेलघुमैत्रेषुर्ककुजवारे तेषामेवविलग्नेमाणिक्यमयभूषणंकार्यमिति कर्कवृषतुलालग्नेषुकार्यमित्यपिज्ञेयम् वसिष्ठः क्षिप्रमृदुध्रुवचरभेशशिसित

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योर्वासरेषुतल्लग्ने मुक्ताफलरजतमयंभूषणमखिलंमृद्भवंकार्यम् अथतीक्ष्णानिमूलज्येष्टार्द्रा श्लेषाः उग्राणिपूर्वात्रयभरणीमघा अश्विनीमृगो हिदैवंविशाखा दहनः हस्तिका एषुनक्षत्रेषुय दृतंशस्त्रंशुभंस्यात् अदितिर्वासवंलब्धामैत्रमैंदवंवाजिनः सूचीकर्मतनुत्राणमेभिर्नक्षैःप्रशस्यत इतिनक्षोच्चयोक्तेः अथस्रुवर्णरूप्यादिपात्रेभोजनमुहूर्तमाहवसिष्ठः लघुमैत्रध्रुवचरभेसितेंदु-बुधजीववारेषु हेमरजतादिभाजनभोजनमारोग्यामृतयोग्येषु इति १९ अथमुद्रापातनमुहूर्तवस्त्र क्षालनमुहूर्तंचस्त्रग्धराह मुद्राणामिति ध्रुवमृदुचरक्षिप्रसंज्ञकैर्नक्षत्रैः कृत्वाराज्यमुद्रांकितुस्रुवर्ण

तन्मुक्तासहितंचरध्रुवमृदुक्षिप्रेशुभेसत्तनौतीक्ष्णोग्राश्विमृगेहिदैवदहनेश स्त्रंशुभंधृतम् १९ मुद्राणांपातनंसत्स्रुवमृदुचरभक्षिप्रभेवीदुसौरेघस्रे पूर्णाजयास्त्र्येनचगुरुभृगुजास्तेविलग्नेशुभैःस्यात्

रूप्यादिनिष्पादनंमुद्रापातनमित्यच्यते टंकसालेतिभाषयावीदुसौरेघस्रेचंद्रशनैश्चरवर्जितवा रे तथापूर्णाजयास्त्र्ये पूर्णाःपंचमीदशमीपूर्णिमाः जयास्तृतीयाष्टमीत्रयोदश्यः एतास्तिथिषि त्यर्थः शुभंस्यात् तथागुरुशुक्रास्तेनशुभम् विलग्नेशुभैः लग्नेशुभग्रहैःसद्भिरित्यर्थः उक्तंच मृ दुध्रुवक्षिप्रचरेषुभेषुयोगेप्रशस्तेशनिचंद्रवर्ज्ये वारेतिथौपूर्णजयाख्येचमुद्रापतिष्ठाशुभदानरा णाम् गुर्वस्तेवासितास्तेवामुद्राणांघटनंक्वचित् क्रूरग्रहर्क्षेशलग्नेनकार्यंमूर्तिमिच्छता अथस्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेवस्कर्धनिष्ठा हयोश्विनी दिनकृत्हस्तः तस्मात्पंचकेहस्तचित्रास्वातीविशाखानुराधास्क आदि-
त्यंपुनर्वस्कः पुष्येवस्त्राणांक्षालनंरजकाधानार्थेदानंसत्शक्रभंस्यात् रिक्तापर्वाणिपूर्वोक्तानितिथि
प्रकरणे षष्ठीपितृदिनंश्राद्धदिनंएतेषुरक्तिज्ञेषुशनिबुधवारेषुकदापिवस्त्रक्षालनंनोकार्यम् २०
अथखड्गादिधारणंशय्याद्युपभोगमुहूर्तंचस्त्रग्धरयाह संधार्याइति विरिक्तेरिक्तावर्जितशुक्रबृह
स्पतिरविवारेतथामैत्रध्रुवलघुसंज्ञकनक्षत्रसहितपुनर्वसुज्येष्ठाविशाखानक्षत्रेषुकुंतादयःसंधा
र्याः कुंतोभल्लः वर्मकवचम् इषवोबाणाअस्यतेअनेनेतीषुसनंधनुः शरोबाणः कृपाणःखड्गः अ-

वस्त्राणांक्षालनंसद्दस्कहयदिनकृत्पंचकादित्यपुष्येनोरिक्तापर्वषष्ठीपितृदि
नरक्तिज्ञेषुकार्यंकदापि २० संधार्याःकुंतवर्मेषवसनशरकृपाणासिपुत्र्योवि
रिक्तेशुक्रेज्यार्केन्दुमैत्रध्रुवलघुसहितादित्यशक्रद्विदैवे सिपुत्री छुरिकासंनाहोपी

तिकेचित् तथास्थिरराश्येवृषसिंहवृश्चिककुंभारव्येलग्ने चंद्रेअपिशब्दात्लग्नेपिशुभग्रहदृष्टे
शुभैः केंद्रगैः सद्भिः कुंतादिधारणंहितंऋक्षोच्चये पुष्येचादितिचित्रपद्मतनयेशक्रोत्तरारेवतीवाजी
हस्तविशाखमित्रसहितेभानौगुरौभार्गवे कुंभेकीटगृहेवृषेमृगपतौचंद्रेशुभैर्वीक्षितेसंनाहंशरख
ड्गकुंतछुरिकाधार्यान्नृपाणांहितेति यत्तुदीपिकायाम् मूलेंदुपूर्वात्रयेयाम्यपित्र्यशक्राश्विसर्पानल
मूलिनश्च शस्त्रादिसंधारणमेषुकुर्यान्तिथौविलग्नेचशुभेशुभाहेइति तदासन्नयुद्धादिविषयम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ ध्रुवमृदुलघुनक्षत्रेषु हरौश्रवणे अंतकेमरण्यांआदित्येपुनर्वसौ एषुशैयासनादेः शय्या स्व
ट्वादिरूपाआसनंपीठंमृगत्वगादि आदिशब्दात्पादुकातेषामुपभोगः इष्टः हितः दीपिकायाम् मै
त्रेंदुपुष्ययमभादितिवज्रिचित्राहस्तोत्तरात्रयहरीज्यविधातृभानि एतेषतीवशयनासनपादुकानां
संभोगकार्यमुदितंमुनिभिःशुभाहेऽति २१ अथांधादिनक्षत्राणिशार्दूलविक्रीडितेनाह अंधा
क्षमिति धातारोहिणी विधिरभिजित् दहनभंकृत्तिका भगः पूर्वाफाल्गुनी अन्यत्स्पष्टम् २२अं
धादिनक्षत्राणांफलमनुष्टुभाह विनष्टार्थइति अंधनक्षत्रेषुविनष्टस्यापहृतस्यार्थस्यलाभःशीघ्रंभ

स्युर्लग्नेहिस्थिरारव्येशशिनिचशुभदृष्टेशुभैः केंद्रगैःस्याद्योगःशय्यासना
देर्ध्रुवमृदुलघुहर्यंतकादित्यइष्टः २१ अंधाक्षंवसुपुष्यधातृजलभद्वीशार्य
मांत्याभिधंमंदाक्षरविविश्वभेत्रजलपाश्लेषाश्विचाद्रंभवेत् मध्याक्षंशिवपित्र
जैकचरणत्वाष्ट्रेंद्रविध्यांतकंस्वक्षंस्वात्यदितिश्चवोदहनभाहिर्बुध्न्यरक्षोभगम्२२
विनष्टार्थस्यलाभोधेशीघ्रंमंदेप्रयत्नतः

वति मंदनक्षत्रेषुविनष्टार्थस्यप्रयत्नतोलाभो
भवति मध्येमध्यनक्षत्रेविनष्टार्थस्यदूरंस्वनगरादतीवदूरदेशेश्रवणंतदीयद्रव्यममुकेनहृतंअ
मुकस्थलेतिष्ठतीतिलोकवार्ताभवतिलब्धिस्तुनास्ति सुलोचननक्षत्रेषुश्वत्यासीनश्रवणमपिल
ब्धिरपिनभवतीत्यर्थः २३ अथधनप्रयोगेनिषिद्धनक्षत्राण्यनुष्टुभाह तीक्ष्णेति एतैस्तीक्ष्णादि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नक्षत्रैर्यद्द्रव्यंस्ववर्णादिदत्तंकालांतरंविनादत्तंनस्वसत्तापरित्यागेन निवेशितंस्वेष्टसमीपेप्रत्यया
र्थंस्थापितम् प्रयुक्तंकालांतररीतिपुरःसरंकस्मैचिद्दत्तं विनष्टंचौरादिनाहृतंस्वयमेववाङ्कित्य
क्तंद्रव्यंनिश्चयेनकदापिनाप्यतेनथाविष्यांभद्रायांपातेव्यतीपातेमहापातेवाहृतंद्रव्यंनाप्यते चका
राद्ग्रहणेपि वसिष्ठः ध्रुवोग्रसाधारणदारुणर्क्षेनिक्षिप्तमर्थंलथवाप्रनष्टम् चौरैर्हृतंदत्तमुपप्लवं
वाविष्यांचपातेननलभ्यतेतदिति अत्रेदमनुसंधेयम् तीक्ष्णमिश्रादिपंचदशभेषुमध्येरोहिण्यार्य

स्याद्दूरेश्रवणंमध्येश्रुत्यासीनसलोचने २३ तीक्ष्णमिश्रध्रुवोग्रैर्यद्द्रव्यंदत्तंनि
वेशितम् प्रयुक्तंचविनष्टंचविष्यांपातेचनाप्यते २४ मित्रार्कध्रुववासवांबुप
मघातोयात्यपुष्येदुभिःपापैर्हीनबलैस्तनौसुरगुरौज्ञेवाभृगौरवेविधौ आप्ये
सर्वजलाशयस्यखननंव्यंभोमधैःसेंद्रभैस्तैर्नृत्यंहिबुकेशभैस्तनुगृहेज्ञेज्ञरा-
शौशुभम् २५ मविस्वजलभद्राशेषुदत्तनिवेशितप्रयुक्तद्रव्यस्येवाप्राप्तिः चौरापहृतस्यस्वतो
गतस्यवाधनस्यलाभएवतेषांरोहिण्यादीनांमध्यमलोचनभेषुपाठसामर्थ्यादितिभावः २५ अथजलाश
यखननंनृत्यारंभयोर्मुहूर्तंशार्दूलविक्रीडितेनाह मित्रार्केति अनुराधादित्रयोदशनक्षत्रैः सद्भिःपापग्र
हैर्हीनबलैर्बलरहितैःसद्भिः तनौलग्नेसुरगुरौसतिबुधेवासति खेदशमेभृगौशुक्रेसति आप्येजल
राशौविधौसति सर्वतोयाशयानांवापीकूपतडागादीनांतोयाधाराणांखननंहितंस्यात् आप्यांबुपात्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पितृमित्रवसूत्तरार्केकेंद्रीज्यभेषुखननंसलिलाशयानामितिव्यवहारतत्वोक्तेः श्रीपतिः लग्नेजीवेज्ञे
थवादुर्बलैश्चक्रूरैःशुक्रेवापिमेषूरणस्थे आप्येचंद्रेसर्वतोयाशयानामारंभाःस्युःसिद्ध्येनिर्विक-
ल्पमिति अथनृत्यारंभः तैःगयुक्तैर्नक्षत्रैर्व्यंभोमयैः पूर्वाषाढामघारहितैःसेंद्रभैर्ज्येष्ठासहितैः मित्रार्क
ध्रुववासवांबुपांत्यपुष्येंदुज्येष्ठानक्षत्रैःनृत्यारंभः शुभःस्यात् शुभैर्हिबुकेचतुर्थस्थानेलग्नेज्ञेसति
अज्ञेचंद्रेज्ञराशौमिथुनकन्यास्थेसतीत्यर्थः २५ अथसेवकस्यस्वामिसेवायांमुहूर्तशालिन्याह क्षिप्रे

क्षिप्रमैत्रेविस्रितार्केज्यवारेसौम्येलग्नेऽर्केकुजेवारयुक्तेभे योनेर्मैत्र्यांराशिपो
श्चापिमैत्र्यांसेवाकार्यास्वामिनःसेवकेन २६ स्वात्यादित्यमृदुद्वित्वदेवगुरुभेक
र्णत्रयाश्वेचरेलग्नेधर्मस्फुताष्टशुद्धिसहितेद्रव्यप्रयोगःशुभः

नि क्षिप्राणिहस्ताभिजि
द्भिषुष्याः मैत्राणिमृगरेवतीचित्रानुराधाः एतेषुनक्षत्रेषुबुधशुक्रसूर्यगुरुवारे सौम्येशुभग्रहेलग्न
गेसति अर्केसौम्येवारयुक्तेदशमेएकादशेचस्थितेसतिसेवकेन स्वामिनःसेवाकार्यातत्रस्वामिसेवक
नक्षत्रयोन्योर्मैत्र्यांचपुनःराशिपोःसेव्यसेवकयोराशिस्वामिनोर्मैत्र्यांप्रीतौसत्यांसेवाकार्या अन्यथानका
र्या २६ अथद्रव्यप्रयोगऋणग्रहणमुहूर्तशार्दूलविक्रीडितेनाह स्वात्यादित्येति स्वात्याद्येकादशनक्ष
त्रेषुचरेमेषकर्कतुलामकराणामन्यतमेलग्नेधर्मनवमम् स्फुतःपंचमम् अष्टमंएतेषांशुद्धिःनवपंच

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयोः पापग्रहराहित्यं अष्टमेतुशुभपापराहित्यमेवंरूपाशक्तिस्तयासहितेलग्नेद्रव्यप्रयोगः ऋणदानं शुभंस्यात् भौमपरात्क्रमे मृदुपुष्याश्विनीचैवविशाखाश्रवणत्रयम् पुनर्वसौचशंसंतिधनादिनि धिवर्तनम् वर्तनमृणादिरूपेणदानम् मिश्रनक्षत्रत्वाद्विशाखायांनिषेधेप्राप्तेऋणदानेएवविधिरु तेनधादौनिधिदेव शुद्धेषुधर्मात्मजनैधनेषुचरेविलग्नेद्रविणप्रयोगइति अथारेभौमवारेऋणंनग्राह्य म् ऋणंभौमेनगृह्णीयान्नदेयंबुधवासरे ऋणछेदंकुजेकुर्यात्संचयंसोमनंदने अथतुविशेषे संक्र मदिनेसंक्रांतिदिवसे रुद्रोरुद्रियोगे करेहस्तनक्षत्रे अर्केन्दिरविवारेइतियत् तत्रापिनग्राह्यमित्येकं

नारेग्राह्यमृणंतुसंक्रमदिनेरुद्रोकरेर्केन्दियत्तद्दंशेषुभवेद्दणंनचबुधेदेयंकु दाचिद्दनम् २७ मूलद्वीशमघाचरभ्रुवमृदुक्षिप्रेर्विनार्कशनिपापैर्हीनबलै र्विधौजललवेशुक्रेविधौमांसले संबंधः यत्यस्माद्धेतोस्तद्दणंतद्दंशेषुऋणगृहीतुः कुलेषुभवेत् तत्पुत्रपौत्रादिभिरपिपरिहर्तुमशक्यमित्यर्थः हस्तेऽर्कवारेसंक्रांतौयद्दणंस्या कुलेषुनत् रुद्रियोगेतथाज्ञेयमृणछेदंतुकारयेदितिज्योतिःप्रकाशोक्तेः बुधवारेऋणंकदापिन देयम् २७ अथहलप्रवाहमुहूर्तशार्दूलविक्रीडितेनाह मूलद्वीशेति एतैःमूलादिभिरेकोनविंश तिनक्षत्रैः विनार्कशनिरविशनिवारौवर्जयित्वान्यवारेषु तत्रपापैर्हीनबलैर्निर्बलैः चंद्रेजलराशिन वांशकेसति शुक्रेचंद्रेचमांसलेपुष्टेसतिउदितेइत्यर्थः गुरौलग्नेचसतितदाप्रथमंहलप्रवहणंश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तंस्यात् कश्यपः गुरौलग्नगतेशुक्रेबलिन्याप्योदयेविधौ शस्ताकृषिक्रियातत्रदुर्बलैःक्रूरखेचरैः अथसिंहेघटेकुंभेकर्केअजेमेषेएणेमकरे धटेतुलायामू तथारिक्तासुषष्ठ्यामू तथाशब्दोऽनुक्तसमुच्चयार्थस्तेनाष्टम्यामपिनशस्तम् यस्मात्सक्षयकरम् २८ अथबीजोप्तिमुहूर्तंफणिचक्रंचशार्दूलविक्रीडितेनाह एतेष्विति पूर्वोक्तनक्षत्रेषु श्रुतिवारुणादितिविशारवोडूनिविनाश्रवणादिवर्जितेषुमूलमघाध्रुवमृदुक्षिप्रधनिष्ठास्वातीषुभौमंविनाभौमवारव्यतिरिक्तवारेषुबीजोप्तिः बीजवापनंशुभंज्ञेयम् नारदः मृदुध्रुवक्षिप्रभेषुपितृवायुवसूडुषु समूलभेषुबीजोप्तिरत्यु

लग्नेदेवगुरौहलप्रवहणंशस्तंनसिंहेघटेकर्काजेणधटेतनोक्षयकरंरिक्तासुषष्ठ्यांतथा २८ एतेषुश्रुतिवारुणादितिविशारवोडूनिभौमंविनाबीजोप्तिर्गदिताशुभाल्पशुभतोष्टाग्नींदुरामेदवः

रूक्षफलप्रदा रवौरौद्राद्यपादस्थेभूमौसंजायते रजः तस्माद्दिनत्रयंतत्रबीजवापंपरित्यजेदितिराजमार्तंडे आर्द्रापथमदिनत्रयनिषेधः अथबीजोप्तौ फणिचक्रम् अशुभतोनविद्यंतेगावोयस्येतिअशुः राहुः तस्यभंतदाक्रांतनक्षत्रंतस्मादादौअष्टौभानि असंतिअसमीचीनानि ततस्त्रीणिशुभकराणि ततएकमशुभम् ततस्त्रीणिशुभानि ततएकमशुभम् ततस्त्रीणिशुभानि ततएकमशुभम् ततस्त्रीणिशुभानि ततश्चत्वार्यशुभानि एवंबीजोप्तौसप्तदं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्क्षतिनक्षत्राणांऋक्षभाऋक्षत्वमुक्तम् रत्नमालायाम् मूर्ध्नित्रीणिगलेत्रयंचजठरेधिष्ण्यानिचद्वादशे
त्यादि लग्नऋक्षस्थिमाह वसिष्ठः भवरिपुसहजेपापैस्त्रिकोणकेंद्रस्थितैश्चऋक्षैः कथितेऋक्षधिष्ण्ये
ष्विचऋक्षलग्नेबीजवापनंकार्यम् अथहलचक्रमुच्यते हलेऽतिहलचक्रेअर्कोक्षितात्भात्नक्षत्रात्
क्रमेणत्रीणिअसंतिअऋक्षाणि ततोऽष्टानिसंतिऋक्षाणि ततोनवभानिअसंति ततोऽष्टौभानिसंति
यथा सूर्यआर्द्रायांऋक्षंमृगः ततआरभ्यत्रीणिअऋक्षाणि ततःपुष्यतोऽष्टानिशुभानि ततोविशा
खातोनवभान्यऋक्षाणि ततःशततारकातोऽष्टानिऋक्षाणि एवमष्टाविंशतिभानिजातानि तथाचसि
द्धः अर्कगतागतसंस्थेभत्रितयंनेष्टमुभयतस्त्विष्टम् षोडशधिष्ण्यंनवकंशिष्टमनिष्टंचलांगलेच

रामेंदूग्नियुगान्यसच्छुभकराण्युक्तोहलेर्कोज्झितान्द्वाद्राभाष्टनवाष्टभानिमु
निभिःप्रोक्तान्यसत्संतिच ॥९॥ के कश्यपोपि त्रिषष्टऋनवर्क्षेषुसप्तस्वर्कविमुक्तभात् हा
निर्वृद्धिः कर्तृनाशोलक्ष्मीप्राप्तिर्यथाक्रमादिति एवंबहुमुनिसंवादेसतिइनर्क्षान्झितर्क्षात् त्रिवह्नित्रीषु
त्रीषुत्रिरामा ३ ३ ३ ५ ३ ५ ३ ३ एयऋक्षदऋक्षाणिक्रमाल्लांगलास्त्रैरितियदुक्तंगणेशदैवज्ञैर्मुहूर्ततत्त्वेतच्चिंत्यंऋषिवाक्यमूलाभावात् ननुश्रीपतिवाक्यम् अर्ककांतगतागतान्पनडुहांनाशायभान्यग्रतो
हल्यैभत्रितयंततस्तऋक्षऋषिकृत्घातायमूलत्रये धिष्ण्यानांनवकंतदंतरगतेस्यातांश्रियैपंचकेयच्चान्य
त्रितयंतदत्रगदितंचकेऋक्षमेलांगलेइति मूलंचेत् नह्यपश्यायतिवाक्येशब्दार्थः किंतुमूलवाक्यावोधे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नस्याज्ञानप्रकाशकः वाक्यार्थस्तु अर्कार्कांतगतानित्रीणिभानिवृषनाशकराणिस्युःततस्त्रीणिस्वो
ततःपंचनक्षत्राण्यपास्य अग्निमाणिनवभानिशूलत्रये त्रिकंत्रिकंकृषिकृत्घातायस्थाप्यानि नन्वत्र
पंचनक्षत्रत्यागेकोहेतुरित्यतआह तदंतरगतेपंचकइति तच्छब्देनहलोर्ध्वदंडाशूलोर्ध्वदंडानुच्यते
अर्कार्कांतगतागतान्यनडुहांनाशायभान्यग्रतोवृद्ध्यैभवितयंअयमंतरस्यपूर्वावधिः मध्येततः पदोपा
दानात्तुशब्दस्तु आनंतर्यद्योतनार्थस्तु अनंतरंशूलत्रयेधिष्ण्यानांनवकंकृषिकृत् घातायेतिअंतर-
स्योत्तरावधिः तयोरंतरगतेमध्येविद्यमानानांधिष्ण्यानांपंचकंचपंचकंचत्रियैस्थाप्येनक्षत्रदशकमि
तियावत् यच्चान्यद्भवितयंहलदंडोर्ध्वभागेशुभफलदंलेख्यम् एवंचसतिकृषिवाक्यैःसहास्यैकार्थतै

स्वाष्ट्रान्मित्रकभाद्वयेंबुपलघुश्रोत्रेशिरामोक्षणंभौमार्केज्यदिनेविरेकवमनाद्यं
स्याद्बुधार्कीविना वसंपद्यते अनेनमहेश्वरादयोपिप्रत्युक्ताः ११ अथशिरामोचनविरेच
नादिमुहूर्तेशार्दूलविक्रीडितेनाह स्वाष्ट्रादिति स्वाष्ट्राद्वयेचित्रास्वात्यौ मित्रभाद्वयेअनुराधाज्येष्ठे
कभाद्वयेरोहिणीमृगौ श्रोत्रश्रवणः चित्रादिषुएकादशसुनक्षत्रेषुभौमार्कगुरुवारेशिरामोक्षणंरु
धिरवाहिनीनाडिकाशिरातस्याः सूक्ष्मशस्त्रघातेननरशिरातोरक्तमोक्षणंकुर्यात् अथबुधार्कीविनाबुध
शनिवारौत्यक्त्वान्यवारेषुपूर्वोक्तनक्षत्रेषुचविरेकवमनाद्यम् औषधेनस्नेहमवृत्तिविरेकः वमनंवांतएत
दाद्यंकुर्यात् मित्रक्षिप्रचरध्रुवेषुत्रयोदशनक्षत्रेषुरविवारेशुभग्रहवारेचविदोबुधस्यलग्नवर्गेजीवस्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिलग्नवर्गेयस्मिन्कस्मिंश्चिल्लग्नेपिगुरुबुधयोःषट्वर्गेसतितनौलग्नेगुरौचसतिकर्तुर्गुरुबलेचसतिधर्मक्रियाकोटिहोमरुद्रानुष्ठानादिरूपाणिगदिताकथिता ३० अथधान्यच्छेदनंवसंततिलकेनाह तीक्ष्णाजपादेति एतेष्वेकोनविंशतिनक्षत्रेषुतथाभौमशनिरिक्तावर्जितदिनेस्थिरलग्नेसति धान्यादीनां यवादीनांछिदाछेदनंनिगदिताकथिता ३१ अथकणमर्दनंसस्यरोपणंचवसंततिलकेनाह भाग्येति विधिःरोहिणी अंत्यंरेवती एषुनवभेषुकणानांचणकादीनांमर्दनंयष्टिघातादिनाक्वितुषीकरणंतत्स

मित्रक्षिप्रचरध्रुवेरविशुक्रभेहेलग्नवर्गेविदोजीवस्यापितनौगुरौनिगदिताधर्मक्रियातद्वले ३० तीक्ष्णाजपादकरवन्हिवसुश्रुतीदुस्वातीमघोत्तरजलांतकतक्षपुष्ये मंदारिक्तरहितेदिवसेतिशस्ताधान्यछिदानिगदितास्थिरभेविलग्ने ३१ भाग्यार्यमश्रुतिमघेद्रविधातमूलमैत्र्यंत्यभेषुकथितंकणमर्दनंस्यात् द्वीशाजपान्निर्ऋतिधातृशतार्यमर्क्षेसस्यस्यरोपणमिहार्किकुजौविनासत् ३२ मिश्रोग्ररौद्रभुजगेंद्रविभिन्नभेषुकर्कार्जतौलिरहितेचतनौशुभेहे मीचीनंस्यात् अथविशाखा

दिषट्नक्षत्रैः अर्किकुजौविनाशनिभौमतोन्यवारेषुसस्यस्यधान्यस्यरोपणंसच्छुभम् ३२ अथधान्यस्थिनिधान्यरश्मिवसंततिलकेनाह मिश्रोग्रेति मिश्रोग्रादिविभिन्नेषुमिश्रादिदशनक्षत्रेभ्योन्येषुसप्तदशनक्षत्रेषुतथाकर्कमेषतुलारहितेलग्नेमकरस्थिरद्विस्वभावलग्नेषुशुभेहेचंद्रबुधगुरुशुक्रवारे ३१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धान्यानांस्थितिः एकत्रस्थलेस्थापनंसाशुभकरीतिगदिता अथशुक्रवेज्यादित्रयोदशनक्षत्रेषुधान्य
वृद्धिः मह्यमेतावद्धान्यंदेहितत्तोमासद्वयानंतरंसपादंसार्धंवादास्यामीत्येवंरूपावृद्धिर्निगदिता ३३
अथशांतिकपौष्टिकादिकंवसंतनिलकेनाह क्षिप्रमेति क्षिप्रादिनक्षत्रेषुपौष्टिकमंगलाभ्यांसहपौष्टि
ककर्मणाग्रहशांत्यामंगलकर्मणाविनाविनायकशांत्यासहशांतिकेदुष्टफलदंमूलादिनक्षत्रोत्पन्नंशां
त्यादिशुभंस्यात् लग्नात्खेदशमेर्केसतिविधौचंद्रेशुक्रवगतेचतुर्थेगुरौलग्नस्थेसति तत्शांतिकंमौ

धान्यस्थितिःशुभकरीगादितात्शुक्रवेज्यद्वीशेंद्रदस्रचरभेषुचधान्यवृद्धिः
३३ क्षिप्रमृक्षंवात्यचरमैत्रमघासुशस्तंस्याच्छांतिकंसहचमंगलपौष्टिकाभ्या
म् खेर्केविधौसुरवगतेतनुगेगुरौनोमौढ्यादिदुष्टसमयेशुभदंनिमित्ते ३४
सूर्यभात्त्रिभेचांद्रेसूर्यवच्छुक्रपंगवः चंद्रारेज्यागुशिखिनोनेष्टाहोमाहु
तिःखले ३५ ढ्यादिदुष्टसमयेगुरुशुक्रास्तादिदुष्टकालेनोशुभदम् तथानिमित्तेकेवा
शुत्पातदर्शनेसतिगुरुशुक्रास्तादावपिशुभंस्यात् उक्तंच शांतिकर्माणिकुर्वीतरोगेनैमित्तिकेतथा गुरु
भार्गवमौढ्येपिदोषस्तत्रनविद्यते ३४ अथहोमाहुतिशुद्धिमनुष्टुभाह सूर्यभादिति सूर्यर्क्षांतनक्षत्रा
त्त्रित्रिभेनक्षत्रत्रयमध्येचांद्रेचंद्रनक्षत्रेदिननक्षत्रेसतिक्रमात्सूर्यादिमुखेहोमाहुतिः पतति यथासू
र्यर्क्षांतनक्षत्रात्तनक्षत्रत्रयमध्येहोमारंभेसूर्यमुखेहोमाहुतिपातः ततोनक्षत्रत्रयेषुबुधस्य ततःशुक्रस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततःपंगोः शनेः ततश्चंद्रस्य ततआरस्यभौमस्य ततईज्यस्यगुरोः ततःराहोः ततः शिखिनः केतोः एवं सतियद्दिनेखलेपापग्रहमुखेहोमाहुतिःपततिसानेष्टानशुभदा अर्थाच्छुभग्रहमुखेशुभा सूर्यनक्षत्रा चंद्रनक्षत्रपर्यंतगणना ॥ अथयद्दिनेहोमश्चिकीर्षितस्तद्दिनेवह्निनिवासवशेनशुभाशुभफलमिंद्र ब्रह्माह सैकेति शुक्लादिगणनयावर्तमानतिथिर्गण्याएकयुतावर्तमानवारयुताचतुर्भक्तायच्छेषंतत्रे त्गुणमितंत्रिमितंशून्यमितंचतदाभूमौवन्हेर्वासोवसतिःफलमाह सौख्यायहोमेहोमाद्दिनेभूमाव ग्नेर्वासेसतिसौख्यंभवति अथशशियुग्मशेषे एकमितशेषेग्निवासोदिविस्वर्गेफलंकर्तुःप्राणनाशः

सैकातिथिर्वारयुताहृतासाशेषेगुणेभ्रेभ्रविवह्निवासः सौख्यायहोमेशशि युग्मशेषेप्राणार्थनाशोदिविभूतलेच ३६ नवान्नंस्याच्चरक्षिप्रमृदुभेसत्तनौ शुभम्

द्विमितेशेषेग्निवासोभूतले तत्फलंकर्तुरर्थनाशःउक्तंच तिथिवारयुतिः सैकावेद भक्तावशेषकात् निवासोग्नेर्व्योम्निरूपे वित्तप्राणविनाशदः पातालेद्विकशेषेण धनसंचयनाशनः गुणवेदावशेषेण भूमौविपुलसौख्यदः संस्कारेषुविचारोस्यनकार्योनापिवैष्णवे नित्यनैमित्तिकेकार्येनचाब्देमुनिभिःस्मृतः कैश्चिल्लेटरूपमपिहोमेवर्ज्यमित्यक्तंतद्यथा अर्कश्चंद्रादृष्टमेज्ञाच्चतुर्थेमंदः शुक्रादृष्टमेंगारकश्च राहुर्धर्मेजीवतःखेटरूपेहोमेनाशःपुत्रदाराधनानामिति ३६ अथप्रतिवर्षोत्प न्ननवान्नभक्षणमनुष्टुभाह नवान्नमिति चरादिद्वादशभेषुसत्तनौसमीचीनलग्नेशुभग्रहेयुतेदृष्टेचे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यर्थः नंदातिथयः १ ६ ११ विषघटीविवाहप्रकरणोक्ताः मधुश्चैत्रः पौषः आर्किः शनिः भूमिजोभौमः एतान्विनावर्जयित्वानवान्नभक्षणंशुभम् ३७ अथनौकाघटनमनुष्टुभाह याम्यत्रयेति याम्यत्रयंभरणीकृत्तिकारोहिण्यः ईशआर्द्रा अन्यानिप्रसिद्धानिएभ्योभिन्ननक्षत्रेषुशुक्रगुरुरविवारेसत्तनौशुभयुतदृष्टेलग्नेनौकाघटनंनौकानिर्माणंशुभम् नौकाचालननौकागमनसुहूर्त्तौदीपिकायांशुभाहेविष्णुयुग्मेंदुभगमैत्राश्विपाणिषु चालनंघटनस्थानान्नावःशुभतिथींदुषु अश्विकरेज्यसुधानिधि

विनानंदाविषघटीमधुपौषार्किभूमिजान् ३७ याम्यत्रयविशाखेंद्रसार्पपित्र्येशभिन्नभे भृग्वीज्यार्कदिनेनौकाघटनंसत्तनौशुभं ३८ मूलाद्रार्भरणीपित्र्यमृगेसौम्येघटेतनौ सूखेसुक्रेष्टमेशुद्धेसिद्धिर्वीराभिचारयोः ३९ व्यंत्यादितिध्रुवमघानिलसार्पधिष्ण्येरिक्तेतिथौचरतनौविकवींदुवारे पूर्वाभिजधनाच्युतभेशुभल

ग्ने तारकयोगतिथींदुविशुद्धौनौगमनंसुभदंशुभवारे ३८ अथवीरसाधनाभिचारयोर्मुहूर्तमनुष्टुभाह मूलेति मूलादिनक्षत्रपंचकेतथाघटेतनौकुंभलग्नेसौम्येबुधेसतितथाशुक्रेसूखेचतुर्थेअष्टमेशुद्धेग्रहरहितेतादृशेलग्नेवीरस्यधनस्यअभिचारस्यकर्मणःसिद्धिः निष्पत्तिः ३९ अथरोगनिर्मुक्तस्नानंचसंततिलकेनाह व्यंत्येति विगतान्यंत्यादीनिरेवत्यादीनिनवधिष्ण्यानियेष्यस्तेषष्टादशशिष्ट

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नक्षत्रेषु तथारिक्तासंज्ञासुतिथिषुचरलग्नेनथाशुक्रचंद्रवर्जितवारे तथाविधौचंद्रेहीनेनिषिद्धस्था
नस्थेनिषिद्धस्थानानिगोचरप्रकरणेनथापापग्रहैर्भवेएकादशेकेंद्रे १ ४ ७ १० कोणेनवपंचमेस्थानेस्थि
तैःसद्भिःएवंविधेलग्नेरुजाविरहितस्यरोगनिर्मुक्तस्यजनस्यस्नानंआरोग्य स्नानंशस्तंशुभं नारदःस्थिरे
ज्यादिनिसार्पार्त्यपित्र्यवारुणभेषुचनकुर्याद्रोगमुक्तस्यस्नानंवारेऽशुक्रयोरिति ४० अथशिल्पविद्यामनु
ष्णाह मृदुध्रुवेति मृदुध्रुवादिनक्षत्रेज्ञेबुधेदशमेलग्नेवासति अथवागुरौदशमेलग्नेवासति तथाविधौचं
द्रेबुधगुरुषट्वर्गस्थेचसति शिल्पविद्यानानावर्णादिनिर्मितंमूर्त्यादिकंतद्विधायाःप्रारंभःशस्यते ४१ अथ

स्नानंरुजाविरहितस्यजनस्यशस्तंहीनेविधौखलखगेर्भवकेंद्रकोणे ४० मृदुध्रुव-
क्षिप्रचरेज्ञेगुरौवाखलग्नगे विधौज्ञजीववर्गस्थेशिल्पविद्याप्रशस्यते ४१ सुरेज्य
मित्रभाग्येषुवाष्टम्यांतैतिलेहरौ शुक्रदृष्टेनौसौम्यवारेसंधानमिष्यते ४२ त्यक्ताष्ट
८भूत १४ शनिविष्टिकुजान्जनुर्भमासौमृतौ८रविविधू अपिभानिनाड्याः संधानमनुष्टु

भाह रुरेज्येति पुष्यादिनक्षत्रेतथाष्टम्यांतिथौहरौहादश्यांचतिथौतैतिलकरणेच तथाशुक्रदृष्टेयुतेचल
ग्नेतथाशुक्रभग्रहाणांवारेसंधानंसंधिर्मैत्रीतियावन्नेष्यते तथाचकश्यपः भाग्येपुष्येसमैत्रेचलग्नेशुक्रेक्षिते
युते करणेतैतिलेष्टम्यांहादश्यांसंधिरिष्यते ४२ अथपरीक्षासुहूर्तेवसंततिलकयाह त्यक्तेति भूतश्चतुर्दशीजनु ३३
र्भमासोजन्मर्क्षंजन्ममासस्यजन्मराशेरष्टमंसूर्यंचंद्रंचनाड्याःभानिजन्मभकर्मादिनक्षत्राणिनाडीनक्षत्रा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णिएतानित्यस्का द्यंगेदिस्वभावेचलग्नेचरलग्नेवातन्नवांशेच चंद्रशुद्धौतारशुद्धौगुरुशुद्धौचस
त्याम् करोहस्त अदितिःपुनर्वसुः हरिःश्रवणः इंद्रोज्येष्ठा कंजलंतत्स्वामीवरुणः तस्यनक्षत्रेशतता
रका एषुभेषुपरीक्षाकार्या अन्यत्स्पष्टम् परीक्षानामसुवर्णस्तेयादिपातकाभिशस्तस्यशुद्धशु-
द्धिविचारपूर्वकंतन्नमाषादिरूपादित्यभिधियावत् उक्तंचदीपिकायाम् नोशुक्रास्तेऽष्टमार्केगुरुसहि
तरवौजन्ममासेऽष्टमेद्यौविष्टौमासेमलाख्येकुजशनिदिवसेजन्मतारासुचाथ नाडीनक्षत्रहीनेशुक्र
रजनीनाथतारावित्रुद्धौप्रातःकार्यापरीक्षाद्दितनुचरगृहांशोदयेशस्तलग्नेइति व्यवहारोच्चये अष्ट
म्यांचचतुर्दश्यांप्रायश्चित्तपरीक्षणे नपरीक्षाधिवासश्चशनिभौमदिनेभवेत् ज्येष्ठाश्रवणहस्तश्चत-

द्यंगेचरेतनुलवेशशिजीवतारशुद्धौकरादितिहरींद्रकपेपरीक्षा ४३ थाज्ञेयःपुन

र्वसुः तद्दृच्छतभिषाप्रोक्ताद्यभियुक्तविचारणेइतिनाडीनक्षत्राणिदीपिकाकारवचनात् जन्मर्क्ष
गाद्यंदशमंचकर्मसंघातिकंषोडशमंचमानसम् स्यात्तंचविंशंसमुदायमष्टादशंत्रयोविंशतिभंविना
शकम् एवंषट्भोजनःसर्वोजातिदेशाभिषेकभैः नवभोनृपतिर्ज्ञेयोनाडीनारास्मृताअमूःइति नृजा
तिनक्षत्राणिवराहसंहितायाम् पूर्वात्रयंमानलभग्रजानांराज्ञांचपुष्येणसहोत्तराच सर्पेण्यमैत्रं-
पितृदेवतंचप्रजापतेर्भंच कृषीवलानाम् आदित्यहस्ताभिजिदश्विनानिवणिक्जनस्वाम्यमुपागना
नि मूलत्रिनेत्रानिलवारुणानिभान्यग्रजातेःयमविष्णुनायाः सौम्येंद्रचित्रावसुदेवतानिसेवाज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नस्वाम्यसुपागतानि सार्पविशाखाश्रवणेभरण्यश्चांडालजातेरभिनिर्दिशंतीति देशोवाराणस्यादिक
स्तन्नक्षत्रंशतपदचक्रोक्तमूह्यथा वाराणस्याः नक्षत्रंरोहिणीति अभिषेकभेयस्मिन्पुष्यादिकेनक्षत्रेरा
जाभिषेकोजातस्तदभिषेकर्क्षमितिराज्ञांनवभानिदूतरेषांषडेवभानि ४३ अथसामान्यतः शुभकार्येषु
लग्नशुद्धिमनुष्टुभाह व्ययेति व्ययोद्वादशंअष्टमंएतत्स्थानद्वयंशुद्धंग्रहरहितंयस्मिन्एतादृशेस्वज
न्मराशेर्जन्मलग्नाद्वाउपचयभवनेत्रिषडेकादशदशमराशौलग्नगतेशुभैर्दृष्टेयुतेचतथाचंद्रेत्रिषट्दशा
यस्थेसतिसर्वेषांशुभकार्याणामारंभः सिध्यतितथाचवसिष्ठः उपचयभेलग्नगते व्ययनेधनशुद्धिसंयु

व्ययाष्टशुद्धोपचयेलग्नगेशुभदृग्युते चंद्रेत्रिषट्दशायस्थेसर्वारंभःप्रसि
द्धति ४४ स्वातींद्रपूर्वाशिवसार्पभेमृतिर्ज्वरेत्यमैत्रेस्थिरताभवेद्रुजः याम्य
श्रवोवारुणनक्षभेशिवा ११ घस्राहिपक्षो १५ ह्यधिपार्कवासवाः ४५

तेलग्नेउपचयगेशीतकरेमंगलकर्माणिकार्याणिइति ४४ अथनक्षत्रेषुज्वरोत्पत्तौसत्यांतन्निवृत्तौदिनसं
ख्यांद्वितीयोपजातिकयोपेंद्रवज्रयाचाह स्वातींद्रेति मूलाग्नीति स्वातीज्येष्ठापूर्वात्रयार्द्राश्लेषासूज्वरेज्व
रोत्पत्तौसत्यांमृतिर्मरणंस्यात् अथांत्यमैत्रेरेवत्यनुराधयोर्ज्वरोत्पत्तौरुजोरोगस्यस्थिरता बहुकालेनरो
गनिवृत्तिःस्यात्तथाभरणीश्रवणशततारानक्षभंचित्राएतेषुनक्षत्रेषुशिवाघस्राः एकादशदिवसाः ३४
रोगः ह्यधिपंविशाखा अर्कोहस्तः वासवंधनिष्ठाएषुत्रिषुभेषुपंचदशदिवसाःरोगः ४५ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलं अग्निः कृत्तिका दास्त्रमश्विनी एषुनवदिवसा रोगः पित्र्यभेमघायांनरवाः विंशतिर्दिवसाः बुध्न्यभंउत्तराभाद्रपदा अर्यमाउत्तराफाल्गुनी पुष्यपुनर्वसूरोहिणीषुनगाः सप्तदिवसा रोगः अन्त्यवैश्वेमृगोत्तराषाढयोः त्रयस्त्रिंशद्दिनानिरोगस्थैर्यंततोरोगनिवृत्तिः अत्रशांतिर्वक्ष्यते उक्ता ऋक्षेशरूपंकनकेन कृत्वातल्लिंगमंत्रैश्चरुगंधपुष्पैः वस्त्राक्षतैर्गुग्गुलधूपदीपनैवेद्यतांबूलफलैश्चसम्यक् पूजांचकृत्वा मयनाशनायद्विजायदद्यादतुलंशिवाय आमयोरोगः अतुलमपरिमितद्रव्यम् अथानंतरंयमाहिमूलभेभरण्याश्लेषामूलेषु कृत्तिकाविशाखार्द्रामघासूचसप्तनक्षत्रेषुयस्यकस्य चित्फणिदंशनेसर्पदंश

मूलाग्निदास्त्रेनवपित्र्यभेनरवा बुध्न्यार्यमेज्यादितिधातृभेनगाः ७ मासो ३० अन्त्य वैश्वेथयमाहिमूलभेमिश्रेशपित्र्येफणिदंशनेमृतिः ४६ रौद्राहिशाक्राबुपयाम्य पूर्वाद्विदैववस्वग्निषुपापभरे रिक्ताहरिस्कंददिनेचरोगे शीघ्रंभवेद्रोगिजनस्यमृत्युः ४७

नेमृतिर्भवेत् अत्रसर्पदंशेयस्यएतेषुगोचरवशेनचंद्रबलंनभवतितस्यैवसर्पदंशेन यद्यत्रचंद्रस्तस्यैवगोचरेवाशुभपदः तदानूनंभवेन्मृत्युः ऋक्षसंमिलदेहिनदृति ४६ अथ शीघ्रंरोगीमरणेविशिष्टयोगंहितायोपजातिकयाह रौद्राहीति रौद्रादिनक्षत्रेषुपापवारेसतिरिक्ताः प्रसिद्धाः हरिर्द्वादशी स्कंददिनंषष्ठीएतासुतिथिषु एवंविधेविशिष्टयोगेयस्यरोगोत्पन्निर्भवतितस्य रोगिजनस्यशीघ्रंमृत्युर्भवेत् ४७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथप्रेतदाहमुहूर्तप्रेतदाहादिनिषेधंचोपेंद्रवज्रायाह क्षिप्रेति क्षिप्रादिनक्षत्रेषुप्रेतक्रियाप्रेतानांमृतानां नांक्रियाउत्तमश्लोकप्राप्त्यर्थंश्राद्धादिक्रियास्यात् यदिदाहसमयेकारणवशान्नारब्धा अथश्रवकुंभगे विधौमीनकुंभस्थितेचंद्रेधनिष्ठोत्तरार्धादिपंचनक्षत्रेप्रेतस्यदाहोज्वालनंत्यजेत् नपुनःयमदिग्गमं दक्षिणदिशिगमनंयात्राम् तथाशय्यायाःस्वट्वायाःवितानंवयनम् तथागृहगोपनंगृहाच्छादनम् आदिशब्देनतृणकाष्ठसंग्रहंचत्यजेत् ब्रह्मपुराणेपंचकेमरणमपिनिषिद्धम् कुंभमीनस्थितेचंद्रेमरणं यस्यजायते नतस्योर्ध्वगतिर्दृष्टासंतत्तेर्नशुभंभवेदिति तेनपंचकेमृतस्यपंचकेदाहप्राप्तौसत्यांतत्पुत्त-

क्षिप्राहिमूलेंदुहरीशवायुभेप्रेतक्रियास्यात्स्रवकुंभगेविधौ प्रेतस्यदाहं यमदिग्गमत्यजेच्छय्यावितानंगृहगोपनादिच ५८ सूर्यर्क्षाद्रसभैरधस्थ लगतैः पाकोरसैःसंयुतःशीर्षेयुग्मभितैः शवस्यदहनंमध्येयुगैःसार्पभैः प्रागाशादिषुवेदभैःस्वसुहृदांस्यात्संगमोरोगभैः क्रव्यादैःकरणंस्मरंचगदितं काष्ठादिसंस्थापने ५९ लविधिंकृत्वादाहःकार्यःपश्चादाशौचनिवृत्यनंतरंशांतिकंकार्यं

यदिपंचकप्रवृत्तेःप्रागेवमृतःप्रतिबंधवशात्पंचकेदाहप्राप्तौपुत्तलविधिमकृत्वादाहःकार्यः आशौचनिवृत्यनंतरंशांतिर्नकार्या एवंरेवत्यंतमृतस्यरेवतीमपहायदाहःकार्यःनपुत्तलविधिः आशौचनिवृत्यनंतरं शांतिरेवकार्या मरणनिषेधदाहनिषेधप्रतिपादकवचनद्वयसद्भावादिति ६० अथकाष्ठानांगोमयपिंडानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चसंग्रहमुहूर्तशार्दूलविक्रीडितेनाह सूर्यर्क्षाद्रसभौरिनिष्पशार्थम् ४९ अथत्रिपुष्करयोगंसफलं वसंततिलकेनाह भद्रातिथिरिति भद्रासंज्ञकतिथिर्द्वितीयासप्तमीद्वादशी शनिभौमसूर्यवारेभवति तथाहीशंविशारवा अर्यमोत्तराफाल्गुनी अजचरणः पूर्वाभाद्रपदा अदितिःपुनर्वसुः वह्निःकृत्तिका वैश्वमुत्तराषाढा एषुनक्षत्रेषुउक्ततिथिवारनक्षत्ररूपेविशिष्टयोगेसतित्रैपुष्करं त्रिपुष्करएवत्रैपुष्करःस्वार्थेण् त्रिपुष्करसंज्ञकयोगोभवति कीदृशः मृत्कविनाशवृद्धौत्रैगुण्यदं तद्दिनेयदिकश्चिन्म्रियेतनद्दायादास्त्रयोम्रियेरन् यदिकिंचिद्दुस्तकविनष्टंतदानस्यतद्दुस्तत्रयनाशः तथाकिंचिद्दुस्तुलब्धंत

भद्रातिथीरविजभूतनयार्कवारे द्वीशार्यमाजचरणादितिवह्निविश्वे त्रैपुष्क
रोभवतिमृत्कविनाशवृद्धौत्रैगुण्यदोद्विगुणकृद्दुस्तक्षचांद्रे ५०

दात्रिगुणस्तद्दुस्तुलाभः वसिष्ठः रविरविजभौमवारेभद्रायांविषमपादमृक्षंचेत् त्रैपुष्कराख्ययोग स्त्रिगुणफलोयुगुलभेद्विगुणम् प दानियन्नक्षत्रस्यैवचरणः पूर्वराशौचरणत्रयमपरराशौभवति- तानिविषमचरणानिद्वीशार्यमेत्यादीनि अथवऋर्धनिष्ठा तक्षंचित्रा चांद्रंमृगः एतानिभानिभद्रातिथ यः रविशनिभौमवाराश्च अत्रापिविशिष्टयोगेद्विपुष्करनामयोगोभवति तत्फलं मृत्कविनाशवृद्धौद्वै गुण्यकृद्भवति तत्रशांतिमाह नारदः दद्यात्तद्दोषनाशायगोत्रयंमूल्यमेववा द्विपुष्करेद्वयंदद्यान्नदोष स्तृक्षमाचनदृति अत्रत्रिपुष्करेकश्यपेनरविस्थानेबृहस्पतिवारोप्युक्तः भद्रातिथिःशनीज्यारवारेचे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विषमांघ्रिभम् त्रिपुष्करत्रिगुणंदद्विगुणंद्व्यंघ्रिभंमृतावितिइदमेवदृष्ट्वाश्रीपतिनाप्युक्तम्त्रिविषम चरणांघ्रिषण्यमित्यादि अत्रकश्यपवाक्यंमृतावेवत्रिगुणफलतोक्तंग्रंथकृतातुश्रीपतिवाक्यानुरोधान्मृत्कविनाशदृष्ट्वाविलक्षम् अथशवप्रतिकृतिदाहेनिषिद्धकालंशार्दूलविक्रीडितेनाह शुक्लारेति एवंविधेदिनेशवस्यप्रतिकृतिःपर्णशरादिनासावयवल्वकल्पनंतस्यदाहोनकार्यःकृतःद्विविधोहिप्रेतसंस्कारःप्रत्यक्षशरीरस्यैकःतत्रप्रतिकृतेरन्यःतत्रप्रत्यक्षशरीरसंस्कारेदिनविचाराभावःप्रत्यक्षशवसंस्कारेदिनंनैवविशोधयेत्इतिप्रतिकृतिसंस्कारेकालत्रयम् आशौचमध्येवर्षमध्येव

शुक्रारार्किषुदर्शाभूतमदनेनंदासुतीक्ष्णोग्रभेपौष्णेवारुणभेत्रिपुष्करदिनेन्यूनाधिमासेयने

र्षानंतरंचेति आशौचमध्येक्रियतेपुनःसंस्कारकर्मचेत्शोधनीयंदिनंतत्रयथासंभवमेवतु आशौचविनिवृत्तौचेत्पुनःसंस्क्रियतेमृतःसंशोध्यैवदिनंग्राह्यमूर्ध्वंसंवत्सराद्यदीति गार्ग्यवचनाद्दिनशुद्धिरुच्यते शुक्रारार्किदिनेशुक्रभौमशनिवारेशवप्रतिकृतेर्दाहोनकार्यइतिप्रत्येकंसंबंधः दर्शोमावास्याभूतश्चतुर्दशीमदनस्त्रयोदशीनंदाःप्रतिपत्षष्ठ्येकादश्यःआसुतिथिषुतथातीक्ष्णोग्रभेमूलार्द्राज्येष्ठाश्लेषास्तीक्ष्णानिपूर्वात्रयमघाभरणीउग्राणिपौष्णंरेवतीवरुणंशततारा पूर्वोक्तेत्रिपुष्करदिनेन्यूनाधिमासेक्षयमासेअधिकमासेअयनेयाम्येअब्दात्परतः अब्दमध्येयाम्यायनेपिकार्यःनंदामदनभूतामापातवैधृतिविष्टिषु शुक्रार्किभौमपरिघध्रुवमिश्रो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रमैत्रमैः कर्तुश्चंद्रेष्टवेदांत्येजन्मप्रत्यरितारके त्रिपादभेसितेपक्षेयनेयाम्ये ऽब्दतःपरम् शवप्रतिकृतेर्दाहः शुक्रेज्यास्ताधिमासके नेष्टोमध्योदिपान्मैत्र द्वाशादितिभगध्रुवेइतिनिर्णयोक्ते दिनक्षयोपि वर्ज्यः वर्जयेत्तुदिनक्षयमितिगार्ग्योक्ते पातपरिघेपातोव्यतीपातोमहापातश्चपरिघश्चैतेषु दाहो नकार्यः देवेज्यशुक्रास्तकेदाहोनकार्यः भद्रायांवैधृतौचतथासितेशुक्लपक्षइति ॥ अथतेनैवखंदसावर्ज्यंतराण्याह जन्मप्रत्यरितारयोरिति कर्तुःजन्मप्रत्यरितारयोः जन्मतारात्उत्पत्तिनक्षत्रंदशमैकोनविंशंचेति प्रत्यरितारात्जन्मभात्संचमंचतुर्दशत्रयोविंशंनक्षत्रम् तथाकर्तुर्मृतिसप्तखांत्येऽब्जेअ

याम्येब्दात्परतश्चपातपरिघेदेवेज्यशुक्रास्तकेभद्रावैधृतयोःशवप्रतिकृतेर्दा
होनपक्षेसिते ॥ जन्मप्रत्यरितारयोर्मृतिसप्तखांत्येब्जेचकर्तुर्नसन्मध्योमैत्र
भगादितिध्रुवविशाखाद्यंघ्रिभेज्ञेपिच श्रेष्ठोर्कज्यविधोर्दिनेश्रुतिकरस्वात्य
श्विपुष्यंतथात्वाशौचात्परतोविचार्यमखिलंमध्येयथासंभवम् ॥

ष्टमचतुर्थद्वादशस्थेचंद्रेसतिदाहोनसत्नप्रशस्तः अथमध्यमनक्षत्राणि मैत्रमनुराधा भगः पूर्वाफाल्गुनी अदितिः पुनर्वसुध्रुवाणिरोहिण्युत्तरात्रयम् विशाखा द्व्यंघ्रिभंमृगचित्राधनिष्टाःज्ञेबुधेपि शवदाहोमध्यमः अथोत्तमानि अर्केज्याभ्यांसहितोविधुः अर्कगुरुचंद्रवारेतथाश्रवणहस्तस्वातीअश्विनीपुष्येषुपंचनक्षत्रेषुशवप्रतिकृतेर्दाहः श्रेष्ठः इदमखिलमाशौचात्परतः अनंतरम् मध्येतुयथासंभवंकिंचिदु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णांगीकारेणाचार्यम् ५१ अथमूलनक्षत्रजातस्यविशेषमुपजातिकयाह अभक्तमिति नारदः अ
भुक्तमूललक्षणंज्येष्ठांत्यमूलादिभवंघटीचतुष्टयंजगौ ज्येष्ठांत्यघटीचतुष्टयंमूलादिघटीचतुष्टयंचेत्य
र्थः नारदः योज्येष्ठामूलयोरंतरालप्रहरजः शिशुः अभक्तमूलजः सार्पमघानक्षत्रयोरपि अयमेवमु
ख्यः पक्षः कश्यपादिबहुमुनिसंवादात्तु कश्यपः ज्येष्ठांत्यमूलयोरंतरालयामोद्भवः शिशुः अभक्तमूल
जः सोथत्वाश्लेषापित्र्ययोरपि वसिष्ठोपि भुजंगपौरंदरपौष्णभानांतदग्रभानांचतदंतरालम् अभक्त
मूलंप्रहरप्रमाणंत्यजेत्सतंतत्रभवांसकतांचेति वसिष्ठ एकद्विघटीमितंजगौज्येष्ठांते एकघटिकामूला

**अभक्तमूलंद्विघटीचतुष्टयंज्येष्ठांत्यमूलादिभवंहिनारदः वसिष्ठएकद्वि
घटीमितंजगौबृहस्पतिस्त्वेकघटीप्रमाणकम् ५२ अथोचुरन्येप्रथमाष्ट
घट्योमूलस्यशाक्रांतिमपंचनाड्यः** द्वंघटिकाद्वयमित्यर्थः इदंवसिष्ठेनकेचिन्मतमुक्त
म् यतस्तद्वाक्येकेचित् अपरेइतिपदोक्तेः तद्वाक्यंच ज्येष्ठांत्यपादघटिकामितमेवकेचिन्मूलंत्यभक्त
मपरेपुनरामनंति मूलाद्यपादघटिकाद्वितयेनसार्धमष्टौसमाःपरिहरेदिहजन्मभाजमिति बृहस्पति-
स्त्वेकघटीप्रमाणकंजगौ ज्येष्ठांत्यार्धघटिकामूलाद्याचार्धघटिकेत्यर्थः गुरुः ज्येष्ठांत्यघटिकार्धंचमूला
दौघटिकार्धकं तयोरंतर्गतानाडीत्यभक्तंमूलमुच्यतइति ५३ अथान्ये आचार्याउपजातिकयाहुः अ-
थोचुरन्यइति आचार्याःप्रोचुःमूलस्यप्रथमाअष्टघटिकाः शाक्रस्यज्येष्ठायाः अंतिमाः पंचनाडिकाएव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुभयोरंतरालेत्रयोदशघटिकाअभुक्तसंज्ञकाः प्रोचुरुक्तंचज्येष्ठांत्याघटिकाः पंचमूलाद्यावसुनाडिकाः अभुक्तमितिनक्षत्रेणंतत्रजातंशिशुंत्यजेदितितत्फलमाह तत्राभुक्तमूलेजातंशिशुंबालंबालांवापितापरित्यजेत् त्यागाशक्तौवापिताअस्यबालस्याष्टसमाअष्टौवर्षाणिमुखंनपश्येत् नारदः अभुक्तमूलजंपुत्रंपुत्रीमपिपरित्यजेत् अथवाब्दाष्टकंतातस्तन्मुखंनविलोकयेदिति अत्रघटीनांन्यूनाधिक्यकथनंदोषस्याधिक्याल्पत्वकथनार्थंज्ञेयम् ५४ अथमूलाश्लेषाजातस्यचरणवशेनफलमुपजातिकयाह आद्येपितेति मूलप्रथमचरणेजातस्यबालस्यपितानाशंशमोतिद्वितीयचरणेजननीमातानाशंशा

जातंशिशुंतत्रपरित्यजेद्वामुखंपितास्याष्टसमानपश्येत् ५५ आद्येपितानाशमुपैतिमूलपादेद्वितीयेजननीतृतीये

मोति सापत्नमातरिमातृशब्दोगौणस्तेनगौणमुख्ययोर्मुख्येकार्यसंप्रत्ययइतिजननीपदप्रयोगः तृतीयचरणेधनंनश्यति चतुर्थेश्चरणेबालस्यशमः अत्रविशेषोनारदेनोक्तः दिवाजातस्तुपितरंरात्रौजननींतथा आत्मानंसंध्ययोर्हंतिनास्तिगंडोनिशामयः वसिष्ठस्तु मूलाद्यपादेयदिरात्रिभागेतदात्मनोनास्तिपितुर्विनाशम् द्वितीयपादेदिनगेयदिस्यान्मातुरल्पोपितदास्तिदोषः अथानंतरंशांत्यामूलाश्लेषाशांत्यास्वनुष्ठितयासर्वत्रचरणचतुष्टयेपिशुभम् अनिष्टफलनाशकंकल्याणंस्यात् शास्त्रोक्तरीत्यास्वसुसूतकांतेमासेतृतीयेप्यथवत्सरांतेइतिकालत्रयंवसिष्ठेनोक्तम् गंडेतुविशे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षः मातृगंडेस्फुतंजातंसूतकांतेविचक्षण कुर्यात्शांतिंतदृक्षेवातद्दोषस्यापनुत्तये शिष्टास्तु सर्वत्रापि यन्नक्षत्रेजन्मतन्नक्षत्रएवशांतिरिनित्यंवहरंति अथाहिभेविलोममिति आश्लेषायांमूलपादोक्तंफलंविलोमंविपरीतंज्ञेयम् मूलस्यप्रथमपादेपितृनाशउक्तंसआश्लेषाचतुर्थपादोत्पन्नस्य द्वितीयपादेमातृनाशःसआश्लेषातृतीयचरणे तृतीयचरणेधननाशउक्तःसआश्लेषाद्वितीयचरणे चतुर्थचरणेशुभमुक्तम् तदाश्लेषाप्रथमचरणेज्ञेयं अत्रबहुविचारोस्तिग्रंथभूयस्त्वभयान्नलिख्यते अथकेश्चिन्मूलवृक्षादिविचारउक्तः जयार्णवेमूलंस्तंभंत्वचाशाखापत्रंपुष्पंफलंशिखा सुनयोष्टौदिशोरुद्राः सूर्याःपंचाब्धयोग्नयः मूलेतुमूलनाशःस्यात्स्तंभेवंशविनाशनम् त्वचिमातुर्भवेत्क्लेशःशाखायांमा

धनंचतुर्थेस्यशुभोथशांत्यासर्वत्रसत्स्यादहिभेविलोमम् ५५

तुलस्यच पत्रेराज्यंविजानीयात्पुष्पेमंत्रिपदंस्मृतम् फलेचविपुलालक्ष्मीःशिखायामल्पजीवितम् अथमूलपुरुषयोगेपटीन्यासस्तत्रैव मूलस्यघटिकान्यासोमूर्ध्निपंचनृपोभवेत् सुखेसप्तमृतिःपित्रोःस्कंधेवेदामहाबलः बाह्वोरष्टौबलीपाण्योस्तिस्रोहत्यान्वितोभवेत् हृदिखेटाभूपमंत्रीनाभौद्वौब्रह्मविद्भवेत् शुल्वेदशातिकामीस्याज्जानुनोःषण्महामतिः पादयोःषट्मृतिस्तस्येत्युक्तवान्कमलासनइति अथमूलोद्भूतकन्यायाःफलार्थंमूलांगविभागस्तत्रैव वनस्त्रीनाडिकाःशीर्षेकुर्वंतिपशुनाशनम् सुखेषट्धनहानिःस्यालंठेपंचधनागमः कौटिल्यंहृदयेपंच बाह्वोर्विज्ञागमंततः वेदाःपाण्योर्दयांधर्मंवेदागुह्ये ३८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिकामिनी ज्येष्ठमातुलनाशश्चजंघयोर्युगनाडिका ज्येष्ठभ्रातृविनाशश्चततस्त्रोजानुयुग्मके मादयो
र्दशनाऽश्वश्चतत्र वैधव्यमादिशेत् इतिमूलप्रसूतायामुनिभिःफलमीरितम् अथाश्लेषाजातयोःपुत्र
कन्ययोरंगविभागेनफलंतत्रैव मूर्ध्निपंचसुराज्याप्तिर्मुखेसप्तपितृक्षय नेत्रेद्वेजननीनाशोग्रीवायांस्त्री
षुलंपट स्कंधेदशगुरौभक्तिर्हस्तेष्टौचबलीभवेत् हृद्येकादशभिश्चात्मघातीसंजायतेनरः स्त्रीवानाभौ
भ्रमः षड्भिर्गुदेनवतपोधनः पादेपंचधनंहंतिसार्पादेतत्फलंक्रमात् अथाश्लेषारक्षोपितत्रैवोक्तः फ
लंपुष्पंदलंशारवाल्लग्नलतास्कंधएवच सार्पवल्यांदशाक्षांकस्वरविश्वार्कसागराः नाडिकास्तद्वेबालेफ
लंज्ञेयंयथाक्रमम् श्रीःश्रीराजभयंहानिर्मातृपित्रात्मसंक्षयइति अयंविभागोनक्षत्रस्यषष्टिघटिका

स्वर्गेशुचिप्रोष्ठपदेषमाघेभूमौनभःकार्तिकचैत्रपौषे

त्मकोज्ञेयः न्यूनातिरिक्तेअनुपातः ५५ अथमूलनिवासंसफलमिंद्रवज्रयाह स्वर्गइति शुचिराषाढश्रो
ष्ठपदोभाद्रपदः इषआश्विनः माघः प्रसिद्धः एषुमासेषुमूलनक्षत्रंस्वर्गेस्ति श्रावणकार्तिकचैत्रपौषेषुभू
मौतिष्ठति तपस्यःफाल्गुनः शुक्लोज्येष्ठः फाल्गुनमार्गशीर्षवैशाखज्येष्ठेषु अधःपातालेमूलंतिष्ठति तत्फ
लंच यदामूलनक्षत्रंयस्मिन्मासेयत्रभवतितत्रैवस्वर्गमृत्युपातालेषेवभोक्तृशुभाशुभफलंददाति ने
नद्रव्याद्यभावेस्वर्गपातालस्थेमूलेदोषाभावाद्भांतेरनावश्यकत्वंज्ञेयम् यदातुभूमावेवमूलं तदाशांति
रवश्यंविधेयेतिशक्रेन उक्तंज्योतिषार्णवे भूमिष्ठंदोषबहुलंस्वल्पमन्यत्रसंस्थितमिति ज्योतिर्निबंधे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलाश्विपित्र्यचरणेप्रथमेचनूनंपौष्णेंद्रयोश्चफणिनश्चतुरायपादे मातुःपितुःस्वपुषोविकरोतिनाशंजातोयदानिशिदिनेप्यथसंध्ययोर्वेति तत्रापिशांत्याशुभंभवतीतिज्ञेयम् ५६ अथमूलप्रसंगादुष्टेषुगंडांतादिनिमित्तेषुजातस्यारिष्टपरिहारंचशार्दूलविक्रीडितेनाह गंडांतेंद्रभेति एतेषुशिशोरुत्पत्तिर्नाशस्तादुष्टफलदा गंडांतंतिथिनक्षत्रलग्नानांसंधिः तल्लक्षणंज्येष्ठापौष्णमेत्यादिनावक्ष्यति इंद्रभंज्येष्ठानक्षत्रं शूलयोगः पातोमहापातः परिघव्याघातगंडयोगाः अवमस्तिथिक्षयःसंक्रांतिः सूर्यसंक्रमणपुण्यकालः व्यतीपातवैधृतीयोगौ सिनीवाल्यदृष्टेंदुरमावास्या कुहूर्नष्टेंदुरमावास्या सादृष्टेंदुःसि

मूलेंद्वधस्तात्तुतपस्यमार्गवैशाखशुक्लेषशुभंचतत्र ५६ गंडांतेंद्रभशूलपात परिघव्याघातगंडावमेसंक्रांतिव्यतिपातवैधृतिसिनीवालीकुहूदर्शके वज्रेकृष्णाचतुर्दशीषुयमघंटेदग्धयोगेमृतौविष्टौसोदरभेजनिर्नपितृभेशस्ताशुभाशांनितः ५७ नीवालीसानष्टेंदुकलाकुहूरित्यभिधानात् दर्शश्चेंद्रदर्शनरहितामावास्या एतद्दोषेप्रतिपादयिष्यते वज्रेवज्रयोगे कृष्णपक्षचतुर्दश्याम् यमघंटेमघाविशाखेत्यर्क्षेदग्धयोगे सूर्येशपंचाग्निरसाष्टनंदादित्यर्क्षेः मृतौदीशात्तोयादित्यर्क्षेर्मृत्युयोगे विष्टौभद्रायाम् सोदरस्यभ्रातुर्भगिन्यावानक्षत्रे पितृभेमातानचपितानचपितरौतयोर्भे मातृभेपितृभेच एषुनिमित्तेषुसुतस्यशुभायावाजन्मचेत्स्यात्तदानिष्टकृत्स्यादित्यर्थः दुष्टनिमित्तस्योपलक्षणत्वात्त्रीतरजन्माप्यनिष्टम् सजातीयापत्यप्रसवानं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तरंविजातीयापत्यप्रसवरूपांतरः यथापुत्रत्रयप्रसवानंतरंकन्याजन्म कन्यात्रयप्रसवानंतरंपुंजन्म सा
जनिःशांतिनः वसिष्ठादिप्रोक्तशांत्यास्वनुष्ठितयाशुभा परिणामस्फरदायिनीत्यर्थः ५७ अथशांतयो
लिख्यंते तत्रप्रथममूलशांतिरुच्यते शौनकउवाच अथातःसंप्रवक्ष्यामिमूलजातहितायच भाता
पित्रोर्धनस्यापिकुलेशांतिहितायच जातस्यद्वादशाहेतुजन्मर्क्षेवाशुभेदिने समाप्तकेवामतिमान्कुर्या-
द्दाशांतिमादरात् वसिष्ठः सरसमेपुण्यदेशेतुमंडपंकारयेद्बुधः कुंडंचनद्वहिःकुर्याद्धृदयज्ञोक्तमार्गतः पं
चामृतंपंचगव्यंपंचपल्लवानिच उदुंबरवटाश्वत्थप्लक्षाम्रकसपल्लवाः शतौषधीमूलशंखनवरत्ना
निमृत्तिकाः कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनम् वचाचंपकमुस्ताचसर्वौषध्योदशैवहि गजाश्वरथ्याव
ल्मीकसंगमस्थानसंभवा ह्रदगोराजनगरद्वारतश्चाष्टमृत्तिकाः शतौषधीमूलानिच अश्मरी १ सहदेवी२
अपराजिता ३ मुंडा ४ उशीर ५ वाला ६ अधःपुष्पी ७ शंखपुष्पी ८ ज्येष्ठीमधु ९ कोरकः १० चक्रांकिता
११ विष्णुक्रांता १२ शिवक्रांता १३ मयूरशिखा १४ काकजंघा १५ भृंगराज १६ कुमारी १७ हय १८ कर्णिका
र १९ अपमार्ग २० बिल्व २१ षण्मूला २२ अंबुज २३ उत्तरा २४ पुत्रजीव २५ दूर्वा २६ काश २७ कुश २८ सा
ल २९ नाल ३० चक्रमर्द ३१ सिंही ३२ व्याघ्री ३३ अर्क ३४ प्लक्ष ३५ पलाश ३६ पिंपल ३७ वट ३८ उदुं
बर ३९ तुलसी ४० उत्पल ४१ शतपत्र ४२ अतसी ४३ सारिवा ४४ कदंब ४५ बकुल ४६ शमी ४७ शाहिक
४८ निर्गुंडी ४९ मुंडी ५० दंडी ५१ ब्राह्मी ५२ अशोक ५३ सूर्यभक्ता ५४ रुद्रजटा ५५ कदली ५६ बीजपू
रक ५७ मदनक ५८ मुसली ५९ पुनर्नवा ६० आम्र ६१ पाटल ६२ श्रीपर्णी ६३ करवीर ६४ चंपक ६५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुडूची ८६ देवदारू ८७ अगरू ८८ चंदन ८९ कुटज ९० शिग्रु ९१ हरिद्रा ९२ जटामांसी ९३ वचा ९४
कुष्ठ ९५ तज ९६ दारुहरिद्रा ९७ बंधुजीव ९८ सिंधुवार ९९ सटी १०० अश्वगंधा १०१ मुरटा १०२ कुरंटक
१०३ पनस १०४ जीवक १०५ जाती १०६ मालती १०७ मधूक १०८ खदिर १०९ सप्तच्छद ११० सिरीष १११ काकमाची
११२ शतावरी ११३ केतकी ११४ जंबु ११५ शाका ११६ वेतस ११७ आमलक ११८ सरल ११९ गिरिकर्णी १२० इति
तिलमाषयवव्रीहिगोधूमानिप्रियंगवः चणकैःसहिताःसप्तसप्तबीजानिचसर्वदा वज्रमौक्तिकवैडूर्यपुष्प
रागेंद्रनीलकम् पंचरत्नमिदंप्रोक्तंमंत्रैःकुंभेषुनिक्षिपेत् ऋवर्णेनप्रमाणेनतदर्धार्धेनवापुनः निर्ऋति
पतिमांकुर्याद्वित्तशाठ्यविवर्जितः अत्रविशेषः शौनकेन पलमानेनवार्धेनपादेनाथस्वशक्तितः नक्ष
त्रदेवतारूपंकारयित्वाविचक्षणः यद्वामूल्यंऋवर्णस्यस्थापयित्वाप्रपूजयेत् ऋवर्णसर्वदेवात्मंसर्वदेवा
त्मकोनलः सर्वदेवात्मकोविप्रःसर्वदेवमयोहरिरिति वस्त्राणिषोडशाष्टौचशुक्लसूक्ष्माण्यतंद्रितः आ
ह्मणान्वरयेत्पश्चात्स्वस्तिवाचनपूर्वकम् श्रोत्रियाश्चतुरोवाष्टौद्वादशत्वथषोडश प्रधानाचार्यमेतेषांश्रे
ष्ठंतत्प्रतिमार्चने ईशानादिचतुःकोणेषब्रणान्जलपूरितान् पूर्वोक्तद्रव्यसंयुक्तान्त्स्थापयेद्ऋवर्ण
कान् विप्रान्पृथकपृथक्वापिमधुपर्कादिनार्चयेत् द्वारेषुजापकानष्टौद्वौद्वौचवरयेत्पुनः अब्लिंगैर्वारु
णैर्मंत्रैः शुक्लपुष्पाक्षतादिभिः तत्तत्कुंभेजलंस्पृष्वाकुशकूर्चैर्जपेदिति रुद्रसूक्तंचभद्राग्नेरानोभद्राइति
क्रमात् पुरुषसूक्तंचतन्मंत्रैर्देवान्प्यालापयेत्ततः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् पंचगव्यमि
दंकुंभेक्षिपेद्बजमदान्वितम् रजतंकांचनंताम्रंविद्रुमंतीर्थवारिच निक्षिपेद्धेममूलंचदशाष्टयवनिर्मि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तम् देवदारुचशैलेयंपद्मंनीलोत्पलंतथा वचांलोध्रंप्रियंगुंचशतछिद्रेघटेक्षिपेत् वंशपात्रोपरिन्यस्तं
शतछिद्रेघटेस्थितम् ततश्चनिर्ऋतिंदेवमर्चयेत्पश्चिमामुखम् गोषुणास्तितिमंत्रेणशंकुंवस्त्राक्षतादि
भिः मूलरूपंविधातव्यंशामंकुणपवाहनम् खड्गखेटधरंचोग्रंदिग्भंजंचरुकाननम् स्थापयेतंग्रहांश्चै
ववस्त्रगंधादिभिर्यजेत् चरुंचश्रपयेत्तत्रनैर्ऋतंदुष्कृतापहम् तत्रचत्वारःकुंभाश्चतुर्दिक्षुस्थाप्याः ए-
कःकुंभोरुद्रस्थापनार्थमन्यःस्थाप्यः एकः शतछिद्रः कुंभः तस्मिन्कुंभेदेवदारुशैलेयमित्याद्यौषधानित-
थासरुवर्णमूलंअष्टादशयवपरिमितंनिक्षिप्यतदुपरिवंशादिपात्रंनिधायतदुपरिवस्त्रंनिधायतत्रनिर्ऋ
तिप्रतिमांरुद्रप्रतिमाजलप्रतिमासहितांस्थापयेत् ततःषोडशोपचारैःपंचोपचारैर्वापूजयेत् एकंचशौनके
न पुण्यग्निर्मन्त्रितैस्तोयैःप्रोक्षितायांक्षितौततः तत्रोदकुंभंसश्लक्ष्णंरक्तंव्रणविवर्जितम् अरुष्यामूलं
निर्णिक्तंपूरयेन्निर्मलांभसा आकलशोधित्यनयाकलशस्थापनंशंकुम् इमंमइतिमंत्रेणपूरयेत्तीर्थवारि
णा कुंभंचवस्त्रगंधाद्यैस्तत्तन्मंत्रैःप्रपूजयेत् याःफलिनीरित्यनयाक्षिपेद्दौषधादिकम् वस्त्रावगुंठितं
कुर्यात्पूरयेत्तीर्थवारिणा कूर्चहेमसमायुक्तंचूतपल्लवसंयुतम् स्वस्तिकोपरिविन्यस्यक्षीरद्रुमसपल्लवै-
द्रोणव्रीहींश्चनिक्षिप्यईशानेचनिधापयेत् पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितम् अर्चितंगंधपुष्पाद्यैः
श्रीरुद्रंतत्रसंजपेत् तत्रप्रतिरथंसूक्तंशतरुद्रानुवाककम् रक्षामंत्रंतथापुण्यंरक्षोघ्नंचस्पृशन्जपेन्नियं
वकंजपेत्सम्यगशोत्तरसहस्रकम् एकवारंतथाजापीपावमानीस्पृशन्जपेत् जपस्यपंचकुंभाश्चदूर्वान
दलाप्लुतः श्रीरुद्रस्यैककुंभंचसर्वसूक्तानितत्रतु तथान्यंपंचमंकुंभंपूर्वोक्तैर्लक्षणैर्युतम् चतुःप्रस्रवणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुर्यात्पंचवक्त्रंचतद्वेत् वस्त्रावगुंठितंकुर्यात्सूरयेत्तीर्थवारिणा पंचरत्नसमायुक्तमाम्रपल्लवसंयुतम् एत
स्मिन्नपिपंचरत्नससमृत्तिकाशतमूलदेवदारुप्रभृत्यौषधहेममूलानिक्षिपेत् तत्रशतमूलालाभे विष्णु-
क्रांतासहदेवीतुलसीचशतावरी मूलानीमानिगृण्हीयाच्छतालाभेविशेषतः तस्योपरिन्यसेत्पात्रंस्वर्णंवा
रौप्यमृन्मयम् शुद्धवस्त्रेणसंछाद्यशतमूलानिनिक्षिपेत् कुंभोपरिन्यसेद्विद्वान्मूलनक्षत्रदैवतम् अधिप्र
त्यधिदेवौचदक्षिणोत्तरदेशयोः अधिदेवंजपेदादौज्येष्ठानक्षत्रदैवतम् एवंप्रत्यधिदेवंचपूर्वाषाढर्क्षदैवत
म् स्वलिंगोक्तैश्चमंत्रैश्चप्रधानादीन्यपूजयेत् पंचामृतेनसंस्नाप्य आवाह्याथसमर्चयेत् उपचारैःषोडश
भिर्यद्वापंचोपचारकैः रक्तचंदनगंधाद्यैःपुष्पैःकृष्णासितादिभिः मेषशृंगादिधूपैश्चघृतदीपैस्तथैवच
सक्षीरपोलिकमांसाद्यैर्नैवेद्यैर्भोजनादिभिः मत्स्यमांससुरादीनिब्राह्मणानांविवर्जयेत् सुरास्थानेप्रदा
तव्यं क्षीरंसैंधवमिश्रितम् पायसंलवणोपेतंमांसस्थानेप्रकल्पयेत् उक्तगंधाद्यलाभेतुयथालाभंस-
मर्पयेत् सुष्यांतंतुसमभ्यर्च्यहोमंकुर्याद्यथोदितम् निर्वापप्रोक्षणादीनिचरोःकुर्याद्यथाविधि हविर्गृ-
हीत्वाविधिनैर्ऋतेर्वक्त्रमाहुनेत् अत्रवसिष्ठेनविशेषोभिहितः मूलंप्रजामितिमंत्रद्वयस्यकण्वऋषि-
र्निर्ऋतिर्देवता अनुष्टुप्छंदः मूलायस्वाहा प्रजापतयेस्वाहेत्यपहोममंत्रौ पलाशसमिदाज्येनचरुणाष्ट
सहस्रकम् अथवाष्टोत्तरशतंप्रत्येकंजुहुयात्ततः मूलंप्रजामित्यृषिर्वाक्येर्मंत्रद्वयेनच सावित्रसौम्य
नैर्ऋत्यमंत्रैरश्वत्थसंभवैः समिद्भिश्चतिलव्रीहीन्हुत्वाव्याहृतिभिस्ततः मूलंप्रजामित्यृषौचवाक्यान्या-
चार्यकोजपेत् अष्टोत्तरसहस्रंवाशतंवानियतात्मवान् अयंहोमप्रकाररुक्शास्त्रांतरविषयोध्येयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मोषुणःपरापरेनियत्तेदेवेतिवापुनः पायसंघृतसंमिश्रंहुनेदष्टोत्तरंशतम् समिदाज्यचरूत्पञ्चाच्छक्ति
तःसंख्ययाहुनेत् अधिदैवतयोश्चैवजुहुयात्तत्तन्मंत्रकैः नक्षत्रदेवताभ्यश्चपायसेनतुहोमयेत् कृणु
ष्वेतिपंचदशभिर्जुहुयात्कुसरंततः गायत्र्याजातवेदसेत्रियंबकमितिक्रमात् सीरायुंजंतिनामग्निंवा
स्तोष्पत्यग्निमेवच क्षेत्रस्यपतिनागृणानाग्निंदूतंतथैवच श्रीसूक्तेनतथाविद्वान्समिदाज्यचरून्क्र-
मात् अष्टोत्तरशतैर्वाथ अष्टाविंशतिभिःक्रमात् अष्टाष्टसंख्ययावापिजुहुयाच्छक्तितोबुधः त्वंनःसो
मेनपायसंजुहुयात्तुत्रयोदश चतुर्गृहीतमाज्यंचयातेरुद्रेतिमंत्रतः स्रुवेणजुहुयादाज्यंमहाव्याहृतिभिः
क्रमात् हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्ताहुतीर्हुनेत् आचार्योयजमानोवा अग्नौपूर्णाहुतिंहुनेत् हो
मशेषंसमाप्याथवन्हिमारोपयेत्ततः कुंभाभिमंत्रणंकुर्याद्दक्षिणेनाभिमंत्रयेत् मृत्कप्रशमनार्थाय
जपेच्च्यंबकंशतम् रुद्रकुंभोक्तमार्गेणरुद्रमंत्रंस्पृशन्जपेत् धूपंदीपंचनैवेद्यंकुंभयुग्मेनिवेदयेत् प्र
सादयेत्ततोदेवमभिषेकार्थमादरात् भद्रासनोपविष्टस्ययजमानस्यऋत्विजः दारपुत्रसमेतस्यकुर्युः
सर्वेभिषेचनम् अक्षीभ्यामितिसूक्तेनपावमानीभिरेवच आपोहिष्ठेतिनवभिरापइद्वादयेनच सह
स्राक्षतृचेनापिदेवस्यत्वेतिमंत्रकैः शिवसंकल्पमंत्रेणवक्ष्यमाणैश्चमंत्रकैः योसौवज्रधरोदेवोमहेंद्रो
गजवाहनः मूलजानशिशोर्दोषंमातापित्रोर्व्यपोहतु योसौशक्तिधरोदेवोहुतभुक्छ्येषवाहनः सप्तजि
ह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु योसौदंडधरोदेवोधर्मोमहिषवाहनः मूलजानशिशोर्दोषंव्यपोहतु
यमोमम योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः प्रशामयतुमूलोत्थंदोषंगंडांतसंभवम् योसौपाश

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धरोदेवोवरुणश्चजलेश्वरः नक्रवाहःप्रचेताश्चोमूलोत्थंव्यपोहतु योसौदेवोजगत्प्राणोमारुतोमृ
गवाहनःप्रशामयतुमूलोत्थंदोषंबालस्यशांतिदः योसौनिधिपतिर्देवःखड्गभृन्नरवाहनः मातापि
त्रोःशिशोश्चैवमूलदोषंव्यपोहतु योसोपशुपतिर्देवःपिनाकीवृषवाहनः आश्लेषामूलगंडांतंदोषमा
शुव्यपोहतु विघ्नेशःक्षेत्रपोदुर्गालोकपालानवग्रहाः सर्वदोषप्रशमनंसर्वेकुर्वंतुशांतिदा नच्छंयोर-
भिषेकंतुसर्वदोषोपशांतिदम् सर्वकामप्रदंदिव्यंमंगलानांचमंगलम् वस्त्रांतरितकुंभाभ्यांपश्चात्तु
स्नापयेद्बुधः ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः यजमानोदक्षिणाभिस्तोषयेदृत्विगादिकान्
धेनुंपयस्विनींदद्यादाचार्यायसवत्सकाम् निर्ऋतिप्रतिमांकुंभंवस्त्रंहेमंचदापयेत् यद्दार्थवस्त्रप्र
तिमास्तस्मैदद्यात्प्रयत्नतः श्रीरुद्रजापिनेदेयः कृष्णोनड्वान्प्रयत्नतः तत्कुंभवस्त्रप्रतिमास्तस्मैद
द्यात्प्रयत्नतः उक्तालाभेनतोदद्यादाचार्यब्रह्मऋत्विजाम् तत्तन्मूल्यंप्रदातव्यंशक्त्यावाथमदापयेत्
दद्याद्दध्नंपायसादिब्राह्मणान्भोजयेच्छतम् अलाभेसतिपंचाशद्दशकंतदलाभतः सर्वशांतेश्चपठ
नमाशिषांग्रहणंतथा गृहीक्षमापयेद्विद्वान्निर्ऋतिःप्रीयतामिति इतिशौनकीयेमूलशांतिः ७ ७
अथाश्लेषाशांतिरप्येवमेवकार्या तत्रविभवेपूर्वोक्तवत्पंचकुंभास्थाप्याः असंभवेकुंभद्वयम् एकत्ररु
द्रस्थापनम् द्वितीयेआश्लेषाप्रतिमास्थापनम् अभिमंत्रणादिपूर्ववत् तत्राश्लेषाप्रतिमासर्पाकारा
अधिदैवतरुद्रस्थानप्रतिमा प्रत्यधिदैवतपितृप्रतिमास्थाप्यापूज्याच नमोस्तुसर्पेभ्यइतिपूजामंत्र
इतीरितः सर्पोरक्तस्त्रिनेत्रश्चद्विभुजःपीतवस्त्रकः फणकाधिधरस्तीक्ष्णोदिव्याभरणभूषितः एवं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्यात्मातनोभ्यर्च्यहोमकर्मसमारभेत् अभिषेकेविशेषः आश्लेषार्क्षजानस्यमातापित्रोर्धनस्य च भ्रातृज्ञातिकुलस्थानांदोषंसर्वंव्यपोहतु पितरःसर्वभूतानांरक्षंतुपितरःसदा सार्पनक्षत्रजातस्यवित्तंचज्ञातिबांधवान् सर्पाधीशनमस्तुभ्यंनागानांचगणाधिप गृह्णाणार्घ्यमयादत्तंसर्वारिष्टप्रशांतये इत्यर्घ्यमंत्रः मूलनक्षत्रवत्कुर्यात्सर्वदोषेष्वनामतः एतच्चमूलाश्लेषाशांतिकद्वयंविवाहेऽपस्थितेश्वशुरश्चश्वश्वाश्चसत्वेमूलाश्लेषोत्पन्नयोरपिवधूवरयोस्तत्तदरिष्टनिवृत्यर्थंविधेयम् उपलक्षणत्वाच्चज्येष्ठाविशाखोत्पन्नायावध्वावरस्यज्येष्ठबंधुकष्टशांतयेच नारदः मूलजाश्वशुरंहंतिव्यालजाचतदंगनाम् ऐंद्रीपत्यग्रजंहंतिदेवरंतुद्विदैवजा शांतिर्वापुष्कलाचेत्स्यान्नार्हिदोषोनकश्चनेति श्लेषाशांतिः अथगंडशांतिः गंडशांतिंप्रवक्ष्यामिसोममंत्रेणभक्तिमान् कांस्यपात्रंप्रकुर्वीतपलैःषोडशभिर्नवम् अष्टाभिश्चचतुर्भिर्वाद्राभ्यांवाशोभनंतथा तन्मध्येपायसंशंखेनवनीतेनपूरिते राजतं चंद्रमभ्यर्च्यमितपुष्पसहस्रकैः दैवज्ञःशुक्लवासास्तःशुक्लमाल्यांबरार्चितः सोमोहमितिसंचिंत्यपूजां कुर्यादतंद्रितः दद्याद्दक्षिणामिष्टांगंडदोषप्रशांतये शुक्लंवागीश्वरंचैवताम्रपात्रसमन्वितम् गंडदोषोपशांत्यर्थंदद्याद्देवविदेशुचि अत्रापिपूर्ववत्प्रतिमाकलशहोमाभिषेकादिकंकार्यम् तिथिगंडेचनड्वाहंनाक्षत्रेधेनुरुच्यते कांचनंलग्नगंडेतुगंडदोषोविनश्यति आद्यभागेपितुर्गंडेत्रयाणामभिषेचनम् इतरत्रशिशोर्मातुरभिषेकंचकारयेत् अन्यच्च उत्तराश्चित्रासूपूर्वाषाढोद्भवस्यचकुर्यात्शांतिंप्रयत्नेननक्षत्राकारजांबुधैः चित्राद्यर्द्धेपुष्यपादेद्वितीयेपूर्वाषाढाधिष्ण्यपादेद्वितीयेजा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तःपुत्रश्चोत्तराद्येविधानीमातापित्रोर्भ्रातुरप्यात्मनश्च द्विमासश्चोत्तरादोषःपुष्यश्चैवत्रिमासिकः
पूर्वाषाढाश्लेषामूलेचाष्टौसमाःस्मृताःज्येष्ठामासेपंचदशेपुत्रदर्शनवर्जिता उत्तरेतिलपात्रंस्यात्तिष्येगोदानमिष्यते अजाचित्राऽश्वदेवेयापूर्वाषादेतुकांचनम् यवांश्चवीहिमाषांश्चतिलमुद्गांश्चदापयेत् यथावित्तानुसारेणकुर्याद्ब्राह्मणभोजनम् पितुरायुष्यवृध्यर्थंशांतिरत्रविधीयते इतिगंडांतादिशांतिः अथज्येष्ठाशांतिः भरद्वाजःज्येष्ठादौमातृजननींमातामहंद्वितीयकेतृतीयेमातुलंहंतिचतुर्थेजननींतथा आत्मानंपंचमेहंतिषष्ठेगोत्रक्षयोभवेत् सप्तमे कुलनाशःस्यादष्टमेज्येष्ठसोदरः नवमेश्वशुरंहंतिसर्वस्वंदशमेतथेतिप्रत्येकंघटिकाषट्कस्यफलमुक्तं अत्रापिमूलशांतिवत्सर्वंकार्यम् तत्रविशेषः घटिकैकाचमैत्रांतेज्येष्ठादौघटिकाद्वयम् तयोःसंधिरितिज्ञेयंशिशुगंडांतमीरितम् ज्येष्ठांत्यपादस्तुपितुःस्वस्यचापिविनाशकः ज्येष्ठर्क्षेकन्यकाजातांहंतिशीघ्रंधवाग्रजम् शांतिंतस्यप्रवक्ष्यामिगंडदोषप्रशांतये तत्रचतुर्दिक्षुकुंभचतुष्टयंसंस्थाप्यतन्मध्येशतछिद्रंपंचमंकुंभंसंस्थाप्यपूर्ववत्पूजादिविधायतत्र वज्रांकुशधरंदेवमैरावतगजान्वितम् कुर्याच्छचीपतिंरम्यंदेवेंद्रंसुरनायकम् शालितंडुलसंपूर्णकुंभस्योपरिपूजयेत् इंद्रायेंदोमरुत्वतइतिमंत्रेणवाग्यतः
पूजयेद्विधिनासम्यग्लोकपालगणान्वितम् रक्तवस्त्रद्वयोपेतंदेवराजंशचीपतिम् पूजयेद्वारुणैर्मंत्रैः
कुंभान्धीमान्प्रयत्नतः त्वन्नोअग्नेजपेदादौसत्वन्नोपिद्वितीयके समुद्रज्येष्ठाइतिचेममंमेगंगेचतुर्थकम्
पूजयेद्रत्नगंधाद्यैश्चतुरःकलशानपि आनोभद्राजपंचादौभद्राअग्नेद्वितीयकम् इंद्रसूक्तंरुद्रजा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्यंजपेन्मृत्कुंजयंततः समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्तरंशतम् सर्पिषाचरुणाचैवमूलमंत्रेणवाग्यतः
हुनेज्जाप्यंचतेनैवयतरुंद्रुभयेतिच तिलान्व्याहृतिभिर्हुत्वाशतमष्टोत्तरंपृथक् ततोभिषेकः ततोरू
पंरूपमितिमंत्रेणतच्चक्षुरितिमंत्रेणआज्यावलोकनम् पुनर्देवतापूजनंकृत्वा नमोस्तुरुद्रनाथायन
मस्तुभ्यंशचीपते गृहाणार्घ्यमयादत्तंगंडदोषप्रशांतये अष्टोत्तरशतंसंख्याकुर्याद्ब्राह्मणभोजनम्
अन्यत्सर्वंतुपूर्ववत् इतिज्येष्ठाशांतिः दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ शूलेगंडेचपरिघेवज्रे
चयमघंटके कालगंडेमृत्युयोगेदग्धयोगसमन्विते तस्मिन्नांडदिनेप्राप्तेप्रसूतिर्यदिजायते अतिदोष
करीप्रोक्तातत्रपापयुतेसति विचार्यतत्रदैवज्ञः शांतिंकुर्याद्यथाविधि यजनंदेवतानांचग्रहाणांचैवपू
जनम् दीपंशिवालयेभक्त्यागोघृतेनप्रदापयेत् अभिषेकंशंकरायअश्वत्थस्यप्रदक्षिणम् अभीष्ट
फलसिध्यर्थंकुर्याद्ब्राह्मणभोजनम् गाणपत्यंपुरुषसूक्तंसौरंमृत्कुंजयंशुभम् शांतिजाप्यंपुनश्चैव-
कृत्वामृत्कुंजयीभवेत् इत्युत्तरगार्ग्येदुष्टयोगशांतिः कुमारजन्मकालेतुव्यतीपातश्चवैधृतिः संक्रां-
तिश्चरवेस्तत्रजातोदारिद्र्यकारकः नवग्रहमखंकुर्यात्तस्यदोषस्यशांतये यथमंगोमुखाज्जन्मततः
शांतिंसमाचरेत् गृहस्यपूर्वदिग्भागेगोमयेनानुलिप्यच अलंकृतस्वदेशेतुव्रीहिराशिंप्रकल्पयेत्
पंचद्रोणमितंधान्यंतदर्धंतंडुलेनच तदर्धंतुतिलैःकुर्यादन्योन्योपरिकल्पयेत् द्रव्यत्रितयराशौतुअ
ष्टपत्रंलिखेद्बुधः पुण्याहंवाचयित्वातु आचार्यवरयेत्पुरा राशौमतिहितंकुंभमम्बणंरूक्मनोहरम् ती
र्थोदकेनसंपूर्त्यसमृदौषधिपल्लवम् पंचगव्यंपंचरत्नंवस्त्रयुग्मेनवेष्टयत् तस्योपरिन्यसेत्पात्रंसूक्ष्म

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धरूपेणसंयुतम् प्रतिमांस्थापयेत्पश्चात्साधिप्रत्यधिदेवताम् चंद्रादित्यावुभौपार्श्वेमध्येवैधृतिमर्चयेत्
एवमेवव्यतीपातशांतौसंक्रमणस्यच अधिदेवंभवेत्सूर्यः चंद्रः प्रत्यधिदैवतम् ततोह्याहुतिपूर्वेणतत्त-
न्मंत्रेणपूजयेत् त्रियंबकेनमंत्रेणसोमपूजांसमाचरेत् उत्सूर्यइतिमंत्रेणसूर्यपूजांसमाचरेत् आप्या
यस्वेतिमंत्रेणसोमपूजांसमाचरेत् तत्राष्टोत्तरसहस्रं अष्टोत्तरशतंवा अष्टाविंशतिसंख्याजपंसर्वसौर
जपंच आनोभद्राअग्नेइतिसूक्तंपुरुषसूक्तंत्रियंबकंएतान्मंत्रान्कुंभान्स्पृष्ट्वाचतुर्दिक्षु जपंकुर्युः
त्रियंबकेनमंत्रेणसमिदाज्यचरून्हुनेत् अष्टोत्तरसहस्रम् अष्टोत्तरशतम् अष्टाविंशतिर्वा मृत्युंजये
नमंत्रेणतिलहोमंसमाचरेत् ततःसमुद्रज्येष्ठाश्चआपोहिष्ठेत्यृचेनच अक्षीभ्यामितिसूक्तेनपावमानी
भिःत्रियंबकेन उत्सूर्येतिआप्यायस्वेतिवैदिकमंत्रैः सुरास्त्वामभिषिंचंत्वित्यादिकैःपौराणमंत्रैश्चाभिषे
कंकुर्यात् ततआज्यावेक्षणम् अन्यद्दक्षिणादानादिकंपूर्ववत् इत्यत्तरगार्ग्येव्यतीपातवैधृतिसंक्रांतिशां
तिः अथकुहूसिनीवालीदर्शशांतिः तत्रयस्याः कस्याश्चिदमावास्यायाः अष्टौभागान्कृत्वाप्रथमविभा
गेचंद्रदर्शनमस्तिनवेतिविचार्यम् यदाचंद्रदर्शनंतदासिनीवाली यदाचंद्रादर्शनंतदादर्शः सकलचंद्रक्ष
यस्तदाकुहूरित्यर्थः तदुक्तंखंडदोगपरिशिष्टे इंदुक्षयकालः स्याद्दर्शकालइतिस्मृत्येंदुक्षयकालपरिगणन
मुक्तम् अष्टमेशेषचतुर्दशाः क्षीणोभवतिचंद्रमाः अमावास्याष्टमेभागेपुनः किलभवेदणुः अत्रेंदुरादौप्र
हरेच्चनिष्ठेत् चतुर्थभागोनकलावशिष्टः तदंतएवक्षयमेतिकृत्स्नएवंहिज्योतिश्चक्रविदोवदंतीतिए ४४
तत्कारिकाव्याख्यानंतद्ज्ञाप्यकारेणकृतम् यहरनवात्मकश्चंद्रक्षयकालइति तत्रामायाः सप्तमाष्टम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रहरोकृत्स्नक्षयकालः चतुर्दशीशेषयामदर्शादियामौचंद्रसूक्ष्मताकालइति तत्रायमंत्रविषयविवेकः यस्यांममावास्यायांप्रथमप्रहरेशास्त्रान्मत्यक्षतोवाचंद्रदर्शनंस्यात्सासिनीवालीसर्वदासिद्धा तत्रोत्पन्नस्यसिनीवालीशांतिर्विधेया अथतस्यामेवामावास्यायांयदानष्टेंदुकलालवंसचकृत्स्नक्षयकालोमावास्यायांअंतिमक्षणएवतस्यचसंक्रांतिसमयवदतिसूक्ष्मत्वेनदुर्ज्ञेयत्वात् अमावास्यायाःसप्तमाष्टमप्रहरयोःकृत्स्नक्षयकालस्यभाष्यकारेणपरिभाषितत्वात् सप्तमाष्टमप्रहरात्मकःकालः कुहूशब्दवाच्यस्तत्रोत्पन्नस्यकुहूशांतिः पुनस्तस्यामेवामावास्यायांप्रथमप्रहरानंतरंसप्तमप्रहरादर्वाक्प्रहरपंचकात्मकः कालोदर्शशब्दवाच्यइति तत्रोत्पन्नस्यदर्शशांतिर्विधेयेति एवमेकस्यामेवामावास्यायांकालभेदेनत्रयंसंभवति यदात्वमावास्यायांचंद्रदर्शनाभावः तदाद्वयमेवदर्शत्वंकुहूत्वरूपंसंभवतीति अत्रकेचिच्चतुर्दशीशेषेचंद्रदर्शनेसतिपरदिनेयाःमावास्यासासिनीवालीइत्याहुस्तन्न दृष्टश्चंद्रोयस्यामिति अन्यपदार्थस्यअमावास्यारूपस्यैवसामानाधिकरण्येनग्रहणात् किंचसिनीशब्देनश्वेताचंद्रकलावर्णवाचिनः श्वेतशब्दादूर्णादलुदात्तात्तोपधातोनइतिऊप्रत्ययकारोसिनीतांवलनेप्राप्नोतीतिसिनीवालीतिव्युत्पत्तिश्च चतुर्दश्युदितचंद्राश्रयायामेवामावास्यायांनयुज्यतेइतिचतस्माद्दृष्टेंदुःसिनीवालीत्यमावास्यैवाभिधीयतइत्येवन्यायः अथगोलगणितविदोन्यथासमादधुः तत्रस्याद्दृष्टेंदुसिनीवालीत्यादौउदयास्ताधिकारोक्तरीत्यादृक्कर्मद्वयसंस्कृतस्यदर्शनयोग्यत्वेसतिप्राक्क्षितिजकांतिवृत्तसंबंधवत्वंग्रहादेर्दर्शनशब्दवाच्यंमेघाद्यावरणेतुशास्त्रीयदर्शनेदृशिर्वर्त्तते आत्माद्रष्टव्यइत्यादिवत् तथैवदर्शनायोग्यत्वेस-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिपाक्षिनिजसंबंधवत्त्वमदर्शनशब्दवाच्यमित्यदर्शनलक्षणम् अतश्चंद्रदर्शनलक्षणवत्त्वमावास्या
सिनीवालीनाम चंद्रादर्शनलक्षणवत्त्वमावास्याकुहूनाम लक्षणद्वये नाक्रांता मावास्यादर्शशब्दवा-
च्यइति अयमाशयः यदामावास्यासूर्योदयात् प्राक्घटिकात्रयवर्तीतदादृक्कर्मसंस्कारवशेनचंद्रस्यदृश्य
त्वभागतंचेत्तदासासंपूर्णा मावास्यासिनीवालीनाम सादृश्यमायांद्वितीयसूर्योदयावधिकायामुत्प-
न्नस्यारिष्टशांतयेसिनीवालीशांतिस्तत्फलंचादेश्यम् अथतिथिदृद्धौवातस्या अमावास्यायाद्वितीयसू
र्योदयानंतरमवशिष्टामावास्याघटीषूत्पन्नस्यकुहूशांतिरेव चंद्रादर्शनलक्षणसत्वात् यदिसैवामावा
स्यासूर्योदयात्प्राक्घटिकात्रयचतुष्टयंवाप्रतिपत्संबंधातदासिनीवाल्येव अथनादृश्यांन्यूनायामधि
कायांवा मावास्यायांतुदृक्कर्मसंस्कारवशेनचंद्रस्यादृश्यत्वभागतंसामावास्यासंपूर्णाकुहूनाम चंद्रादृ-
र्शनलक्षणसत्वात्तत्रापिकुहूशांतिरादेश्या यदातुसूर्योदयानंतरंकियतीषुद्वित्रासुघटीषु अतिक्रांता
सु अमावास्याप्रवृत्तिः पूर्वंचतुर्दश्येवास्थितातस्यामुषसिदृक्कर्मवशात्चंद्रोदृष्टोमावादर्शि तथाप्यमा
वास्यायांचंद्रदर्शनलक्षणानाक्रांतत्वात्सासंपूर्णामावास्यादर्शोनाम तत्रदर्शजननशांतिर्विधेयेति एव
ममावास्याभेदेनसिनीवालीकुहूदर्शरूपंपक्षत्रयंसावकाशमितिगोलज्ञानांमतम् अथप्रकारांतरेणसि
नीवालीसर्ववादिसिद्धासैव कुहूस्तुपरिभाषिकी यदाहवसिष्ठः नक्षत्रेयस्यदर्शांतोविषनाड्याभवेद्यदि
कुहूयोगइतिख्यातोव्याधिमृत्युभयादिकृत् अयमर्थः यस्मिन्नक्षत्रेयाविषनाड्याउक्तास्तस्मिन्काले य
दिदर्शस्यचरमघटिकाभवेत्तन्नक्षत्रंचयस्यपुरुषस्यजन्मनक्षत्रंजन्मकालेकालांतरेवास्यात्तस्यपुंसोव्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धिमृत्यकृत्कुहूयोगोज्ञेयः तत्रकुहूजननफलंशांतिश्चस्यात् कालांतरेपिकुहूयोगसंभवेशांति
र्विधेया अतएवजगन्मोहने यस्यजन्मर्क्षगश्चंद्रोविषनाड्यांकुहूर्भवेत् अभिचारेणकिंतस्यस्वयमे
वमरिष्यतीति अतोविषघटिकांतःपूर्वकालोदर्शशब्दवाच्यइति एवंप्रकारत्रयेपिसिनीवालीकुहू
र्दर्शानांभेदउपपादितस्तत्रयथासंप्रदायंव्यवस्थेत्यलमतिप्रसंगेन अथशांतिप्रकारः सिनीवाल्या
प्रसूतास्याद्यस्यभार्यापशूंस्तथा गवाश्वमहिषीचैवशक्रस्यापिश्रियंहरेत् त्र्येवसंतिद्विजाश्चान्येस्व
प्रसादोपजीविनः वर्जयेत्तानशेषांस्तुपशुपक्षिमृगादिकान् द्विजाः पक्षिणः कुहूप्रसूतिरत्यर्थंसर्वदो
षकरीमता यस्यप्रसूतिरेतेषांतस्यासुधननाशिनी नारींविनाचशेषाणांपरित्यागोविधीयते परित्या
गात्तत्रशांतिंकुर्याद्दत्त्याक्विक्षणः प्रतिमांकारयेच्छंभोश्चतुर्भुजसमन्विताम् त्रिशूलखड्गवरदा
भयहस्तांयथाक्रमात् श्वेतवर्णांश्वेतपुष्पांश्वेतांबरवृषस्थिताम् त्रैयंबकेनमंत्रेणपूजांकुर्याद्यथा
विधि इंद्रश्चतुर्भुजोवज्रांकुशचापसशायकः रक्तवर्णोगजारूढोयतइंद्रेतिमंत्रतः पितरः कृष्णव
र्णाश्चचतुर्हस्ताविमानगाः यक्षसूत्रकमंडल्वभयानांचधारिणः येसत्याइतिमंत्रेणपूजांकुर्यादनं
तरम् कलशस्थापनपूजादिपूर्ववत् समिदाज्यचरोर्होमंतिलमाषैश्चसर्षपैः अश्वत्थपुष्पपालाशस
मिद्भिःखादिरैःशुभैः अष्टोत्तरशतंमुख्यंप्रत्येकंजुहुयाद्बुधः त्रियंबकेनमंत्रेणतिलान्व्याहृतिभिर्हु
नेत् शंकरस्याभिषेकंचकुर्यादाज्यावलोकनम् अन्यत्सर्वमभिषेकादिपूर्ववत् इतिसिनीवालीकुहू
शांतिः ७ ७ ॥ अथदर्शशांतिः अथानोदर्शजानानांमातापित्रोर्दरिद्रता तद्दोषपरिहारायं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शांतिंवक्ष्यामिनारद तत्रसंकल्पंविधायतन्मध्येकलशंसंस्थाप्यतन्मध्येनिक्षिपेद्दूर्व्वादधिक्षीरघृ
नादिकम् न्यग्रोधोदुंबरोश्वत्थः सचूतानिंबकास्तथा एतेषांवृक्षमूलानांत्वगादीन्यक्षतांस्तथा पंच
रत्नानिनिक्षिप्यवस्त्रयुग्मेनवेष्टयेत् तत्रसर्वेसमुद्राइति आपोहिष्ठातृचेनेतिकयानश्चित्रइत्यृचाय
ल्किंचेदमृचाचैवसमुद्रज्येष्ठइत्यृचा अभिमंत्र्योदकुंभंतमग्नेःपूर्वेनिधापयेत् दर्शस्यदेवनायाश्चसो
मसूर्यस्यरूपकाःप्रतिमांस्वर्णजांनित्यंरजतांताम्रजांतथा आप्यायस्वेतिमंत्रेणसवितापश्चात्तमेवच
उपचारैःसमाराध्यततोहोमंसमाचरेत् समिधश्चरुद्रमंत्रेणजुहुयाद्दूर्वाहुनेत्सवितृमंत्रेण-
सोमोधेनुंचमंत्रेत अष्टोत्तरशतंवापिअष्टाविंशतिसंख्यया अभिषेकादिपूर्ववद्धिरण्यंरजतंचै
वकृष्णाधेनुञ्चदक्षिणा ब्राह्मणान्भोजयेत्तत्रकारयेत्स्वस्तिवाचनम् इतिदर्शप्रतिष्ठाः कृष्णपक्षेचतु
र्दश्यांप्रसूतेःषड्विधंफलम् चतुर्दशांचिषड्भागांकुर्यादादौशुभंस्मृतम् द्वितीयेपितरंहंतितृतीये
मातरंतथा चतुर्थेमातुलंहंतिपंचमेवंशनाशनम् षष्ठेतुधनहानिःस्यादात्मनोवंशनाशनम् तस्मा
त्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः प्रतिमांकारयेच्छंभोःकर्षमात्रसुवर्णतः तदर्द्धेनवाकुर्यात्सर्वल
क्षणसंयुताम् वृषभेचसमासीनंवरदाभयपाणिकम् शुद्धस्फटिकसंकाशंश्वेतमाल्यांबरान्वितम्
त्रैय्यंबकेनमंत्रेणपूजांकुर्याद्विधानतः तत्रमूलशांतिवत्कलशस्थापनादिकृत्वातत्रशंभुपूजांविधाय
तत्रआवाह्यवारुणैर्मंत्रैरनेनचविधानतः इममेवरुणेत्यनयातत्तायामीत्यृचातथा सनोअग्नइत्य
नयासत्वन्नइतिमंत्रेत आग्नेयंकुंभमारभ्यपूजांकुर्याद्यथाक्रमात् आनोभद्राश्वसूक्तेनभद्राअ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्नेश्चसूक्तकम् जप्त्वापुरुषसूक्तंच कदुदंतुकमाज्जपेत् ईश्वरस्याभिषेकंच यहपूजांचकारयेत् स
मिदाज्यचरूंश्चैवतिलमाषांश्चसर्षपान् अश्वत्थपूक्षपालाशसमिद्भिःस्वादिरैःशुभै अष्टोत्तरस
हस्रंवा अष्टोत्तरशतंतुवा अष्टाविंशतिभिर्वापिहोमंकुर्यात्पृथक्पृथक् चैयंबकेनमंत्रेणनिस्ता-
न्याहृतिभिःक्रमात् यहाएवंचहोतव्याश्चास्मदुक्तविधानत अन्यत्सर्वमाज्यावलोकनादिपूर्ववत्
इतिरुद्राचतुर्दशीजननशांतिः एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयो प्रसूतिश्चतयोर्मृत्कर्मवे
देकस्यनिश्चयात् तत्रशांतिंप्रवक्ष्यामिसर्वाचार्यमतेनतु अग्नेरीशानभागेतुनक्षत्रपतिमांतत न
न्नक्षत्रोक्तमंत्रेणचार्चयेत्कलशोपरि रक्तवस्त्रेणसंछाद्यवस्त्रयुग्मेनवेष्टयेत् स्वस्वशास्त्रोक्तमार्गेण
कुर्यादग्निसुखंततः अनेनैवतुमंत्रेणहुनेदष्टोत्तरंशतम् अस्यैकंसमिदन्याज्यैःप्रायश्चित्तांतमेवच
अभिषेकंततः कुर्यादाचार्यःपितृपुत्रयो वस्त्रालंकारगोदानै राचार्यपूजयेत्तत ऋत्विग्भ्योदक्षि
णांदद्यान्माषत्रयसुवर्णकं देवताप्रतिमादानंधान्यवस्त्रादिभिःसह यानशय्यासनादींश्चदद्यात्तद्दोष
शांतयेभोजयेद्ब्राह्मणान्सर्वान्नित्तशाठ्यविवर्जित इत्येकनक्षत्रशांतिः अथैकस्मिन्नेवनक्षत्रेभ्रात्रो
र्वापितृपुत्रयोरित्यत्रभ्रातात्रभ्रातात्रभ्रातरावितिभ्रातृपुत्रौस्वसृदुहितृभ्यामितिएकशेषेसोदरयोर्भ्रा
तृभगिन्योरेवनिषेधःस्यान्नतुपुत्रभ्रात्रोः एवंपितृपुत्रयोरित्यत्रापिपितात्रपुत्रश्चेतिद्वंद्वेपितापुत्रयो-
रेकनक्षत्रजननिषेधःस्यान्नतुमातृपुत्रयोः नचमातात्रपितात्रपितरौमातापित्रेत्येकशेषेतथापुत्रश्च
दुहितात्रपुत्रौपितरौचपुत्रौचेतिद्वंद्वेपितृपुत्राणामितिबहुवचनंस्यात् तथापिवचनांतरानुरोधाद्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्टविष्यतोपिसंगृह्णीतोभविष्यति॥ यदाहवसिष्ठः॥ पित्रोस्तुजन्मनक्षत्रेजातस्तुपितृमातृहा॥ जन्मर्क्षेशेच
तद्धप्येजातःसद्योमृतिमदः देवकीर्तिः यद्येकस्मिन्विष्णेजायतेदुहितरोथवापुत्रापित्रोरंतकराःस्युर्य-
द्यपरेप्रीतिरतुलास्यात् अपरेअन्यनक्षत्रे गर्गः यस्यैवजन्मनक्षत्रेजायेतातस्तुतोपिवासजानीयःस-
आत्मावासोस्यप्राणान्यसाधयेदिति॥ अथमूलेउपलक्षणत्वेनसर्वशांतिशेषभूतोगोमुखप्रसवोभिधीय
ते गर्गः प्रणिपत्यरविंवक्ष्येप्रायश्चित्तमनुस्मरन् सर्वारिष्टविनाशायदुक्तंज्योतिषार्णवे॥ पित्ररिष्टेस-
तारिष्टेमात्रिष्टेतथैवच॥ पौष्णाश्विन्योर्गुरौसार्पमघाचित्रेंद्रमूलभे एषुऋक्षेषुजातस्यकुर्याद्भोजननंत
था॥ जन्मर्क्षेवाविजन्मर्क्षेशुभवारेशुभेदिने॥ कृत्वाप्यंगादिकंसर्वंगृह्यालंकारपूर्वकम् गोमयेनोपलि
प्याथयथावित्तानुसारतः॥ नवंभूर्पंतुतन्मध्येरक्तवस्त्रंप्रसारयेत् स्थापयित्वाशिशुंतत्रपुनःसूत्रेण
वेष्टयेत् प्राङ्मुखस्तमवाक्पादस्तिलगर्भगतंशिशुम् गोमुखंदर्शयित्वातुपुनर्जातंतु गोमुखात् वि
ष्णुर्योनीतिसूक्तेनगव्येनस्नापयेच्छिशुम् गवामंगेषुमंत्रेणगवामंगेषुसंस्पृशेत् विष्णोःश्रेष्ठेनमंत्रे-
णगोप्रसूतंतुबालकम् आचार्यस्तुसमादायपश्चान्मात्रेददात्तदा माताजघन्यभागस्थाशिशुमानी
यतंमुखात् ततःपित्रेतदाद्यात्ततोमात्रेप्रदापयेत् वस्त्रेसंस्थाप्यतुपितापुत्रस्यमुखमीक्षयेत्॥ गोमू
त्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् आपोहिष्ठादिभिर्मंत्रैरभिषिंचेत्ततःशिशुम् मूर्ध्निचाघ्रायतंपु-
त्रंतन्मंत्रेणतदापिता अंगादंगात्संभवसिहृदयादधिजायसे आत्मावैपुत्रनामासिसजीवशरदःशत
म् मूर्धनिन्यिरवघ्रायतंशिशुंस्थापयेत्ततः पुण्याहंवाचयेत्पश्चाद्ब्राह्मणेर्वेदपारगैः दरिद्रायाथविप्राय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तांगांचाभ्यर्च्यदापयेत् गोवस्त्रस्वर्णधान्यादिदद्यादक्रीदितःक्रमात् यथाशक्तिधनंदद्याद्ब्राह्मणे
भ्यस्तथापितान्तोहोमंप्रकुर्वीतस्वस्वशास्त्रोक्तमार्गत उक्तेरवनादिकंकृत्वाचाज्यभागांतमाचरेत् हो
मस्यैशानदिग्भागेधान्योपरिशुभंघटम् सपंचगव्यंसंस्थाप्यतिलांस्तत्रविनिक्षिपेत् क्षीरिद्रुमक-
षायांश्चपंचरत्नानिनिक्षिपेत् वस्त्रयुग्मेनसंवाद्यक्षीरादिभिरर्चयेत् विष्णुंवरुणमभ्यर्च्यप्रतिमांच
विधानतः आपोहिष्ठेतितिसृभिरृक्षमेसोमइत्यृचं तद्विष्णोःपरमंपदमक्षीण्यामितिसूक्तंऋग्भिरा
भिः प्रत्यृचंचअष्टाविंशतिसंख्यया अशक्तौचाष्टसंख्यंवादधिमध्याज्यसंयुतम् आदित्यादिग्रहाणांच
होमंकुर्यात्समंत्रकम् इतिगोमुखप्रत्यवनिः अथमंगलशांतिः सकलत्रयेसकलाचेत्स्यात्तत्र
येवासकलोयदि मातापित्रोःकुलस्यापिनदारिष्टंमहद्भवेत् जातस्यैकादशेवापिद्वादशाहेशुभेदिने
आचार्यमृत्विजान्वृत्वाग्रहयज्ञं पुरःसरम् ब्रह्मविष्णुमहेशेंद्रप्रतिमाःस्वर्णतःकृता पूजयेद्धान्यरा-
शिस्थकलशोपरिशक्तितः पंचमेकलशेरुद्रंपूजयेद्रुद्रसंख्यया रुद्रसूक्तानिचत्वारिशांतिसूक्तानि
सर्वशाखिजएकोजपेद्धोमकालेशुचिसमाहितः आचार्योजुहुयात्तत्रसमिदाज्यतिलांश्चरून् अशीत्त
रसहस्रंवाशतंवाविंशतिंतुवा दैवताभ्यश्चतुर्वेदादिभ्योग्रहपुरःसरम् कांस्याज्यवीक्षणंकृत्वाशे
षंपूर्ववदाचरेत् इतिग्रीनरशांतिः अथसूर्यचंद्रग्रहणसमयजननशांतिः ग्रहणेचंद्रसूर्यस्यप्रसूतिर्य
दिजायते व्याधिपीडानदास्त्रीणामादौतुऋक्षदर्शनात् शांतिस्तेषांप्रवक्ष्यामिनराणांहितकाम्यया
यस्मिन्ऋक्षेविशेषेणग्रहणंसंप्रजायते तदृक्षाधिपतेरूपंसवर्णेनप्रकल्पयेत् यथाशक्त्यानुसारेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वित्तशाठ्यंनकारयेत् सूर्यग्रहेसूर्यरूपंस्फटिकवर्णेनस्वशक्तितः चांद्रंचंद्रग्रहेधीमान्रजतेनविशेषतः
राहुरूपंप्रकुर्वीतनागेनैवविचक्षणः नागेनसासकेनस्फटौदेशेप्रयत्नेनगोमयेनप्रलेपयेत्ततस्योप
रिन्यसेद्वीमानन्नंवस्त्रंसुशोभनम् त्रयाणांचैवरूपाणांस्थापनंतत्रकारयेत् रक्तक्षतंरक्तगंधंरक्त
पुष्पांबराणिच सूर्यग्रहेप्रदातव्यंसूर्यप्रीतिकरंचयत् श्वेतवस्त्रंश्वेतमाल्यंश्वेतगंधाक्षतादिकम्
चंद्रग्रहेप्रदातव्यंचंद्रप्रीतिकरंचयत् राहवेचैवदातव्यं कृष्णपुष्पांबराणिच दद्यान्नक्षत्रनाथाय
श्वेतगंधानुलेपनम् सूर्यंसंपूजयेद्वीमानाकृष्णेनेतिमंत्रतः चंद्रग्रहेचपालाशैः समिद्भिर्जुहुयान्न
रः दूर्वाभिर्जुहुयाद्वीमान्वा होः संप्रीणनायच सयवाः समिद्भिर्ब्रह्मवृक्षोत्थैर्भेषाज्यजुहुयाद्बुधः भे
षाजयनक्षत्राधिपतयेआज्येनचरुणाचैवतिलैश्चजुहुयात्ततः पंचगव्यैः पंचरत्नैः पंचस्वस्तपंचपल्लवैः
जलैरोषधिकल्कैश्चसहितैःकलशोदकैः ओषधिकल्कैः सर्वौषधिकल्कैः अभिषेकंप्रकुर्वीतयज
मानेप्रयत्नतः मंत्रैर्वारुणदैवत्यैरापोहिष्ठादिभिःसह इदमंमेगंगेपितरस्तत्तायामीतिमंत्रकैः अ
भिषेकेनिवृत्तेतुयजमानःसमाहितः अनेनविधिनाशांतिंकृत्वासम्यग्विशेषतः अकालमृत्युंशोकं
चव्याधिपीडांनचाप्नुयात् सौख्यंसौमनसंनित्यंसौभाग्यंलभतेनरः इत्थंग्रहणजातानांसर्वारिष्ट
विनाशनम् कथितंभार्गवेनेदंशौनकायमहात्मने इतिशौनकोक्तग्रहणजननशांतिः अथनक्षत्रो
त्पत्तिकालीननक्षत्रशांतिः तत्रसाधारणोविधिः यस्मिन्नक्षत्रेज्वरादिपीडाभवतितन्नक्षत्राधिदेव
तांप्रतिमांस्फटिकवर्णेनकारयित्वाअमुकनक्षत्रसंभूतव्याधिशांत्यर्थंनक्षत्रशांतिंकरिष्ये इतिसंकल्प्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुचिप्रदेशेगोमयेनोपलिप्तेतंडुलैश्चतुरस्रंमंडलंनिर्मायतन्मध्येतत्तद्देवतावर्णवस्त्रद्वयवेष्टितयं
थिंचंदनादिचर्चितंकलशेधान्यस्योपरिविन्यस्यतत्रसर्वौषधीः पंचरत्नानिपंचगव्यानिसप्तमृत्तिका
पंचपल्लवान्स्वस्वमंत्रेणकलशेनिक्षिप्यसर्वेसमुद्राइतितत्रतीर्थान्यावाह्यतत्तायामीतिवरुणमावाह्य
संपूज्यस्वस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्याज्यभागांतेतत्तन्नक्षत्राधिदेवतामंत्रेणतन्नक्षत्रपूर्वोत्त
रनक्षत्रदेवतामंत्रेणतत्तद्द्रव्येणचहोमंकृत्वातेनवरुणकलशेनयजमानाभिषेकंविहितेत्यनिमारो
गीब्राह्मणायदद्यात् असौसाधारणोविधिः अथवा यस्मिन्ऋक्षेभवेत्पीडातन्नक्षत्रस्यदेवतांस्वव
र्णनिर्मितांकृत्वापूजयेत्ययतः शुचिः गोमयेनानुलिप्तेवैमंडलंशुभलक्षणम् कीर्तितंचतुरस्रंचतंडुलै
श्चकृताकृतैः कृत्वातुस्थंडिलंतत्रयत्नतः कृष्णायामृदातत्पार्श्वेचसुधीः कुर्यात्तंडुलानांमहाचयम् तत्र
प्रमाणंखारीवाद्रोणावादशशक्तितः अभावेपंचवाद्रोणाद्रोणंवातदभावतः ईशानकोणदेशेनुकल
शंस्थापयेत्सुधीः निधायद्रविणंतत्रकलशेशक्त्यपेक्षया पीठंतुपूर्वतःस्थाप्यंनव्यवस्त्रेणसंयुतम्
स्वस्तिकंतंडुलानांचशुभानांतत्रसंलिखेत् तन्मध्येदेवतास्तिस्रोनक्षत्रत्रितयस्यवैयस्मिन्ऋक्षेभ
वेद्रोगस्तस्यपूर्वापरेसुधीः उडूनांपूजयेद्यत्नाद्दधिपत्यधिदैवते देवतायस्यऋक्षस्यमंत्रस्तल्लिंगए
वच इत्थंचतस्ययत्प्रोक्तंप्रभावंप्रकृतंतथा तत्सर्वंविदुषानीयहोमंतत्रप्रकल्पयेत् पंचोपचारसंयु
क्तांपूजांतत्रप्रकल्पयेत् स्वगृह्योक्तविधानेनकुर्यादग्निमुखंसुधीः कलशंजलपूर्णंचवस्त्रयुग्मेनवे
ष्टितम् निधायचौषधीस्तत्रपंचपल्लवसंयुताः सप्तस्थानमृदांकुंभेआक्तवालंप्रकल्पयेत्इत्यंषेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रुणइत्येवंजलंमंत्रेणवापुनः सर्वेससमुद्राःसरितइतिमंत्रेवसंस्मरेत् यच्चिदितेविशोयथेत्यादिसूक्तेन
पेत्पुनः आवाहयेद्वदेदेवंवरुणंपयसांपतिं एवंनक्षत्रशांत्यर्थंविदध्यात्सूर्वपाद्यिकाः शांतान्योयंवि
धिःप्रोक्तोनक्षत्राणांप्रपूजने सर्वौषधीनांदुःप्राप्तौभवेदेकाशतावरी सर्वेषामपिगंधानामभावेचंदनं
मतम् शतपुत्रंसुमनसांधूपाभावेचगुग्गुलु नैवेद्यानामभावेतुपायसंसघृतंस्मृतम् मंत्राणामप्य
भावेतुगायत्रीमंत्रउत्तमः होमद्रव्यस्यदुःप्राप्तौतिलाःप्रोक्तामनीषिभिः अष्टोत्तरसहस्रंचतथाशतमु
दाहृतमिति अथनक्षत्रदेवताध्यानानि देवतेअश्विनौनत्रद्विभुजौशुक्लवर्णकौ सुधाकलशसंयुक्तौ
कमंडलुधरौशुभौ १ यमस्तुदेवतातत्रकृष्णवर्णोद्विबाहुकः सुलाघवाहनःश्रीमान्पाशदंडधरःप्रभुः
२ अग्निस्तुदेवतातत्ररक्तवर्णोजवाहनः चतुर्भुजोधृतामत्रस्रुवस्रुक्वरदाभयः ३ रक्तवर्णश्चतु
र्बाहुर्हंसारूढश्चतुर्मुखः पद्माक्षसूत्रवरदाभयहस्तोनिरामयः ४ सोमोहिदेवतातस्यश्वेतवर्णःशुभा
कृतिः रक्षाश्वरथमारूढःश्वेताम्बोपिनिगद्यते ५ रुद्रोहिदेवतायस्यवृषारूढश्चतुर्भुजः त्रिशूलस्य
द्वावरदाभयहस्तश्चकीर्तितः ६ चतुर्भुजादितिःपीतसाक्षसूत्रकमंडलुः वरदाभयहस्तासाकार्यास्व
र्णमयीशुभा ७ चतुर्भुजःपीतवर्णोदेवतास्यबृहस्पतिः दंडाक्षसूत्रपाणिस्तुसाभयः सकमंडलुः
८ सर्पस्तुदेवतातत्रमहामंडलिरूपधृक् सविस्तृतशिरश्चंडोमकपिंगललोचनः ९ पितरोदेवता
स्तत्र कृष्णवर्णाश्चतुर्भुजाः भद्राक्षसूत्राभयदाकमंडलुधराःशुभाः १० पूर्वाफाल्गुनिकायांचभगो
देवःप्रकीर्तितः रक्तवर्णोद्विभुजासीनोद्विभुजोभयपद्मकः ११ अर्यमादेवतापद्ममध्यस्थःपद्मवर्णकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पद्माभयकरः श्रीमान्स्वर्णमूर्तिर्महाद्युतिः १२ सविता देवतास्यसप्ताश्वरथवाहनः द्विभुजोरक्तवर्णस्या
त्पद्मासनसमाश्रयः १३ त्वष्टापद्मस्थितश्चित्रवर्णः स्यात्सचतुर्भुजः पद्माक्षसूत्रवलयः पद्मालः पद्मक-
रः प्रभुः १४ वायुश्चदेवतातत्रमृगारूढश्चमोचकः अजावर्मधरः श्रीमान्द्विभुजः परिकीर्तितः १५ इंद्रा
ग्नीदेवतातत्रगजाजावाहनौपनौ चतुर्बाहूरक्तवर्णौनिजशस्त्रधरौतथा १६ चापांकुशाभयैर्युक्तौत-
थासमविराजितौ पद्मासनोरक्तवर्णोमित्रस्तस्यानुदेवता पद्माभयकरः श्रीमान्द्विभुजः परिकीर्तितः
१७ शक्रऐरावतारूढोदिव्यसिंहासनेविभुः श्वेतवर्णोवज्रधरोऽभयपाणिर्महाभुजः १८ निर्ऋतिर्देवता
तत्रप्रेतारूढश्चमोचकः खड्गखेटकधारीचद्विभुजः परिकीर्तितः १९ जलंतुदेवतातस्यशुक्लवर्णाशुभा
कृतिः वरुणोस्यजलस्थापिस्वामीपूज्यतमोमतः मकरेवाहनेविष्टोभवेत्पद्मकरोध्रुवम् २० विश्वेदे-
वादेवताश्चश्वेतवर्णाश्चतुर्भुजाः वरदाभयहस्ताश्चसाक्षसूत्रांबुभाजनाः २१ विष्णुस्तु कृष्णवर्णः
स्यात्पन्नगाशनवाहनः शंखचक्रगदापाणिःपीतवासाश्चतुर्भुजः २२ वसवोदेवतास्तत्रश्वेतवर्णाश्च
तुर्भुजाः वरदाभयहस्ताश्चसाक्षसूत्रांबुजासनाः २३ वरुणोदेवतातत्रमकरोपरिसंस्थितः यष्टिपाश
धरःश्रीमान्गदापद्मधरस्तथा २४ अजैकचरणोरुद्रोदेवतास्यप्रकीर्तिता खड्गचर्मधरोवाग्मीभुजद्व
यसमावृतः २५ अहिर्बुध्न्याभिधोरुद्रोदेवतास्यप्रकीर्तिता श्वेतश्चतुष्करःपद्मवरदाभयपाशभृत्
२६ पूषातुदेवतातत्रपद्मवर्णोबुजासनः द्विभुजः पद्मपाणिःस्यात्सयोगर्भप्रियोविभुः २७ इतिपक्ष
श्चदेवताध्यानम् अथोपयुक्तत्वान्नारदीयोक्ताकामैथुनदर्शनशांतिः दिवावायदिवारात्रौयः पश्येत्का

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कमैथुनम् । सनरोमृत्कमाप्नोति त्वथवास्थाननाशनम् । काकघातव्रतंयद्वाविदधीताथवत्सरम् । पितॄन्
देवान्द्विजान्भक्त्याप्रत्यहंवाभिवादयेत् । जितेंद्रियोजितक्रोधः सत्यधर्मपरायणः । तद्दोषशमनार्थायशां
तिकर्मसमारभेत् । गृहस्येशानदिग्भागे होमस्थानंप्रकल्पयेत् । गृह्योक्तविधिनानत्र प्रतिष्ठाप्यहुताश
नम् । प्रतिमंत्रंत्र्यंबकेनअथमृत्युंजयेनच । व्याहृतीभिर्व्रीहितिलैर्जपाद्यंतंप्रकल्पयेत् । पूर्णाहुतिंचजु
हुयात्कर्तासुचिरलंकृतः । स्वर्णशृंगांरौप्यखुरांकृष्णांधेनुंपयस्विनीम् । वस्त्रालंकारसंयुक्तांनिष्कद्वादश
संयुताम् । तदर्धेनतदर्धेनदद्याद्दक्षिणयायुताम् । यथावित्तानुसारेणन्यूनाधिक्यकल्पना । आचार्याय
श्रोत्रियायतांगांदद्याद्कुटुंबिने । यस्मात्त्वंपृथिवीसर्वाधेनोवैकृष्णासन्निभे । सर्वमृत्युहरानित्यमतःशांतिं
प्रयच्छमे । ब्राह्मणेभ्योविशिष्टेभ्योयथाशक्त्याचदक्षिणाम् । ब्राह्मणान्भोजयेत्पश्चाच्छांतिवाचनपूर्वक
म् । एवंयः कुरुतेसम्यक्तस्माद्दोषात्प्रमुच्यते । इतिकाकमैथुनदर्शनशांतिः । तत्रैवकपोतादिशांतिः आरो
ह्येद्गृहंयस्यकपोतोवाप्रवेशयेत् । स्थानहानिर्भवेत्तस्ययद्वानर्थपरंपरा । दोषायधनतांगेहेदरिद्राणांशि
वायच । तस्यशांतिंप्रकर्तव्याजपहोमविधानतः । ब्राह्मणान्वरयेत्तत्रस्वस्तिवाचनपूर्वकम् । षोडशद्वादशा
ष्टौवाश्रौतस्मार्तक्रियापरान् । देवाः कपोतइत्यादिऋत्वाभिः पंचभिर्जपम् । लक्षंकृत्वाप्रयत्नेनस्वगृह्योक्त
विधानतः । ईशान्यांस्थापयेद्वह्निं सुखांतेऽष्टोत्तरंशतम् । प्रत्येकंसमिदाज्यान्नैः प्रतिप्रणवपूर्वकम् । यतइंद्र
भयामहेस्वस्तिदेतिभियंबकैः । त्रिभिर्मंत्रैश्चजुहुयात्तिलान्व्याहृतिभिस्ततः । जपाहुतीस्ततोहुत्वाकुर्या
त्पूर्णाहुतिंस्वयम् । विप्रेभ्योदक्षिणांदद्यात् द्यौः शांतिंचततोजपेत् । ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नबंधुभिः एवंयः कुरुतेसम्यक्तस्माद्दोषात्प्रमुच्यते पिंगलायाःस्मरेप्येवंमधुवल्मीकयोरपि संपूर्णमंदि
रेहानिः शून्यसद्मनिमंगलम् प्राकारेचपुरद्वारेदेवागारेचवीथिषु ग्रामस्यतत्फलंचैवगुरुकल्पनयाततः
शांतिकर्माखिलंकार्यं पूर्वोक्तेनक्रमेणतु इतिकृतेपिंगलामधुवल्मीकारिष्टशांतिः अथपत्न्याःपत्तनेस
रस्यवारोहणेफलंशांतिश्च पादयोर्जघनेपाण्योर्गुदेगुह्येचजंघयोः पत्न्याःपातेनथारोहेसरस्यफलं
नसत् अन्यत्रशुभदंपश्चात्सचैलंस्नानमाचरेत् दत्त्वाशिवालयेदीपंमुखमाज्येविलोकयेत् पद्मीसरस
योरूपंसुवर्णेनविनिर्मितम् तदर्धार्धप्रमाणेनवित्तशाठ्यविवर्जितः वस्त्रयुग्मेनसंवेष्य श्रोत्रियायनिवेदयेत्

त्रिच्यंगपंचाग्निकुवेदवन्ह्यः शरेषुनेत्राश्विशरेंदुभूकृताः वेदाग्निरुद्राश्वियमा
ग्निवह्नयोब्ध्यः शतद्विद्विरदाश्मतारकाः ॥८॥

इतिपत्नीसरसोः शांतिः अथनक्षत्रप्रसंगादेवाश्विन्यादीनांभानांनारकाउपजातिकयाह त्रिच्यंगेनि
नथान्त्यैपतिः वन्हित्रिरुत्सिषुगुणेंदुकृताग्निभूतबाणाश्विनेत्रशरभूकुयुगाब्धिरामाः रुद्राब्धिरामगुण
वेदशतद्वियुग्मदंतानुधैर्निगदिताः क्रमशोभतारा इति नन्वत्रसंमतिवाक्येसप्तविंशतिभानिप्रतीयंतेमूलेष-
ष्टाविंशतिरितिविरोधःउच्यतेउत्तरार्द्धेरुद्राब्धीत्यत्राब्धयश्चतस्रस्ताराः पूर्वाषाढोत्तराषाढयोर्ज्ञेयाः द्वे पूर्वा
षाढायांइतिनारदेनापितथैवाभिधानात् तत्राश्विन्यास्तिस्रस्ताराः एवंभरण्यादीनांसाभिजिनम् ताराप्रसं
ख्येयाताराभानोक्तिप्रयोजनमाह यराहः नक्षत्रजमुद्वाहे फलमब्दैस्तारकामितैः सदसद्विसैर्ज्ञेयस्यनाशोब्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धेरन्यस्यवावाच्य इति ५८ अथाश्विन्यादीनामाकृतिमुपजातिकरथोद्धताभ्यामाह अश्व्यादिरूपमिति अश्विन्यादिनक्षत्राणांरूपमाकृतिरुच्यते तत्राश्विन्याःतुरगास्यम् अश्वमुखसदृशंरूपम् भरण्यायोनिर्भगसदृशम् कृत्तिकायाःनापितक्षुरसदृशंरोहिण्याःअनःशकटसदृशम् मृगस्यएणास्यंहरिणमुखसदृशम् आर्द्रायामणिसदृशम् पुनर्वसोर्गृहसदृशम् पुष्यस्यपृषत्कोबाणस्तत्सदृशम् आश्लेषायाश्चक्राकारम् मघायाभवनंगृहसदृशम् पूर्वाफल्गुन्याः मंचःखट्वाकारम् उत्तराफल्गुन्याःशय्याकारम् हस्तस्यहस्ताकार

अश्व्यादिरूपंतुरगास्ययोनिंक्षुरोनएणास्यमणिर्गृहंच पृषत्कचक्रेभवनंचमंचः शय्याकरोमौक्तिकविद्रुमंच ५९ तोरणंबलिनिभंचकुंडलंसिंहपुच्छगजदंतमंच काः स्त्रिचत्रिचरणाभमर्दलोवृत्तमंचकयमाभमर्दलाः ६० जलाशयारामसुरप्रतिष्ठासौम्यायनेजीवशशांकशुक्रे

मू चित्रायामौक्तिकाकारम् स्वात्याविद्रुमंप्रवालसदृशम् ५९ तोरणंबलिनिभमिति विशाखायास्तोरणाकारम् अनूराधायाबलिनिभंभक्त पुंजाकारम् ज्येष्ठायाःकुंडलाकृतिः मूलस्यसिंहपुच्छाकारम् पूर्वाषाढायागजदंतसदृशम् उत्तराषाढायामंचकसदृशम् अभिजिनस्त्रिकोणकारः श्रवणस्यत्रिचरणसदृशम्धनिष्ठायामर्दलसदृशम् शततारायावृत्तंवर्तुलम् पूर्वाभाद्रपदायामंचकसदृशम् उत्तराभाद्रपदायायमलाभम् रेवत्यामर्दलमृदंगाकारंस्वरूपमित्यर्थः ६० अथजलाशयारामदेवप्रतिष्ठासु हूर्तेसामान्यतोलग्नशुद्धिर्देवताविशेषेणलग्नशुद्धिर्नक्षत्रविशेषंचोपजातिकात्रयेणाहजलाशयेति रिक्तारेति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिवोनृयुग्मेतिच जलाशयाः वापीकूपतडागादयः तेषांप्रतिष्ठाउत्सर्गः आरामउपवनम् तस्याप्युत्सर्गः करा
देवाविष्णवादयः तेषांप्रतिष्ठापनम् सौम्यायनेउत्तरायणे तथाजीवशशांकशुक्रेदृश्येउदितेसति तथामृदुध्रु
वक्षिप्रचरनक्षत्रेषुतथासितेशुक्लपक्षे तथास्वर्क्षतिथिक्षणेवा ६१ तथारिक्तावर्जेदिवसे रिक्ततिथिभौ
मवारव्यतिरिक्ततिथिवारेषुएवंविधेदिनेप्रतिष्ठा जलाशयारामदेवानांक्रमेणकर्माईत्वोपभोग्यत्वपूजायो
ग्यत्वरूपाअतिशस्तास्यात् तथाचगार्ग्यः देवतारामवाप्यादिप्रतिष्ठामुत्तरायणे माघादिपंचमासेषु कृष्णे
प्यापंचमीदिनम् दक्षिणेत्वयनेकुर्वन्नतत्फलमवाप्नुयात् यदातुदक्षिणायनएवजलस्थितिसंभवःतदान

दृश्येमृदुक्षिप्रचरध्रुवेस्यात्पक्षेसितेस्वर्क्षतिथिक्षणेवा ६१ रिक्तावर्जेदिवसे
तिशस्ताशशांकपापेस्त्रिभवांगसंस्थैः व्यत्याष्टगैःसत्त्वचरैर्मृगेंद्रेसूर्येघटेको
युवतौचविष्णुः ६२ कालनियमः नकालनियमस्तत्रकारणमितिभविष्यत्पुराणोक्तेः अथकू
रमकृतीनांदक्षिणायनेपिस्थापनंकार्यमित्यत्रवैखानससंहितायाम् मातृभैरवबाराहनरसिंहत्रिविक्रमाः
महिषाक्षरहंत्रीचस्थाप्यावैदक्षिणायने नारदः चित्रेत्रेषवमासेषु माघादिषुचपंचसु यद्दिनंयस्यदेवस्य
तद्दिनंतस्यसंस्थितम् अथलग्नशुद्धैःशशांकपापैःचंद्रसूर्यभौमशनिराहुकेतुभिःत्रिभवांगसंस्थैः तृती
यषष्ठैकादशस्थानस्थितैरुपलक्षितेलग्नेतथासत्त्वचरैःशुक्रबुधगुरुभिःव्यत्याष्टगैः द्वादशाष्टमव्यतिरि
क्तस्थितस्थानस्थैःसद्भिःदेवादिप्रतिष्ठा अतिशस्ता अथसूर्येमृगेंद्रेसिंहलग्नेस्थाप्यःतथाकोब्रह्मायटे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुंभेविष्णुर्युवतौकन्यायाम् ॥ शिवोमहादेवोनृयुग्मेमिथुनेचपुनर्देव्योदुर्गादयोहितनौहिस्वभावराशौ
मिथुनकन्याधनुर्मीनलग्नेषुरुद्रादेव्यश्चतुःषष्टियोगिनीप्रभृतयश्चरलग्नेमेषकर्कतुलामकरेषुसर्वेद्र
मेउक्तानुक्ताश्चस्थिरर्क्षेवृषसिंहवृश्चिककुंभेषु अथपुष्येग्रहारंभेइंद्राद्योष्टौपुष्यनक्षत्रेस्थाप्या
उपलक्षणमेतत् सूर्यस्यहस्तनक्षत्रेस्थापनम् इंद्रब्रह्मणोःपुष्यश्रवणाभिजित्सुकुबेररुद्रयोरनुराधा
याम् दुर्गादीनांमूलेसप्तर्षीणांस्वाधिष्ठितनक्षत्रे लक्ष्मीव्यासवाल्मीक्यगस्त्यानांपुष्येस्थापनम् तदुक्तंग्रह
मालायाम् पुष्यश्रुत्यभिजित्सुरेश्वरकुबेरोक्तिताधिपस्कंदयोर्मैत्रेतिग्मरुचेःकरेनिर्ऋतिभेदुर्गादिकानांशुभ

शिवोनृयुग्मेहितनौचदेव्याः रुद्राश्वरेसर्वद्रमेस्थिरर्क्षेपुष्येग्रहाविघ्नपयक्ष
सर्पभूतादयोत्येश्रवणेजिनश्च ॥ स्तनिमुहूर्तचिंतामणौनक्षत्रप्रकरणंद्वितीयं
समाप्तम् ॥ ७ ७ ७ ७ ७ ७

मृ॥सप्तर्षयोयत्रवसंतिधिष्ण्येकार्यासिद्धिस्तत्रतेषाम् श्रीव्यासवाल्मिकिघटोद्भवानांतथास्मृतावा
क्यनिभेग्रहाणामिति अथविघ्नोपगणेशःयक्षोदेवयोनिः सर्पोवासुक्यादयःभूतोदेवयोनिःविद्याधरोप्सरो
यक्षरक्षोगंधर्वकिंनराःपिशाकोगुह्यकःसिद्धोभूतोमीदेवयोनयइत्यमरः आदिशब्देनराक्षसासुरप्रमथस
रस्वतीप्रभृतयः अंत्येरेवत्यांस्थाप्याःतथाश्रवणेजिनोबौद्धस्थाप्यःउपलक्षणंचैतत् इंद्रकुबेरवर्जिना
नांलोकपालानांधनिष्ठायांस्थापनम् तथाचश्रीपतिः गणपरिवृढरक्षोयक्षभूतासुराणांप्रमथफणिसर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वत्यादिकानांचपौष्णे अश्विसक्रगतनाम्नोवासवेलोकपानांनिगदितमखिलानांस्थापनंहिस्थिरेषु ६३
इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वरुतमुहूर्तचिंतामणिटीकायांषमिताक्षरायांनक्षत्रप्रकरणं
समाप्तम् २ ७ ७ ७ ७ ७ ७
श्रीगणेशायनमः अथसंक्रांतिप्रकरणंव्याख्यायते तत्रप्राग्राशितोपरराशौसंक्रमणंनामगमनंसंक्रांति
स्तस्यानक्षत्रविशेषवशेनवारवशेनचसंज्ञांफलंचसार्धवसंनतिलकेनाह घोरार्केति विभाव्येति अर्कसंक्र
मणमर्कसंक्रांतिः उग्रश्चौ उग्रनक्षत्रेषुरविवारेचेत्स्यात्तदाघोरेतिसंज्ञा साभूद्रान्सुखयेत् सुखमुत्पादयेत्

घोरार्कसंक्रमणमुग्रश्चौहिभूद्रान्ध्वांक्षीविशोलघुविधौचचरर्क्षभौमे चौरान्म
होदरयुतानृपतीन्ज्ञमैत्रेमंदाकिनीस्थिरगुरौसुखयेच्चमंदा १

उग्रश्चाविनिखग्नैःसहितो रविः उग्रश्चविः तस्मिन्नुग्रश्चाविनिमध्यमपदलोपितत्पुरुषः ततःससप्तम्येकवचनम् अथवासमाहारद्वंद्वेअ
निषमागमशासनमितिनुमभावः एवंलघुविधावित्यादिष्वपिसमाधेयम् अथलघुनक्षत्रेषुविधौसोमवा
रेसूर्यसंक्रांतिर्ध्वांक्षीनाम्नीविशोवैश्यान्सुखयेत् चरर्क्षभौमेचरनक्षत्रेभौमवारेवासूर्यसंक्रमणंचेन्महो
दरयुतामहोदरीसंज्ञकांचोरान्सुखयेत् ज्ञमैत्रेबुधवारेमैत्रसंज्ञनक्षत्रेषुवाऽर्कसंक्रांतिर्मंदाकिनीनाम्नीनृ
पतीन्राज्ञःसुखयेत् स्थिरगुरौस्थिरनक्षत्रेषुगुरुवारेचार्कसंक्रांतिर्मंदानाम्नीविप्रान्ब्राह्मणान्सुखयेत्
मिश्रभभृगौमिश्रनक्षत्रयोः भृगुवारेवाऽर्कसंक्रांतिर्मिश्रानाम्नीपशून्सुखयेत् तीक्ष्णार्कजेतीक्ष्णसंज्ञक

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नक्षत्रेषु अर्कजेशनिवारेवाराक्षसानाम्नी अंत्यजसूत्रवा अंत्यजान्चांडालान्सूत्रवयतीति अंत्यजसूत्रवास्यात् ॥ अथादिनरात्रिविभागेनसंक्रांत्यशुभफलंउत्तरायणदक्षिणायनसंज्ञांचसार्धत्रयसंतनिलकेनाह त्र्यंशेइति अस्तेइति अत्रार्कसंक्रमणमित्यनुवर्तते दिनमानेत्रिभिर्भक्तेत्र्यंशोभवति तत्रदिनस्यप्रथमेत्र्यंशेऽर्कसंक्रमणंनृपतीन्हंति मध्येद्वितीयत्र्यंशेद्विजान्ब्राह्मणान्हंति अपरकेतृतीयेत्र्यंशेवैश्यान्हंतीत्येवंसर्वत्रव्याख्येयम् अस्तेसूर्यास्तसमयेऽर्कसंक्रमणंशूद्रान्हंति २ अथरात्रिसंक्रांतिफलम् रात्रिप्रथमप्रहरेपिशाचकान् आदिशब्देनभूतान् द्वितीयप्रहरेनक्तंचरान्राक्षसान् तृतीयप्रहरेनटान्नर्तकान् चतुर्थप्र

विप्रांश्चमिश्रभृगौतुपशूंश्चमिश्रातीक्ष्णार्कजेत्यजसूत्रवारवलुराक्षसीच त्र्यंशेदिनस्यनृपतीन्प्रथमेनिहंतिमध्येद्विजानपिविशोपरकेचशूद्रान् २ अस्तेनिशाप्रहरकेषुपिशाचकादीन्नक्तंचरानपिनटान्पशुपालकांश्च

हरेपशुपालकान् अभीरान् सूर्योदयसमकालेऽर्कसंक्रमणंसकललिंगिजनंपापवंत्यादिकं हंतीत्यर्थः पापवंतः सर्वलिंगिजनंदत्यभिधानान् क्रूरसौम्यवारपरत्वेनफलमाहरविसिंहः रविरविजभौमवारेसंक्रांतौदिनकरस्यतन्मासे पित्तकफानिलजामयनरपतिकलहस्वदृष्टिश्च बुधगुरुसितचंद्राहेसतिसंक्रांतावनामयंनृणाम् क्षितिपतिनिकरक्षेमंसस्यविवृद्धिर्विधर्मिणांपीडा जन्मनक्षत्रेसंक्रांतिफलंदीपिकायाम् यस्यज

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्मर्क्षमासाद्यरविसंक्रमणंभवेत् तन्मासाभ्यंतरेतस्यरोगक्लेशधनक्षयाः तगरसरोरुहपत्रैरजनीसि-द्धार्थलोध्रसंयुक्तैः स्नानंजन्मन्यृक्षेरविसंक्रांतौनृणांशुभदम् अन्यच्चवसिष्ठः अजकन्याझषकर्किणि संक्रांतौयदिनचेद्दर्षम् आमयमरणंभूभृतयुद्धमनर्घ्यत्वदृष्टिश्च वृषवृश्चिकतुलामकरेवृष्टिः स्यात्संक्रम विषये विस्फोटामयतस्करपीडादृष्टिः कृशानुभयम् अथसौम्ययाम्यायनमिति मकरकर्कटयोः संक्रांति श्चेत्तदाक्रमेणसौम्ययाम्यायनंनिरुक्तम् मकरेउत्तरायणंकर्केयाम्यायनंस्यात् ३ अथावशिष्टसंक्राति षुषडशीत्यादिसंज्ञानुष्टुभाह षडशीत्याननमिति धनुर्मिथुनकन्यामीनेषुभर्कसंक्रमणंषडशीत्याननं

सूर्योदयेसकललिंगिजनंचसौम्ययाम्यायनंमकरकर्कटयोर्निरुक्तं ३ षडशी
त्याननंचापनृयुक्कन्याझषेभवेत् तुलाजौविषुवंविष्णुपदंसिंहालिगोघटे ४
संक्रांतिकालादुभयत्रनाडिकाःपुण्यामनाःषोडशषोडशोष्णगोः

षडशीतिमुखसंज्ञंस्यात् तुलामेषयोः संक्रांतिर्विषुवसंज्ञा वृषसिंहवृश्चिककुंभेषुर्कसंक्रांतिर्विष्णुपद संज्ञका ४ संक्रांतौगौणमुख्यकालमुपजात्याह संक्रांतिकालादिति गणितमार्गेणयउष्णगोःसूर्यस्य संक्रांतिकालआगतः ततउभयत्रपूर्वतः परतश्चषोडशषोडशनाड्योघटिकाःपुण्यसंपादकत्वात्पुण्याम ताः ब्रह्मसिद्धांते संक्रांतेःप्राक्परस्ताच्चसार्द्धाःषोडशनाडिकाः त्रयस्त्रिंशत्संक्रमस्यपुण्याःसर्वस्यनाडि काः अनेनसंक्रांतेःपुण्यकालस्तुषोडशोभयतःकलाइतिस्मृतिवाक्येपूर्वतः परतश्चाष्टौअष्टौघटिकाइत्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्षोडशेति व्याख्यातंतदपाकृतंभवति सूर्यसिद्धांतेपि अर्कभानकलाः षष्ट्यागुणिताभक्तिभाजिताः तदर्ध नाड्यः संक्रांतेरर्वाक्पुण्यंतथापरेइति अथनिशीथतइति निशीथतोऽर्धरात्रात् अर्वाक्पूर्वपरत्रपश्चा च्चसंक्रांतिकालेसति पूर्वापराह्णांतिमपूर्वभागयोः पूर्वापरयोरह्नोः क्रमेणांतिमपूर्वभागयोरुभयत्रषोडशा षोडशघटिकाःपुण्याइतिपूर्वेणसंबंधः अयमर्थः यद्यर्धरात्रात् प्राक्संक्रांतिस्तदा पूर्वदिनस्योत्तरार्धपुण्यम् यद्यर्धरात्रादुपरिसंक्रांतिस्तदोत्तरदिनस्यपूर्वार्द्धमेवपुण्यमित्यर्थः अथार्द्धरात्रसंक्रमणेमकर कर्कटयोश्चविशेषमुपजातिकयाह पूर्णेइति पूर्णेनिशीथेअर्धरात्रेयदिसंक्रमःस्यात्तदादिनद्वयंपूर्वदिनं

निशीथतोर्वागपरत्रसंक्रमेपूर्वापराह्णांतिमपूर्वभागयोः पूर्णेनिशीथेयदिसं क्रमःस्याद्दिनद्वयंपुण्यमथोदयास्तात् पूर्वपरस्ताद्यदियाम्यसौम्यायनेदिनेपू र्वपरेतुपुण्ये ॥ परदिनंचपुण्यमुक्तम् उक्तंच यद्यर्द्धरात्रएवस्यात्संपूर्णेसंक्रमोरवेः तदादि नद्वयंपुण्यंस्नानदानादिकर्मसु अथेति अथानंतरमुदयास्तात् सूर्योदयात्सूर्यास्ताच्चपूर्वपरस्ताच्चयदि याम्यसौम्यायनेकर्कमकरसंक्रांतीभवतः तदापूर्वदिनेपुण्येस्याताम् अयमर्थः सूर्योदयात्पूर्वंकर्कसंक्रम णंस्यात्तदापूर्वदिनएवपुण्यकालोनोत्तरदिने नच यदिसूर्यास्तानंतरंमकरसंक्रांतिःस्यात्तदोत्तरदिनएव पुण्यकालोनपूर्वदिने मार्ग्यः यदास्तमानवेलायांमकरंयातिभास्करः प्रदोषेचार्द्धरात्रेवास्नानंदानंपरेहनि अर्धरात्रेनदूर्ध्वंवासंक्रांतौदक्षिणायने पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरविरिति ग्रहणार्थेप्रदोषलक्ष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णंस्कांदे त्रिमुहूर्तः प्रदोषःस्याद्दवावस्तंगतेसतीति ॥ अथोदयास्तादितिवचनस्यापवादमिंद्रवज्रयाह संध्यात्रीति अर्कमंडलादर्धोदितादर्धास्ताच्चाधऊर्ध्वंक्रमात्त्रिभिर्नाडीभिर्मितासंध्यासंध्याकालःस्यात् अर्धोदितार्कबिंबात्पूर्वत्रिनाडीमितापातःसंध्या तथार्धास्तादर्कबिंबादुपरित्रिनाडीमितासायंसंध्येत्यर्थः तत्रयोजनमाह अत्रेति अत्रप्रातःसंध्यायांसायंसंध्यायांचक्रमात्याम्यसौम्येअयनेस्तः तदानींपरपूर्वदिवसौपुण्योयदिप्रातःसंध्यायांदक्षिणायनप्रवृत्तिः तदासूर्योदयानंतरंसंपूर्णमहःपुण्यम् तथायदिसायंसंध्यायांउत्तरायणप्रवृत्तिस्तदासूर्यास्तात्पूर्वंसंपूर्णमहःपुण्यंस्यादित्यर्थः तदाहनारदः सूर्यास्तमनसंध्यायांयदिसौम्यायनंभवेत् तदोदयादहःपुण्यंपूर्वाह्णः पूर्वतोयदीति उदयसंध्यास्तसंध्ययोर्लक्ष

संध्यात्रिनाडीप्रमितार्कबिंबादर्धोदितास्तादधऊर्ध्वमत्र

णंतत्रैव अर्धार्कास्तमनात्संध्याघटिकात्रयसंमिता तथैवार्धोदयात्प्रातर्घटिकात्रयसंमितेति एवंसत्यर्कबिंबस्यार्धास्तादर्धोदयाद्वाक्रमात्पश्चात्प्राक्त्रिघटिमिता अस्तसंध्योदयसंध्यावोच्यते तत्रास्तसंध्यायांयदिमकरसंक्रमःस्यात्तदादिनएवपुण्यकालोनोत्तरदिने यद्यस्तसंध्यामतिक्रम्यमकरसंक्रांतिस्तदोत्तरदिनएवपुण्यकालोनपूर्वदिने एवंयद्युदयसंध्यायांकर्कसंक्रांतिस्तदासूर्योदयानंतरमेवपुण्यकालोनपाग्दिने यद्युदयसंध्यातःप्राक्कर्कसंक्रमस्तदाप्राग्दिनएवपुण्यकालोनोत्तरदिने इतिनिष्कृष्टोऽर्थः अथरात्रौस्नानंनकुर्वीतदानंचैवविशेषतइति रात्रौस्नानदानादिनिषेधेपि नैमित्तिकंतुकुर्वीतस्नानंदानंच

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रात्रिष्वितिक्रमंतुवाक्यशेषात् सूतजननेसंक्रांतावुपरागेसूर्यचंद्रयोर्नित्यम् रात्रावपिकर्त्तव्यंस्नानंदा
नंविशेषतोन्दृणामितिवसिष्ठवचनात् राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकंकार्यंनिशि
काम्यव्रतेषुचेति रात्रौसंक्रमणेरात्रौस्नानंभासंतत्कर्कमकरसंक्रांतौस्नानदानादौदेशभाषासिद्धशिष्टाचारे
णव्यवस्थावगंतव्या तत्रगौर्जरास्तु ग्रहणवदयनइतिस्वीयसूत्रम् स्नानंदानंग्रहणवत्सौम्ययाम्यायन
द्वयइतिकश्यपसंहितोक्तंचानुसृत्यरात्रावयनसंभवेसतिरात्रावेवस्नानादिकंकुर्वंतिदाक्षिणात्यास्तु का
र्मुकंतुपरित्यज्यमृषंयातिदिवाकर इत्यादिभविष्योत्तरादिवाक्यमंगीकृत्यदिवसएवस्नानादिकंकुर्वंति
तत्रापिनारदोक्तसंध्याकालसंक्रमेविशेषोध्येयइत्यलम् ७ अथपूर्वपराः षोडशघटिकाःपुण्याइतिपू

चेद्याम्यसौम्येअयनेक्रमात्स्तःपुण्यौतदानींपरपूर्वघस्रौ ७ याम्यायनेविष्णुप
देचाद्यामध्यास्तुलाजयोः वंसामान्येनोक्तमिदानींविष्णुपदादिविशेषमनुष्टुभाह याम्यायन
इति कर्कसंक्रांतौविष्णुपदेवृषसिंहवृश्चिककुंभसंक्रांतिषुसंक्रांतिकालादाद्याः प्रथमाः षोडशघटिकाः
अतिपुण्यदाः स्नानदानादौअनंतपुण्यदाज्ञेयाः अग्रिमास्तुनतथा तुलाजयोः तुलामेषयोः मध्याउभयतः
षोडशघटिकाःसंक्रांतिकालात्परतश्चाशविति दीपिकाकारेणव्याख्यातं यद्गुरुणा वर्तमानेतु
लामेषेनाद्यस्तूभयतोदशेतिमध्यमनृतीयांशाभिप्रायेणेतिज्ञेयम् तथाषडशीत्याननंमिथुनकन्याधनु
र्मीनसंक्रांतिषुसौम्येयनेमकरसंक्रांतौचसंक्रांतिकालात्परा अग्रिमषोडशघटिकाअतिपुण्याः प्रथमास्तुन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा एवंनिर्णीतेपुण्यकालेस्नानाद्यवश्यंविधेयम् तत्रस्नानाद्यकुर्वतः प्रत्यवायमाह वसिष्ठः विषुव
त्ययनेग्रहणेसंक्रांतौपुण्यदिवसेवा पितृतृप्तिंनकरोतिहिदत्ताशापंक्रनितस्यपिता षडशीत्यांतुयद्दानं
यद्दानंविषुवद्वये दृश्यतेसागरस्यांतस्तस्यांतोनैवदृश्यतइतिभरद्वाजोक्तेः अयंचनिर्णयश्चंद्रादीनामपिसं
क्रमेज्ञेयः तत्रहेमाद्र्यादौकालनिर्णयकारादिभिः याःपुण्यकालघटिकाउपनिबद्धास्ताः स्थूलात्तेनषष्टि
घ्नबिंबंग्रहभुक्तिभक्तमित्यादिप्रकारेणग्रहमध्येतु भुक्तिमध्यमविवरानीताः सूक्ष्मापटिकालिख्यंतेस्फु
टमतिस्फुटबिंबैश्चेत्साध्यंतेताअतिसूक्ष्मास्तासामतिपतत्वात् श्लोकं अनुपतिवधः मध्यमास्फुटयथा ना
ड्योरामगुणा ३२ रवेरथविधोः षट्दोः पलैर्युक्तंहृयम् २ २६ भौमस्याब्धिपलैर्युतानव ९ ४ विदोयुक्ताः

षडशीत्याननेसौम्येपरानाड्योतिपुण्यदाः ८ तथायनांशाःस्वरसाहताश्च
स्पष्टार्कगत्याविहृतादिनाद्यैः पलैःस्वाश्विभिः षट्नाड्यो ६ २० षृगजा ८८ गुरोरथभृ-
गोर्नंदाः पलैरष्टभिः ९ ८ पुण्याः स्युःस्वनृपाः १६० शनेरुभयतीरास्पृक्षयोः संक्रमेरिति ८ निरयनां-
शसंक्रांतिमभिधायेदानींसायनांशसंक्रांतिंसपुण्यकालामुपजात्याह तथेति यथाराशिसंक्रमाबहुपुण्य
दास्तथाचलसंक्रमाअपीतिव्यवहितस्तथाशब्दः अयनांशाः षष्ट्यागुण्याःस्पष्टसूर्यगत्याविहृतालब्धैर्दिना
द्यैर्दिनंघटीपलैः कृत्वामेषादिद्वादशसंक्रमाःस्युस्तेचलसंक्रमादानेजपादौजपश्राद्धहोमादौबहुपुण्यदाभ
वंति पुलस्त्यः अयनांशसंस्कृतोभानुर्गोलेचरतिसर्वदा अमुख्याराशिसंक्रांतिस्तुल्यः कालविधिस्तयोः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः सकलंचलसंक्रांतावक्षयंपुरुषोक्तमिति जाबालिरपि संक्रांतिषु यथाकालस्तदीयेष्ययनेतथा अयनेविंशतिःपूर्वामकरेविंशतिःपरेति अत्रमकरायणेपूर्वाविंशतिर्घटिका पुण्याःमकरसंक्रांतौत्वपराविंशतिर्घटिकाःपुण्यकालः मकरव्यतिरिक्तैकादशसंक्रांतिषुतत्तत्संक्रमवत्पुण्यकालोज्ञेयः अयनांशानयनादिविचारःसिद्धांतादवगंतव्यः ईश्वरेच्छालोकादृष्टवशात्तत्तद्राश्यादिभागस्य सूर्यतेजःसंपर्कश्चलसंक्रमः मंडलसंक्रमश्चराशिसंक्रमइतिविषयविवेकः तत्रनिरयनगणनयैवसकलव्यवहारःसाध्यःसायनगणनातुनियतविषयैव अयनांशैःप्रदातव्यालग्नेक्रांतौचरागमे विषुभेसविषुभेपाते

मेषादितःपाक्चलसंक्रमाःस्युर्दानेजपादौबहुपुण्यदास्ते ९ समंमृदुक्षिप्रवसुश्रवोग्निमघाविपूर्वास्त्रपमंबृहत्स्यात् ध्रुवहिदैवादितिभंजघन्यंसार्पांबुपार्द्रानिलशाक्रयाम्यम् १०

तथादृक्कर्मपातयोरिति एवंद्वयोरपिमानयोरसंकीर्णोव्यवहारइतिसर्वमनाकुलम् पुण्यकालस्तूभयविधसंक्रमेपिज्ञेयः पूर्वलिखितवाक्यस्यस्मरणात् ९ अथसंक्रांत्यपवादभजघन्यबृहत्समनक्षत्राण्युपजात्याह समामिति मृदुक्षिप्रवसुश्रवोग्निमघाविपूर्वास्त्रपमंसमम् अस्त्रपमंमूलम् एतानिपंचदशभानिसमसंज्ञानिज्ञेयानि ध्रुवहिदैवादितिभंबृहत्स्यात् ध्रुवहिषट्भानिबृहत्संज्ञकानि सार्पांबुपार्द्रानिलशाक्रयाम्यंजघन्यंस्यात् आश्लेषादिषट्भानिजघन्यसंज्ञानि १० अथसंज्ञाप्रयोजनमुपेंद्रवज्रयाह जघन्यमेइति जघन्यनक्षत्रेऽर्कसंक्रमणेपंचदशमुहूर्ताज्ञेयाः बृहन्नक्षत्रेऽर्कसंक्रमणेवा ५६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षङ्कृताः पंचचत्वारिंशन्मुहूर्ताज्ञेयाः समनक्षत्रेऽर्कसंक्रमणेखरामसंख्यास्त्रिंशन्मुहूर्ताज्ञेयाः उक्तंचनारदेन तासांप्रमाणंघटिकास्त्रिंशन्नवतिषष्टयइतिफलमाह महर्घसमर्घसाम्यमिति पंचदशमुहूर्तायांसंक्रांतौसर्वमन्नंमहर्घंदुष्प्रापंभवति पंचचत्वारिंशन्मुहूर्तेसंक्रांतौसमर्घंत्रिंशन्मुहूर्तायांसंक्रांतौसमंयथास्थितंभवति विधुदर्शनेपीतिचंद्रदर्शनेप्येवमेवफलंवाच्यम् अयमर्थः जघन्यभेचंद्रदर्शनेमहर्घम् रहन्नक्षत्रेचंद्रदर्शनेसमर्घम् समभेचंद्रदर्शनेसाम्यम् ११ अथप्रसंगात्कर्कसंक्रांतौमेघविशोपकाननुशुभाह अर्कादीति कर्कसंक्रांतौअर्कादिवारेसतिएतेअब्दविशोपकाज्ञेयाः यथा रविवारेकर्कसंक्रांतौद-

जघन्यभेसंक्रमणेमुहूर्ताःशरेंदवो १५ बाणकृता ४५ बृहत्सक रखराम ३० संख्या
समभेमहर्घसमर्घसाम्यंविधुदर्शनेऽपि ११ अर्कादिवारेसंक्रांतौकर्कस्याब्द-
विशोपकाः दिशोनरवागजाःसूर्याधृत्योष्टादशसायकाः १२

शविशोपकाः एवंसोमेविंशतिः भौमेशौ ज्ञेद्वादश गुरौधृत्योष्टादश शुक्रेष्टादश शनौपंचेत्यर्थः १२ अथकीदृशस्यरवेः संक्रमोजातस्तत्फलमिंद्रवज्रयाह स्यात्तैतिलेइति रविस्तैतिलेकरणेनागकरणेचतुष्पदेचकरणेसकुसः संक्रमितः स्यात् गरादिपंचगरेवणिजेभद्रायांबवेबालवेचनिविष्टः संक्रमितःस्यात् किंस्तुघ्नेसकौलवेशकुनौचऊर्ध्वः ऊर्ध्वस्थितः संक्रमितःस्यात् इहकरणाधिकरणकसंक्रांतौरविःअर्घवर्षणे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्घेमूल्येवर्षणेवृष्ट्यैउपलक्षणत्वादन्नेपिक्रमादनिष्टःसमःश्रेष्ठःस्यात् अयमर्थः सकलरविसंक्रमाअर्घ वर्षणधान्येष्वनिष्टः महार्घवृष्ट्याभावधान्याभावकारकाः एवंनिविष्टः समः तथोर्ध्वः श्रेष्ठः उक्तंचश्रीपति ना धान्यार्घवृष्टिषुभवेत्क्रमशस्त्वनिष्टमध्येष्टनेति १३ अथरविसंक्रांतेः करणपरत्वेनवाहनवस्त्रायुध भक्ष्यलेपनजातिपुष्पाणिसफलानिशार्दूलविक्रीडितत्रयेणोपजातिकयाचाह सिंहेति सङ्केति यावत्येति स्यान्मल्लिकेति बवतोबवमारभ्यैकादशकरणेष्वुल्कमेणवाहनादीनिस्युः वाहनानि सिंहादीनि रासभो गर्दभः वाहद्विषन्महिषः लुलायोमहिषोवाहद्विट्कासरसैरभादत्यमरः अजोमेषः चरणायुधः कुक्कुटः

स्यात्तैनिलेनागचतुष्पदेरविः सकलोनिविष्टरुक्षगरादिपंचके किंस्तुघ्नऊर्ध्वः श कुनौसकौलवेऽनिष्टःसमःश्रेष्ठइहार्घवर्षणे १३ सिंहव्याघ्रवराहरासभग जावाहद्विषद्घोटकाः श्वाजोगौश्चरणायुधश्च बवतोवाहारवेःसंक्रमे वस्त्रंश्वे तसकपीतहारितकपांडुरारक्तकालासितंचित्रंकंबलदिग्घनाभमथशस्त्रंस्याद्बुधे ऊगदा १४ नारदेनतुविशेषउक्तः स्वशबाल्हीकवंगेषुसंक्रांतेर्धिष्ण्यवाहनम् अन्यदेशेषुतिथ्य र्धवाहनाःस्युर्बवादयश्चेति अश्विन्यांयदासंक्रांतिस्तदाश्विन्याः योअश्वस्तद्वाहनंस्यात् स्वशादिदेशेषु ए वंसर्वनक्षत्रेषु अथवस्त्रंश्वेतादि हारितंनीलवर्णम् पांडु अरुणवर्णम् आरक्तमलक्तकवर्णम् कालं श्यामं असितंश्वेतवर्णरहितम् गर्दभवर्णमित्यर्थः दिग्वस्त्राभावः घनाभंमेघवर्णम् अथशस्त्रम् फ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शकंड्यादीनिआयुधानिप्रसिद्धानि अथभक्ष्यम् अन्नंभक्तः परमान्नंपायसम् भैक्ष्यंभिक्षासमूहपक्वान्न
मपूपादि चित्रितान्नंहरिद्रादिरंजितम् अथलेपोविलेपनम् मृगनाभिःकस्तूरी कुंकुमंकेशरम् पाटीरंचं
दनम् मृत्प्रसिद्धा रोचनंगोरोचनमिति १४ १५ यावोऽलक्तकः ओतुर्मदोमार्जारधर्मः भाषयाजवादिरि
ति निशाहरिद्रा अंजनंकज्जलम् कालागरुरगरुविशेषः चंद्रकःकर्पूरः अथजातिः संकरभवाअनुलोम
जाः प्रतिलोमजाश्च अथपुष्पम् पुंनागकंनागकेशरपुष्पम् मल्लिकावेलिः जपाओदुपुष्पंजासवनम् शे

खड्गोदंडशरासितोमरमथोकुंतश्चपाशोकुशोरुत्रंबाणस्त्वथभक्ष्यमन्नपरमा
न्नंभैक्ष्यपक्वान्नकम् दुग्धंदध्यपिचित्रितान्नगुडमध्याज्यंतथाशर्करा थोलेपो
मृगनाभिकुंकुममथोपाटीरमृद्रोचनम् १५ यावश्चोतुमदोनिशांजनमथोकाला
गरुश्चंद्रकोजातिर्दैवतभूतसर्पविहगाः पश्वेणविप्रास्ततः क्षत्रावैश्यकशूद्रसंकर
भवाःपुष्पंचपुंनागकंजातीबाकुलकेतकानिचतथाबिल्वार्कदूर्वाबुजम् १६

षाणिप्रसिद्धानिसर्वत्र क्वचिद्द्वयोप्युक्तम् शिशुःकुमारश्चगतालकायुवाप्रौढापगल्भाचततश्चवृद्धा वंध्या
तिवंध्याचसूतार्थिनीचप्रव्राजिकाचेतिबवादिकानामिति तथाक्वचित् भोजनपात्रमप्युक्तम् सुवर्णरौप्य
ताम्राणिलोहंसीसंत्रपुस्तथा कांस्यपाषाणकाष्ठंचमृत्पात्रंवेणुपात्रकमिति एवंसंक्रमकालेयानिवस्त्रा
शनवाहनादीन्यभिहितानि आदिशब्देनायुधलेपनजातिपुष्पाणिलेषांनाशोभवेत् नपुनस्तदुपजीवि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नांवस्त्रादिरूत्कपजीविनांनाशोभवेत् स्थितोपविष्टः स्वपतांचस्यान्नौतिलेइत्यादिनासूक्तसत्रादीन्युक्तानि तद्गुणविशिष्टानांनाशःस्यादित्यर्थः १६ १७ अथसंक्रांतिवशेनमतिमनुष्यंशुभाशुभमुपजात्याह संक्रांतीति संक्रांतिर्यस्मिन्नक्षत्रेस्यात्ततोऽधरधिष्ण्यंपूर्वनक्षत्रंतस्मात्स्वजन्मनक्षत्रंगण्यम् तच्चेत्त्रिभेभवतितदागमनंयात्रास्यात् ततःप्रथमत्रिकानंतरंअंगभेषण्णक्षत्रेषुयदिस्वभेतदासूक्तंस्यात्तत्र तस्त्रिभे पीउनंशरीरपीडा पुनरंगभेअंशूकंवस्त्रादिप्राप्तिः ततः त्रिभेस्वभेऽर्थहानिः ततोरसभेस्वभे

स्यान्मल्लिकापाटलिकाजपात्रसंक्रांतिवस्त्राशनवाहनादेः नाशश्चतद्रूपक जीविनांचस्थितोपविष्टः स्वपतांचनाशः १७ संक्रांतिधिष्ण्याधरधिष्ण्यतस्त्रि भेस्वभेनिरुक्तंगमनंततोंगभे सूक्तंत्रिभेपीउनमंगभेशुक्रंत्रिभेऽर्थहानीरसभे धनागमः १८ नृपेक्षणंसर्वकृतिश्चसंगरः शास्त्रंविवाहोगमदीक्षणोरवेः

धनागमोधनप्राप्तिःस्यादित्यर्थः अशुभफलदायांसंक्रांतौदानमाहनारदः तिलोपरिलिखेच्चक्रंत्रिभूलंत्रिकोणकम् तत्र हेमविनिक्षिप्यदद्याद्दोषापनुत्तयेइति १८ अथकार्यविशेषग्रहविशेषबलंसामान्यतोग्रहबलंचोपजात्याह् नृपेक्षणमिति रवेरितित्यप्लोपेपंचमी सूर्यबलेसति एतानिकार्याणिकार्याणि यथारवेः अर्कबलेवारेवानृपेक्षणंराजदर्शनंविधेयम् एवंचंद्रादावपिव्याख्येयम् चंद्रेसर्वकृतिः सर्वकृत्यानि भौमेसंगरोयुद्धम् बुधेशास्त्रमध्येयंअध्याप्यंवा गुरौविवाहः शुक्रेगमनम् शनौदीक्षणाद्या ५८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गमादिदीक्षाविधेयेत्यर्थः अथेति तारा बलतोविधुः शुभोज्ञेयः यदाचंद्रसंक्रमणंस्यात्तदातारंबलंचेत्त-
दासपादद्विनद्वयंचंद्रोः शुभोपिशुभः तारादौष्येशुभोप्यशुभः एवंविधोबलाद्विधुसंक्रमणेः शुभोपिमा
सपर्यंतंशुभः शुभस्तुसुतरांसमीचीनएवचंद्रदौष्येशुभोपि अशुभइत्यर्थः परेभौमादयः संक्रांतिवि
कीर्षवस्तत्तद्बलतः सूर्यबलादशुभाअपिशुभाज्ञेयाः रविदौष्येतुशुभाअप्यशुभाः १९ अथाधिमास
क्षयमासयोर्लक्षणमुपजात्याह स्पष्टार्केति शुक्लप्रतिपदिदर्शांतश्चांद्रोमासः सचेत्स्पष्टसूर्यसंक्रांत्या
विहीनोरहितोभवेत्तदाधिमासउक्तः चांद्रोमासोह्यसंक्रांतोमलमासः प्रकीर्तितइतिब्रह्मसिद्धांतोक्तेः तु

धीर्येथतारा बलतः शुभोविधुर्विधोर्बलेः र्कः र्कबलेकुजादयः १९ स्पष्टार्क
संक्रांतिविहीनउक्तोमासोधिमासः क्षयमासकस्तु

विशेषेकदाचित्सचांद्रोमासोद्विसंक्र
मःद्वौसंक्रमौयस्मिन्नसौद्विसंक्रमः स्पष्टसूर्यसंक्रांतिद्वययुतस्तदाक्षयमाससंज्ञकउक्तः आद्यंनदर्शयोर्म
ध्येभानोरेवतयोर्यदासंक्रांतिद्वितयंचेत्स्यात्क्षयमासः सउच्यते इतिवसिष्ठोक्तेः तत्रक्षयमासेजातानांव
र्धापनेमृतानांश्राद्धेचतिथेर्विभागयोः पूर्वोत्तरदलयोः संबंधेनप्रथमांतसंज्ञोमासोस्तः स्यातामू तिथिपू
र्वार्धजातानांमृतानांचपूर्वमासेवर्धापनंश्राद्धंचविधेयंतिथ्युत्तरार्धजातानांमृतानांचोत्तरमासेवर्धापनंश्रा
द्धंचविधेयम् तिथ्यर्धेप्रथमेपूर्वोः परस्मिन्नपरस्तथा मासाविति बुधैश्चिंत्यौक्षयमासस्यमध्यगौद्विति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मासादिलक्षणभेदविचारस्तद्ग्रंथगौरवभयान्नलिखितः २० इतिश्रीदैवज्ञानंदसूनुदैवज्ञश्रीमहि
रचितायांस्वकृतमुहूर्तचिंतामणिटीकायांपद्मिताक्षरायांसंक्रांतिप्रकरणंसमाप्तमृतीयम् ३ ७
अथग्रंथांतरेसंग्रहः योगिनीस्थितकाष्ठातःसंक्रांतेरागमोमतः चंद्रस्थदिशिदृष्टिःस्यात्गमनंवारदि
क्स्मृतम् इतिकश्चित् रवौसंक्रमणेपूर्वेमुखंजीवेतुउत्तरे मत्यऋक्षुखंशनौसोमेशेषेदक्षिणतोमुखंइति
बवेपूर्वमुखंप्रोक्तंबालवेयमदिग्मुखम् कौलवेपश्चिममुखंतैतिलेचोत्तरेमुखम् गरेवायव्यदिग्वल्कं व
णिज्याग्नेयदिङ्मुखम् भद्रायामीशदिग्वल्कंशकुनेनैर्ऋतोमुखम् चतुष्पदेपातालेनागेचोर्ध्वमुखी

द्दिसंक्रमात्तत्रविभागयोस्तस्तिथेर्हिमासौप्रथमांत्यसंज्ञौ २०
इतिमुहूर्तचिंतामणौसंक्रांतिप्रकरणंतृतीयंसमाप्तम् ३ ७
अथगोचरप्रकरणमारंभः सूर्यारसांत्येरवयुगेग्निनंदेशिवा
क्षयोर्भौमशनीतमश्च भवेत् किंस्तुघ्नेसर्वदिग्वल्कंसंक्रांतिमुखलक्षणम् अथदृ
ष्टिः चंद्रेगुरौदृष्टिर्विदिक्कृशानौसूर्येसितेनैर्ऋतिकोणगादृक् धात्रीसुतेदृक्पवनेनिरुक्तबुधेशनौरु
द्दिशीक्षणंभवेत् अथगमनम् मंदेचंद्रेगमःसौम्येबुधेभौमेचवारुणे रवौशुक्रेगमोयाम्येगुरौभाग्गमनंस्मृ
तमिति ७ ७ ७ अथगोचरप्रकरणंव्याख्यायते तत्रजन्मराशेः सकाशाद्ग्रहाणांचार ५९
वशेनयच्छुभाशुभफलंतद्गोचरफलमित्युच्यते तत्ररविचंद्रयोर्गोचरफलमुपजातिकयाह सूर्यइति र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सांत्येदित्यादौसमाहारद्वंद्वः शिवाक्षयोरित्यादावितरेतरयोगः अंबराब्धावित्यागमशासनमितिनुम भावोध्येयः एवंसर्वत्र स्वजन्मराशेरितिपंचमश्लोकस्थमत्राध्याहार्यम् ततःसूर्यःक्रमान्रसांत्येशुभो-विद्रश्वस्यात् सूर्योजन्मराशेःसकाशात्षष्ठस्थानेशुभः यदिततएवजन्मराशेर्द्वादशस्थानस्थाअन्येग्रहा स्तदाविद्धः सूर्यः शुभोप्यशुभफलदाता अत्रशनेःसूर्यपुत्रत्वात्तद्वेधोनांगीकृतःयतः पितुर्जनकस्यकृ-तसंबंधिनंवेधनंवेधंनाहुः कृतस्यापिपितृसंबंधिनंवेधंनाहुः तथारसयुगेजन्मराशेर्दशमेसूर्यःशुभः चे च्चतुर्थस्थानेशनिवर्जिताअन्येग्रहाःस्युस्तदाविद्धइत्येवंश्लोकत्रयंसम्यग्व्याख्येयम् तथाग्निनंदेतृतीयन

रसांकयोर्लाभशरेगुणांत्येचंद्रोंबराब्धौगुणनंदयोश्च १ लाभाष्टमेचाद्य शरेरसांत्येनगद्वयेज्ञोद्विशरेब्धिरामे रसांकयोर्नागविधौखनागेलाभव्य येदेवगुरुःशराब्धौ २

वमयोः शिवाक्षयोरेकादशपंचमयोः क्रमाच्छुभोविद्रश्वज्ञेयः शो भेति भौमशनी तमोगुश्चत्रयोपिजन्मराशितः रसांकयोः लाभशरेगुणांत्ये क्रमाच्छुभाविद्धाश्चेत्यर्थः परंतुशनेः सूर्यवेधोनास्तीत्यक्तंप्राक् चंद्रोंबराब्धौइत्यग्रे १ अथबुधगुरुशुक्राणांगोचरफलंउपजाति केंद्रवज्राभ्यासुपजातिकापूर्वार्द्धेनाह चंद्रइति जन्मभात् अंबराब्धौ गुणनंदयोः लाभाष्टमेआद्यशरेर सांत्येनगद्वये चंद्रः क्रमाच्छुभोविद्रश्वज्ञेयः चंद्रस्यबुधवेधोनास्ति अथज्ञइति द्विशरे अब्धिरामेरसां कयोः नागविधौ खनागे लाभव्यये ज्ञोबुधःक्रमात् शुभोविद्रश्वज्ञेयः अत्रचंद्रवेधोनास्ति अथदेवगुरु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिति जन्मभात् शराब्धौ द्व्यंत्येनवाशे अद्रिगुणे शिवाहौ देवगुरुर्बृहस्पतिः क्रमाच्छुभोविद्वश्चज्ञेयः अथशुक्रइति जन्मराशेःसकाशात्कुनागे द्विनगे अग्निरूपे वेदांबरे पंचनिधौ गजेषौ नंदेशयोःभानुरसे शिवाग्नौ शुक्रः क्रमाच्छुभोविद्वश्चज्ञेयः अत्रेदंतात्पर्यम् सूर्योरसांत्येइत्यादिप्राक्पठितस्थानेषुविद्यमानःससग्रहःशुभदः तदनंतरपठितस्थानेषुस्थितोअशुभफलदाता अर्थादेवानुक्तस्थानेषु नशुभोनाप्यशुभइति २ ३ अथवामवेधंशुक्रुपक्षेचंद्रबलंचोपजात्युत्तरार्धेनाह दुश्चोपीति दुश्चोपि स्वजन्मराशेःसकाशादनंतरंपठितविरुद्धस्थानस्थितोपिविपरीतवेधाद्वामवेधाच्छुभः यथासूर्याद्यद

द्व्यंत्येनवाशेद्रिगुणेशिवाहौशुक्रः कुनागेद्विनगेग्निरूपे वेदांबरेपंचनिधौ गजेषौनंदेशयोर्भानुरसेशिवाग्नौ ३ क्रमाच्छुभोविद्वइतिग्रहःस्यात्पितुः सुतस्यात्रनवेधमाहुः दुश्चोपिरवेटोविपरीतवेधाच्छुभोद्विकोणेशुभदःसितेज्ञः ४ शेऽनिष्टइत्यर्कसुताकसयदिशानिवर्जितैर्ग्रहैः षष्ठस्थानस्थितैर्विद्धःसन्शुभफलदाता एवमुत्तरस्थानस्थितोयः कश्चिद्ग्रहःपाक्पठितस्थानस्थितैर्ग्रहैर्विद्धैःशुभइति सर्वत्रव्याख्येयम् अयमेववामवेधइत्युच्यते कश्यपः अपिविद्धोग्रहः किंचिन्ननददातिशुभंफलम् वामवेधविधानेनलशुभोपिशुभप्रदः द्विकोणेइति सितेशुक्रुपक्षेअब्जश्चंद्रोद्वितीयनवपंचमेषुस्थितःशुभदः अत्रापिक्रमेणषष्ठाष्टमचतुर्थस्थानस्थितैर्बुधवर्जितैर्ग्रहैर्यदिनविद्धस्तदाशुभइतिध्येयम् नारदः शुक्लपक्षेशु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुभ्यंद्रोद्वितीयनवपंचमे रिपुमृत्यंबुसंस्थैश्चनविद्धोगगनेचरैरिति ४ अथद्विविधमतमुपजात्याह स्वजन्मराशेरिति इहद्विविधवेधविधौअन्येनारदादयः स्वजन्मराशेःसकाशात्द्विविधमपिवेधमाहुः तथा चोभयत्रापिनारदेनजन्मतश्क्रमम् अन्येकश्यपादयःसपुनर्द्विविधोग्रहाधिष्ठितराशितः ग्रहोयस्मिन्राशौ तिष्ठतितत एवक्रमाद्वेधोवामवेधश्चभवति यथा सूर्योजन्मराशेःषष्ठःस्थितःशुभःससूर्याक्रांतराशेर्द्वादशस्थानस्थितैःशनिवर्जितैर्ग्रहैर्विद्धः तथासूर्योद्वादशस्थानस्थितोनिष्टः सूर्यःस्वाक्रांतराशेःषष्ठस्थानस्थितैः शनिवर्जितैर्ग्रहैर्विद्धश्चेत्तदाशुभफलदइत्यर्थः अथद्विविधवेधस्यैवविषयकल्पनोच्यते हिमाद्रीति हिमाचलविंध्याचलयोर्मध्यवर्तिन्येवदेशेसवेधोविज्ञेयः नसर्वदेशेषु इतिकाश्यपोक्तिः काश्यपवचनेयदाह ज्ञा

स्वजन्मराशेरिहवेधमाहुरन्येग्रहाधिष्ठितराशितःसः हिमाद्रिविंध्यांतरएववे
धोनसर्वदेशेष्विति काश्यपोक्तिः ५ तत्र्यंजन्मराशेरुक्तनिखिलंग्रहबलम् हिमाद्रिविंध्य

योर्मध्येवेधजंतद्बलयात् अपरेतु सूर्योरसांत्यइतिक्रामिकेवेधोजन्मराशेरेवज्ञेयः विपरीतवेधस्तुग्रहा धिष्ठितराशितएवेतिवदंति गुरुः जन्मतः क्रमवेधःस्याद्वामवेधोग्रहाद्यथेति इदमपिहिमाद्रिविंध्यांतरवि षयमेवेत्यन्ये एतज्ज्ञानंदुर्घटमित्याहनारदः अज्ञात्वाद्विविधंवेधंयोग्रहज्ञोबलंवदेत् समृषावचनाभाषीहा स्यंयातिजनेसदेति एवंगोचरदौष्ठ्येयात्रादिनकार्यम् तत्रशांतिमाहनारदः ग्रहेषुविषमस्थेषुशांतिंयत्नात्स माचरेदिति सौम्येक्षितेनिष्टफलःशुभदःपापवीक्षितः निष्फलोतीग्रहौस्वेनशत्रुणाचावलोकितः नीचराशि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गतःस्वस्थशत्रुःक्षेत्रगतोपिवा शुभाशुभफलंनैवदद्यादस्तंगतोपिवेति एतादृशस्थलेदुष्टत्वाभावादेवशां त्याभावइतिफलितोर्थः ५ अथगोचरप्रस्तावान्ग्रहणीयनक्षत्रफलंग्रहणीयराहुगोचरफलंग्रहणाश्च भप्रतीकारंचदुष्टग्रहणदर्शननिषेधंचशार्दूलविक्रीडितेनाह जन्मर्क्षेइति यस्यजन्मनक्षत्रेग्रहेग्रहणेसति निधनंमरणंस्यात् वसिष्ठः यस्यैवजन्मनक्षत्रेग्रस्येतेशशिभास्करौ तस्यव्याधिभयंघोरंजन्मराशौधनक्षय इति विशेषोभार्गवीये यस्यराज्यस्यनक्षत्रेस्वर्भानुरुपरज्यते राज्यभंगंसुहृन्नाशंमरणंवात्रनिर्दिशेदिति राज्यस्यनक्षत्रेराज्याभिषेकनक्षत्रे अथराशिफलम् जनिभतइतिजन्मराशेरारभ्यग्रहणेसतिक्रमेणघा-

जन्मर्क्षेनिधनंग्रहेनिजभतोघातः क्षतिःश्रीर्व्यथाचिंतासौख्यकलत्रदौस्थ्यमृत
यःस्युर्मानविनाशःसुखम् लाभोपायइतिक्रमात्तदशुभध्वस्यैजपःस्वर्णगोदानंशां
तिरथोग्रहंलशुभदंनोवीक्ष्यमाहुःपरे ६ तादिकंफलंभवति यथाजन्मराशौग्रहणेसति

घातःशरीरपीडाद्वितीयराशौक्षतिर्द्रव्यनाशः तृतीयराशौश्रीलक्ष्मीप्राप्तिः चतुर्थराशौव्यथाशरीरपी
डा पंचमराशौचिंतापुत्रादीनाम् षष्ठराशौसौख्यम् सप्तमराशौकलत्रदौस्थ्यंस्त्रीकष्टम् अष्टमराशौमृ
तिर्मरणम् नवमराशौमाननाशः दशमराशौसुखम् एकादशराशौलाभप्राप्तिः द्वादशराशौअपायोना
शः आत्मनइतिकेचित् द्रव्यस्येत्यपरे इदंषण्मासपर्यंतमितिज्ञेयम् तदनंतरंग्रहणांतरसंभावनाय उ
क्तंचदैवज्ञमनोहरे घातंहानिमथश्रियंजननमाह्वास्तिचिंताक्रमात्सौख्यंदारवियोजनंचकुरुतेव्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धिंचमानक्षयम् सिंहिकाभ्रमपायमर्कशशिनोः षण्मासमध्येग्रहइति अथाशुभसूचकग्रहणम
तीकारमाह तदशुभमिति तस्यग्रहणाशुभस्यध्वस्त्यैनाशायजपस्वर्णगोदानंजपोगायत्र्यादिमंत्राणाम्
स्वर्णंसुवर्णम् गौर्धेनुःभूमिर्वा उपलक्षणत्वादन्येषांरूप्यादीनाम् यथाशक्त्यादानंकार्यमितिशेषः
तद्दौस्थ्यप्रणुकदुक्तवज्जपविधिस्वर्णादिदानंभवेदित्युक्तेः दानंज्योतिर्निबंधे सुवर्णनिर्मितंनागंसति
लंताम्रभाजने सदक्षिणंसवस्त्रंचश्रोत्रियायनिवेदयेत् मंत्रश्चतमोमयमहाभीमसोमसूर्यविमर्दन
हेमनागप्रदानेनममशांतिप्रदोभवेति स्कांदे गोदानंभूमिदानंचस्वर्णदानंविशेषतः ग्रहणक्लेशनाशा
यदैवज्ञायनिवेदयेत् इतिव्यासेनोक्तम् सर्वगंगासरित्तोयंसर्वेब्रह्मसमाद्विजाः सर्वंभूमिसमंदानंग्रह
णेचंद्रसूर्ययोरिति अन्यच्च ग्रस्यमानेभवेत्स्नानंग्रस्तेहोमोविधीयते मुच्यमानेभवेद्दानंमुक्तेस्नानं
विधीयतइति सूर्येंदुग्रहणंयावत्तावत्कुर्याज्जपादिकमितिशिवरहस्योक्तेःजपमादिशब्दाद्देवार्चना
दिकार्यम् अथस्थानविशेषेणग्रहणमरिष्टजनकमित्युक्तम् तद्दृष्टमुतादृष्टमपीतिसंशयेनिर्णयमा
ह अथोइति तुविशेषे परेआचार्याः अशुभदंग्रहणंतुनोवीक्ष्यंनदृष्टव्यमित्याहुः उक्तंच जन्मसप्ता
ष्टरिःफांकदशमस्थेनिशाकरे दृष्टोरिष्टप्रदोराहुर्जन्मर्क्षेनिधनेनथा जन्मर्क्षंजन्मनक्षत्रं निधनंवधता-
रासप्तमी अत्रदृष्टइतिपदश्रवणाद्दर्शनंचाक्षुषंविवक्षितमितितेषामाशयश्चाक्षुषज्ञानएवदृशेर्मुख्य
त्वेइतिपरेषांमतम् तदसत् अदृश्यरूपाःकालस्यमूर्तयोभगणाश्रिताः शीघ्रमंदोच्चपातारव्याग्रहा
णांगतिहेतवेइतिसूर्यसिद्धांतेपातानामदृश्यतोक्ता पातोराहुश्चपर्यायः दक्षिणोत्तरयोरेवंपातोराहुश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रंहसा विक्षिपत्येवविक्षेपश्चंद्रादीनामयंक्रमादितिसूर्यसिद्धांतोक्तेः अतःपातानामदृश्यत्वात् राहो
र्दर्शनमेवानुपपन्नम् ननुग्रहणेचंद्रसूर्ययोश्छादकोराहुर्दृश्यतएव अतएवराहुग्रस्तेनिशाकरइत्या
दिपुराणोक्तिरपीतिचेन्न भानोर्भार्धेमहीछायानतुल्येर्कसमेपिवा शशांकपातेग्रहणंक्रियद्भागाधि
कोनकदत्यपक्रम्य छादकोभास्करस्येंदुरधस्थोघनवद्भवेत् भूछायांशाज्जुस्वश्चंद्रोविशत्यस्यभवेद
सौ असौभूछायाअस्यचंद्रस्यछादकोकामवेदित्यर्थः सूर्यसिद्धांते छाद्यछादकभावोऽभिहितःस्प
ष्टएव पुराणविरोधपरिहारस्तुभास्करेणैवराहुः कुभामंडलगः शशीकमित्यादिनोक्तम् वराहेणापि
तस्मिन्कालेसान्निध्यमस्यतेनोपचर्यतेराहुरित्युक्तातस्माद्राहोर्दर्शनंनास्त्येव तन्मतेदर्शनंचाक्षुषमेव
विवक्षितम् एवंचराहोर्दर्शनंराहुदर्शनमितितत्पुरुषोत्तुपपन्नः नस्माद्दर्शनशब्देनोपरागोलक्ष्यते
राहुदर्शनराहूपरागस्तस्मिन्राहुदर्शनेइति अयमर्थः राहुर्नामपानस्तत्संबंधेनदर्शनमुपरागइति
नचराहुरेवलक्षणयोपरागपरस्तस्यदर्शनमितिपूर्वपक्षाभिमतार्थसिद्धिरितिवाच्यम् लक्षणयालब्ध
र्थानरासंभवेसतिवक्तव्या अत्यंतादर्शनाराहोस्तथाचात्यंतदर्शने अजापीडाविनिर्देश्याव्याधिदुर्भि
क्षतस्करैरितिविष्णुधर्मोत्तरादिवाक्येषुपदांतरासंनिधानाद्राहुशब्देनोपरागोलक्ष्यतेइहचराहोःपा
तारव्यंग्रहगतिरूपमर्थांतरमस्तीत्यतोराहुदर्शनग्रहपातयोःसमानार्थकंनास्तीत्येवसिद्धमितिप्रागुक्ता
नांसर्ववचसांग्रहणेस्नायादित्येकवाक्यार्थः फलितोभवति केचित्तुदर्शनादर्शनविषयकयोस्तुविध्यो
स्तुल्यबलत्वात्सकृदृक्षास्नायादितिवदंति तदसत् जन्मसप्तार्किः फांकेत्यादिनासामान्यतोनिषिद्ध

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यउपरक्तदर्शनस्य नेक्षेतोद्यंतमादित्यंनास्तंयांतंकदाचन नोपरक्तंनवारिस्थंनमध्यंनभसोगतमि
तिमनूक्तोपरक्तदर्शनस्यपुनर्निषेधानुपपत्तेःमाणुक्तदिशाराहुदर्शनपदस्यराहूपरागलक्षकत्वेनतुल्य
बलत्वाभावात् तस्मादुपरक्तयोःसूर्यचंद्रमसोर्यस्यकस्यापिदर्शननिषेधसत्वात्ग्रहणेचस्नानदाना
द्युक्तेस्तद्दानंचज्योतिःशास्त्रैकदेशगणितग्रंथेभ्योबुध्वातस्मिन्काले दानादिविधेयमितिसिद्धांतः अत
एवमेघाद्यावृतेषुउपरागेस्नानादिविधेयमेव रात्रौसूर्येपरागेदिवाचंद्रेपरागेचस्नानादिकंतुवचनान्न
भवति नदुक्तंनिगमे सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहोयदि तत्रस्नानंनकुर्वीतदद्याद्दानंनचक्वचिदिति
तादृशेग्रहणेदुष्टेपिदोषोनास्तीत्यपिसूचितं आवालिक्यंतु संक्रांतेःपुण्यकालस्तुषोडशोभयतःक
लाःचंद्रसूर्योपरागेतुयावद्दर्शनगोचरइतिग्रस्तास्तमयनपर्यंतंदर्शनगोचरत्वात्तावान्कालःपुण्य-
कालोभवतीतिव्याचख्युः नदुक्तंविश्वरूपनिबंधे दिवाचंद्रग्रहोरात्रौसूर्यपर्वनपुण्यदम् संधिस्थंपु
ण्यवज्ज्ञेयंयावद्दर्शनगोचरइति अन्येतु सूर्यस्यादर्शनंरात्रिर्दिनंतद्दर्शनात्मिकम् भुजवृत्तादुपरिच
स्थितोर्कोदर्शनंस्मृतमितिवसिष्ठसिद्धांतवचनान्मेघावृतेःनावृतेचोपरागेगणितागतस्थितिघटिकाः
पुण्यकालइत्याहुः यत्राकाशोभूम्यासहसंलग्नमिवदृश्यतेसप्रदेशोभुजशब्दवाच्यःअर्कइत्यपलक्ष
णंचंद्रादिग्रहनक्षत्राणाम् विष्णुधर्मोत्तरे अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहोयदा मुक्तंदृष्ट्वातुभो
क्तव्यंस्नानंकृत्वाततःपरमिति यस्तस्तेयुरुःग्रस्तावेवास्तमानंतुरवींदूग्रसतोयदि तयोःपरेद्युरुद
येस्नात्वाभ्यवहरेन्नरः इत्यनयोर्वाक्ययोर्दर्शनोदयशब्दौभुजवृत्तोपरिस्थितत्वलक्षकौ अन्यथामे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घाद्यावरणेनपरदिवसेपिदर्शनाभावेउपवासःप्रसज्येत तथायत्रस्पर्शकालेग्रहणंदृष्वास्नानंवि
हितंतत्रांतरेमेघावरणाद्विचंद्रयोर्दर्शनाभावोदिवसद्वयंत्रयंवास्यात्तत्रापुपवासप्रसंगःस्यात्
नचशिष्टास्तथाचरंतितस्माद्दृशिदर्शनार्थएव तस्माच्छास्त्रीयग्रहणज्ञानेसतिमेघानावृत्तेपिग्रह
णेग्रहणमदृष्वैवचक्षुष्मता अंधेनगंतुमशक्तेनचदृष्ट्वादादिनासच्छास्त्रीयविधेयमितितात्पर्यार्थः
अतएवभागवतेकुरुक्षेत्रेस्नानार्थंमिलितानांपांडवीयलोकानांमध्येधृतराष्ट्रोपिपरिगणितइतिशि
ष्टाचारोप्येवमेवास्ति एवंचारिष्टजनकत्वेतस्माज्जन्मसप्तांकेतिपद्यंनिर्मूलत्वादुपेक्ष्यम् किंच म
त्स्यक्षोलब्धवसिष्ठमत्स्यपुराणादिवाक्येदर्शपदाभावाच्च अतएवमूलेपरेइतिपदंप्रयुक्तम् शांति
स्तुदर्शनाभावेपिविधेया यतोरिष्टयोगानांस्वरूपसतामेवारिष्टजनकत्वात् अथग्रहणशांतिः येषांतु
विषमस्थानेराहुश्चंद्रसूपक्रमेतू कर्गक्षयपरिक्लेशान्प्राप्नुवंतिचनेजनाः पितृपक्षविनाशायसूर्यस्थाने
भवेद्ग्रहः मातृपक्षविनाशायचंद्रस्थानेभवेद्ग्रहः होरायांगृह्यतेयस्यनक्षत्रेवानिशाकरः प्राणसंदेह-
माप्नोतिसवामरणमृच्छति यस्यत्रिजन्मनक्षत्रेग्रहणेशशिभास्करे तज्जातानांभवेत्पीडायेनराःशांति
वर्जिताः संक्रमइनस्ययेषांजन्मनृतीयेथवाग्रहणंबहुरोगमृत्युजननोदानाहुतयोजपाश्चकर्तव्याः त-
स्माद्दानंचहोमंचदेवार्चनजपौनथा उपरागाभिषेकंचकुर्याच्छांतिर्भविष्यति नक्षत्रदानंयथा रूपंवि
धायफलगस्यतुकांचनेनपिष्टेनवाहिमकरेदिवसाधिपेच यस्तेत्रिजन्मदिवसेनमसाप्रदद्याद्विप्रायवेद् ६३
विदुषेसुपरीक्षिताय यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः तत्रस्नानंप्रवक्ष्यामिमंत्रौषधिसमन्वितम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चंद्रोपरागंसंप्राप्यकुर्याद्ब्राह्मणवाचनम् संपूज्यचतुरोविप्रान्शक्रकुंभात्यानुलेपनैः पूर्वमेवोपराग-
स्यसमानीयौषधादिकम् स्थापयेच्चतुरःकुंभानग्रतःसागरानिक गजाश्वरथावल्मीकसंगमात्हृद
गोकुलात् राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् पंचगव्यंचकुंभेषुशङ्खमुक्ताफलानिच रोचनंपद्म
केशरंवपंचरत्नसमन्वितम् स्फटिकंचंदनंश्वेतंतीर्थवारिचपल्लवान् गजदंतंकुंकुमंचसर्षपोशीररु
रुगुलून् तत्सर्वंनिक्षिपेत्पूर्वकुंभेष्वावाहयेत्सुरान् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतु
ममशांत्यर्थंदुरितक्षयकारकाः तिलहोमंव्याहृतिभिः सहस्रंचाष्टसंयुतम् एवंकृत्वाप्रयत्नेनस्वा
नकर्मसमारभेत् आमंत्र्यनवभिर्मंत्रैः कुंभान्संकल्पपूर्वकम् योसौवज्रधरोदेवो आदित्यानांप्रभुर्मतः
सहस्रनयनःशक्रोग्रहपीडांव्यपोहतु सुखंयःसर्वदेवानांसप्तार्चिरमितद्युतिः चंद्रोपरागसंभूताम-
ग्निःपीडांव्यपोहतु यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः यमश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु
निर्ऋतिःक्रोणपोदेवःप्रलयानलसंनिभः खड्गव्यग्रोतिभीमश्चरक्षःपीडांव्यपोहतु नागपाशधरोदे
वःसदामकरवाहनः सजलाधिपतिश्चंद्रग्रहपीडांव्यपोहतु प्राणरूपोहिलोकानांसदाकृष्णमृगप्रि
यः वायुश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु योसौनिधिपतिर्देवःखड्गशूलगदाधरः चंद्रोपरागकलुषं
धनक्षेत्रव्यपोहतु योसाविंदुयुतोदेवोभवानीपतिरीश्वरः चंद्रोपरागजांपीडांसनाशयतुशंकरः त्रै
लोक्येयानिभूतानिचतनौमैत्रान्विशिष्यकान्वितान् वस्त्रेपट्टेथवाभूर्जेपंचरत्नसमन्वितान् यजमा
नस्यशिरसिनिदध्युस्तेहिजोत्तमाः ततोविवाहयेद्देवान्सुपरागानुमानिनी प्राङ्मुखंपूजयित्वातेनस्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चाभीष्टदेवतेचंद्रग्रहेविनिवृत्तेशुभशौचात्ममंगलः कृतस्नानंचतत्सर्वंब्राह्मणायनिवेदयेत् अनेन विधिनायस्तुग्रहस्नानंसमाचरेत् नतस्यग्रहपीडास्यान्नचबंधुधनक्षयः सूर्यग्रहेसूर्यनामसदामंत्रेषुकीर्तयेत् यइदंशृणुयान्नित्यंश्रावयेद्वापिवानरः सर्वपापविनिर्मुक्तःसर्वत्रसुखवान्भवेदिति इति मत्स्यपुराणोक्तग्रहणशांतिः अथौषधीभिर्ग्रहणशांतिः रोचनंपद्मकेशरंकुंकुमंरक्तचंदनम् शुक्लिस्फटिकतीर्थांबुसितसर्षपगुग्गुलून् मधुकंदेवदारुंचविष्णुक्रांताशतावरीबेलांचसहदेवींचनिशाद्वितयमेवच दूर्वांकुरोशीरशमीशिलाजित्सर्वौषधिपंचमृद्भिःस्नानंविदध्याद्ग्रहणेरवींदोः

पापांतःपापयुक्द्यूनेपापाच्चंद्रःशुभोप्यसन् शुभांशेचाधिमित्रांशेगुरुदृष्टोऽशुभोपिसन् ॥ सितासितादौसद्दृष्टेचंद्रेपक्षौशुभावुभौ व्यत्यासेचाशुभौप्रोक्तौसंकटेऽबलंविदम् ॥ पीडाकरंशांतिवर्द्धनंचयस्येति ॥ अथचंद्रबलेविशेषमाह पापांतइति शुभफलदोपिचंद्रः पापांतः पापद्वयमध्यवर्त्ती पापयुक्पापग्रहयुक्तः पापान् द्यूनेसप्तमेवर्तमानस्तदाशुभोपिअसन् अशुभएवयदाल्पशुभोपिचंद्रः शुभांशेशुभग्रहनवांशे अथवाधिमित्रनवांशेतथागुरुणादृष्टःसन्शुभफलदाताभवेत् ॥ अन्यदप्यल्पशुभाह सितेति शुक्लपक्षादौप्रतिपदिसमीचीनचंद्रेसतिसंपूर्णः शुक्लःशुभः असितादौकृष्णपक्षप्रतिपदिदुष्टचंद्रेसतिसंपूर्णकृष्णःशुभः व्यत्यासेचपूर्वोक्तादर्थाद्वैपरीत्येद्वावपिपक्षावनिष्टौ यदाशुक्लप्रतिपदिचंद्रेदुष्टश्चेत्त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दासकलपक्षोऽनिष्ट कृष्णाप्रतिपदिचंद्र शुक्लश्चेत्तदासंपूर्ण कृष्णपक्षोऽनिष्ट इदमेतावत्अशुभबलं चंद्रबलं संकटेविवाहयात्रादौअवश्यकर्त्तव्येतात्कालिकचंद्रबलाभावेचग्राह्यम् अन्यथेत्यर्थः ॥ अथ यहदोषपरिहारपूर्वकंतुष्टिसंपादनार्थंनवरत्नसमुद्रायधारणंशास्त्रिन्याह वज्रमिति अत्रऋवर्णमुद्दि कायांनवधाभक्तायांभागादिक्रमेणनवरत्नानिनिधेयानि तत्रभागेतिपंचम्यंतमव्ययंपंचमीचेयंस्यप्लो पेनभागादिदिक्कइत्ययमर्थोजातः तत्रशुक्रभीतयेपूर्वस्यांदिशिवज्रंश्वेतहीरकंनिधेयम् एवंचंद्रभीत येसुमुक्ताशोभनमुक्ताफलमाग्नेय्याम् भौमभीत्यर्थंदक्षिणस्यांप्रवालं अगोराहोर्नैर्ऋत्यांगोमेदम् आ

वज्रंशुक्रेऽब्जेसुमुक्ताप्रवालंभौमेऽगौगोमेदमार्कौसुनीलम् केतौवैडूर्यंगुरौ पुष्यकंज्ञेपाचिःप्राङ्माणिक्यमर्कंतुमध्ये ॥ माणिक्यमुक्ताफलविद्रुमाणिगा रुत्मकंपुष्यकवज्रनीलम् गोमेदवैडूर्यकमर्कतःस्यूरत्नान्यथोज्ञस्यमुदेऽक्षवर्ण म् १० कौशनोपश्चिमायांशोभनंनीलम् केतौवायव्यांवैडूर्यम् गुरौउत्तरस्यांपुष्यकंपुष्यराजंबु धेर्ईशान्यांपाचिः मध्येमध्यमकोष्ठेअर्कप्रीत्यैमाणिक्यंनिधेयम् ॥ अथसतिसामर्थ्येनवरत्नसमुदा यधारणमुक्तंइदानीमसतिसामर्थ्येयइहकृतदोषांतइहरत्नधारणमिंद्रवज्रवाह माणिक्येति सूर्य प्रीत्यर्थंमाणिक्यंधार्यम् एवंचंद्रस्यमुक्ताफलम् भौमस्यविद्रुमंप्रवालम् बुधस्यगारुत्मकंगरुडः पाचि गुरोःपुष्यकंपुष्यराजः शुक्रस्यवज्रंहीरकः शनेर्नीलंलहसुणियाराहोर्गोमेदम् केतोर्वैडूर्यमित्येवम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्कतोऽर्कादीनांग्रहाणांरत्नानिधार्याणिस्युः तत्रयद्ग्रहस्यतुष्टेतद्रत्नमेवधार्यमित्य र्थः अथोक्तस्यसुदेसूवर्णमित्यग्रिमश्लोकेनसंबंधः १० अथमहामूल्यरत्नधारणस्यासामर्थ्येअल्प मूल्यानिरत्नान्यभिधातुमाद्यश्लोकमवतारयति धार्यमिति अथोक्तस्यबुधस्यसुदेसंतोषार्थंसुवर्णंयथाशक्तिधा र्यम् राहुकेत्वोस्तुष्टयेलाजावर्तकंमणिविशेषोधार्यः शुक्रेंद्वोस्तुष्टयेरूप्यम् गुरोस्तुष्टयेमुक्ताफलंशने स्तुष्टयेलोहम् आरभान्वोस्तुष्टयेप्रवालंधार्यम् तारेति यद्दिनेतारावलंचिकीर्षितंतद्दिनेयातारासाजन्म नक्षत्रात्त्रिरावृत्तितः पुनःपुनरावृत्तित्रयेणगणनीयास्यात् त्रिरितिसूजंतमव्ययंजन्मनक्षत्रात् दिन

धार्यंलाजावर्तकंराहुकेत्वोरौप्यंशुक्रेंद्वोश्चमुक्तागुरोस्तुलोहंमंदस्यारभा न्वोःप्रवालंतारजन्मर्क्षात्त्रिरावृत्तितःस्यात् ११ जन्मारिव्यंसंपदृिपदः क्षेमप्रत्यरिसाधकाः वधमैत्रातिमैत्राःस्युस्तारानामसदृक्फलाः १२ मृत्यौ स्वर्णंतिलान्विपद्यपिगुडंशाकंत्रिजन्मस्वथोदद्यात्प्रत्यरितारकासुलवणं सर्वोविपत्प्रत्यरिः नक्षत्रगणितेनवभिर्भक्तेतिस्त्रआवृत्तयोभवंतिअवशिष्टतारायाःश

भमशुभंचव्याख्यातमितिफलितोऽर्थः ११ अथशेषक्रमेणसकलास्तारासंज्ञाअनुष्टुभाह जन्मारिव्येति स्पष्टोऽर्थः १२ अथावश्यकृत्येदुष्टतारांणांप्रकारद्वयेनपरिहारंशार्दूलविक्रीडितेनाह मृत्यौस्वर्णंतिला न्विति मृत्यौवधतारायांस्वर्णंतिलान्यथाशक्तिब्राह्मणायदद्यात् विपदिविपत्तारायांगुडमिक्षविका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रंदद्यात् त्रिजन्मर्क्षनिसूद्युजन्मतारार्क्षशाकंदंतांकादिदद्यात् अथोपत्यरितारकार्क्षपंचमतारायांल
वणंदद्यात् नारदः जन्मत्रिपंचसप्तारव्यातारानिष्टफलाःस्मृताः शाकंगुडंचलवणंसतिलान्कांचनं
क्रमात् अनिष्टपरिहारायदद्याद्दानंद्विजातयेइति अथद्वितीयःपरिहारः तत्रादिमपर्ययेप्रथमार्द्ध
नौविपत्प्रत्यरिमृत्यूश्चतृतीयपंचमीसप्तम्यस्ताराःसर्वाअपिसामान्यतः षष्टिघटिकात्मिकानशुभ
दाःस्युः अथद्वितीयेपर्ययेद्वितीयार्द्धनौविपत्प्रत्यरिमृत्यूनांआदिप्रांत्यतृतीयकांशानशुभदाःविप
त्तारायामाद्यांशःप्रथमचरणोनिषिद्धः प्रत्यरितारायांप्रांत्यांशश्चतुर्थचरणस्त्याज्यः मृत्युतारायांत्

मृत्यूश्चादिमपर्ययेनशुभदोर्थेषांद्वितीयेंशकानादिप्रांत्यतृतीयकाअथशु
भाःसर्वेतृतीयेस्मृताः १३ षष्टि६० घ्नगतभंभुक्तघटीयुतंयुगा४हतम् शरा
ब्धि४५हृल्लब्धतोर्कशेषेऽवस्थाःक्रमाद्विधोः १४

तीयोंशः तृतीयचरणस्त्याज्यइति
अथतृतीयावृत्तौविपत्प्रत्यरिमृत्यूश्चैनेसर्वेषष्टिघटिकात्मिकाअपिशुभाःउक्तंचदीपिकायाम् पर्या-
येप्रथमेवर्ज्यौविपत्प्रत्यरिनैधनाइति १३ अथचंद्रावस्थागणनोपायमाह षष्टिघ्नमिति अश्विनीमा
रभ्यगतभानिषष्ट्याद्युण्यानिवर्तमाननक्षत्रभुक्तघटीयुतानितानिपुनर्युगैश्चतुर्भिराहतानि शराब्धि
हृत् ४५ पंचचत्वारिंशताभाज्यानियल्लब्धमागतंगतावस्थास्ताःशेषंवर्तमानावस्थायाः तत्रलब्धां
कस्यापिद्वादशाधिक्येद्वादशभिर्भागशेषंप्रवासाद्यवस्थाचंद्रस्यगताःस्युः ताअवस्थामेषराशेःपुंसः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रवासादिसंज्ञाः वृषशार्दूलादिसंज्ञाः एवंमिथुनादिदशराशिषु मृतादिसंज्ञावस्थादिनोद्दादशावस्थाः क्रमेणभवंतीत्यर्थः १४ अथद्दादशावस्थानामानिसफलान्याह प्रवासनाशाविनिस्पष्टार्थम् १५ अथग्रहाणांवैकृतपरिहारार्थंसौषधस्नानंदक्षिणाश्चशार्दूलविक्रीडितेनाह लाजाकुष्ठेति लाजाभ्रष्टशालयः इतिकेचित् वस्कृतस्क औषधीसाहचर्यात्तुलाजाशब्देन लज्जावतीगृह्यते कुष्ठं प्रसिद्धं बलाबरियाराप्रियंगुः फल्गिनी घनोमुस्ता सिद्धार्थाःसर्षपाः निशाहरिद्रा दारुः देवदारुः पुंखा शरपुंखा लोध्रंप्रसिद्धम् एतैरोषधैर्युतैर्जलैः स्नानंग्रहोत्थाघहृत् दुष्टग्रहसूचितारिष्टनाशकं-

प्रवासनाशौमरणंजयश्चहास्यारतिक्रीडितसक्तभक्ताः ज्वरारव्यकंपस्थिरता अवस्थामेषात्क्रमान्नामसदृक्फलांस्युः १५ लाजाकुष्ठबलाप्रियंगुघनमुस्ता सिद्धार्थैर्निशादारुभिः पुंखालोध्रयुतैर्जलैर्निर्गदितंस्नानंग्रहोत्थाघहृत् धेनुःक्वरुणोवृषश्चकनकंपीतांबरंघोटकः श्वेतोगौरसितामहासिरजइत्येतारवे दक्षिणाः १६ स्यान् सप्रियंगुरजनीद्वयमांसीकुष्ठलाजतिलसर्षपखंडैः वारिभिःसहवचैःसहलोध्रैः स्नानमत्तिनिखिलग्रहपीडामित्यकेः अथरवेःरविमारभ्यदक्षिणाउच्यंते सूर्यायधेनुम् चंद्रायकंबुः शंखः शंखस्त्यालंबुरस्त्रियामित्यमरः भौमायारुणोवृषः बुधायसुवर्णम् गुरवेपीतांबरम् तच्चयथाविभवंकार्पासंकोशजंवा शुक्रायश्वेतोघोटकः शनयेश्यामवर्णोगौः राहवेमहासिर्म

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हामूल्यरवङ्गम् केतवेच्छागोमेषः एताः दक्षिणाः १६ अथग्रहाः गंतव्यराशेः प्राक्कियद्भिर्दिनैः फलंददा
त्येतदुपजात्याह सूर्यारेति जिगमिषितराशेः पुरस्तात्पूर्वतनसंख्यघटीदिवसमासान् शुभाशुभफल-
दाः स्युः यथासूर्योगंतव्यराशेः प्राक्पंचदिनानिफलप्रदः भौमोष्टदिवसान् बुधः सप्तदिवसान् शुक्रोपिस
प्तदिवसान् चंद्रोग्निनाडीत्रयम् राहुर्गंतव्यराशेः पूर्वत्रिमासान् शनिः षण्मासान् गुरुर्मासद्वयम् पूर्वफ
लददित्यर्थः १७ अथावश्यकृत्येतिश्यादौशालिन्यादानमाह दुष्टेयोगइति राजादुष्टैव्यतीपातादियो

सूर्यारसौम्यास्फुजितोक्षनागसप्ताद्विधस्रान्विधुरग्निनाडीः तमोयमेज्या
स्थिरसाश्विमासान्गंतव्यराशेःफलदाःपुरस्तान् १७ दुष्टेयोगेहेमचंद्रेच
शंखंधान्यंनिथ्यर्क्षेतिथौतंडुलांश्च वारेरत्नंभेचगांहेमनाड्यांदद्यात्सिधूत्थं
चतारासुराजा १८ राश्यादिगौरविकुजौफलदौसितेज्यौमध्येसदाशशिसु
तश्चरमेऽमंदो अध्वान्नवन्हिभयसन्मनिवस्त्रसौख्यदुःखानिमासिजनि
भेरविवासरादौ १९ इतिगोचरप्रकरणंचतुर्थंसमाप्तम् ४ ७ ७

गेतथानाड्यांघटिकायांदुर्मुहूर्तादिदुष्टायांसत्वर्णंयथाशक्तिदद्यात् एवंसर्वत्र शेषंस्पष्टम् १८ अथ
वसंततिलकयान्यदाह राश्यादीति पूर्वार्धंस्पष्टम् अध्वान्नेति यस्मिन्मासेस्वजन्मनक्षत्रप्रवेशेसूर्यादि
वाराश्चेत्स्युस्तस्मिन्मासेअध्वादीनिफलानिवाच्यानि यत्रमासिरविवारेजन्मनक्षत्रेसेतिअध्वामार्गोभवति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवंचंद्रवारेअन्नंभक्ष्यप्राप्तिरित्यादि १९ इतिश्रीदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंतामणि टीकायांगोचरप्रकरणंचतुर्थंसमाप्तम् ४ ७ ७ ७ अथसंस्कारप्रकरणंव्याख्यायते तत्रसंस्क्रियतेअनेनश्रौतेनस्मार्तेनवाकर्मणापुरुषइतिसंस्कारः स्वीयस्वीयजातौसामान्यविशेषविहितवैदिकस्मार्तकर्मानुष्ठानद्वारादृष्टविशेषाधायकइतियावत् लक्षणयातदर्थोक्तादिनशुद्ध्यादिसंस्कारशब्देनोच्यते तस्यप्रकरणमुपक्रमः तेचसंस्कारागर्भाधानादयोऽष्टचत्वारिंशत् तत्रगर्भाधानंप्रथमसंस्कारः सचरजस्त्वलाख्यधीनः ततोरजोदर्शनाच्छुभाशुभफलमुक्तंवसिष्ठेन प्रथमरजोदर्शनंतःशुभाशुभंभवतिसर्वलोकानामिति तत्रशुभसूचकरजोदर्शनमनुष्टुभाह आद्यमिति राधोवै

अथसंस्कारप्रकरणंप्रारभ्यते आद्यंरजःशुभंमाघमार्गराधेषफाल्गुने ज्येष्ठ श्रावणयोःशुक्लेसद्वारेसत्तनौदिवा १

शास्वः इषआश्विनः अन्येषामिद्वाः एषुमासेषुआद्यंरजः प्रथमोद्भवंरजोदर्शनंस्त्रीधर्मःशुभंभविष्यच्छुभसूचकम् तथाशुक्लेशुक्लपक्षे कृष्णपक्षेतुदशमीपर्यंतंमध्यमंज्ञेयम् कृष्णपक्षस्यदशमीमध्यमंफलमादिशेदिति यावदितिशेषः सद्वारेसतांचंद्रबुधगुरुशुक्राणांवारेसत्तनौसमीचीनलग्नेशुभस्वामिकलग्नेदिवादिवसे आद्यंरजोदर्शनंशुभमित्यर्थः अत्राशुभफलापवादमाहवसिष्ठः अशुभमपिसमस्तंचार्तवेसंप्रभूतंसुरगुरुसितयुक्तेवीक्षितेवाथलग्ने तिमिरमिवकठोरज्योतिरुत्पत्तिकालेक्षयमथसमुपैतिप्राप्नुयादीप्सितानि कठोरज्योतिःसूर्यः १

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथात्रशुभमध्याशुभनक्षत्राण्यनुष्टुभाह श्रुतित्रयेति श्रवणत्रयमृदुक्षिप्रध्रुवस्वातीनक्षत्रेषु सितांबरेश्वेतवस्त्रेचाद्यंरजः शुभमिति पूर्वेणसंबंधः मूलेदितिर्भंपुनर्वसुः पितरोमघा मिश्रेरुचिकाविशाखे एतेषुनक्षत्रेषुमध्यमम् परेषुभरणीज्येष्टार्द्राश्लेषापूर्वात्रयेषु असत् अनिष्टम् अत्रविशाखामूलयोर्मध्यमत्वाभिधानंवशिष्टवाक्येदुष्टफलश्रवणात् हिदैवभेषुध्रुवतीक्ष्णभत्रा रूखैवमोघामयवैरिसंघा मूलेशुभकामाधिकहीनसत्वाव्यसूर्भुक्षोद्भुतदोषचित्तेति २ अथनिंद्यरजोदर्शनंशालिन्याह भद्रेति भद्रायमिन्द्रा निद्रानिद्रावस्थायां संध्यायांतर्मध्यान्हसायंसंध्या उपरागेग्रहणे पातेव्यतीपातेमहापातेच शेषंस्पष्टम् आद्यंरजोदर्शनंनोसत् अनिष्टफलमित्यर्थः ३ अथरजस्वलास्नानमुद्गूर्तवसंततिलकेनाह

श्रुतित्रयमृदुक्षिप्रध्रुवस्वातौसितांबरे मध्यंचमूलादितिभेपितृमिश्रेपरेषु सत् २ भद्रानिद्रासंक्रमेदर्शरिक्तासंध्याषष्टीद्वादशीवैधृतेषु रोगेष्टम्यां चंद्रसूर्योपरागेपातेचाद्यंनोरजोदर्शनंसत् ३ हस्तानिलाश्विमृगमैत्रवसुध्रुवारव्यैः शक्रान्वितैः शुभतिथौशुभवासरेच

हस्तानिलेति एषुएकादशनक्षत्रेषु शुभतिथौरिक्तामारहिततिथौ शुभवारेचंद्रबुधगुरुशुक्रवारे आर्तववतीऋतुमतीस्त्री स्नायात् अथविशेषमाह मृगेति मृगरेवतीस्वातीहस्ताश्विनीरोहिणीनक्षत्रैः स्नाताऋतुमतीअरंशीघ्रंगर्भंलभते लघुक्षिप्रमरंद्रुतमित्यमरोक्तेः दाक्षिणात्यास्तुचतुर्थदिवसएवस्नानंकुर्वे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति अन्येविहितदिनेकुर्वंतितत्रदेशाचारतोव्यवस्थाइति ४ अथगर्भाधानंशार्दूलविक्रीडितेनाऽऽह नीभ्यामाह गंडांतमिति अत्रस्वपत्नीगमेगर्भाधानेएतान्दोषांस्त्यजेदितिसंबंधः एतान्कान्कान्त्रिविधंतिथिनक्षत्रलग्नानांगंडांतं त्रीपातिः नक्षत्रतिथिलग्नानांगंडांतंत्रिविधंस्मृतम् नवपंचचतुर्थानांद्वेकार्धघटिकामितमिति निधनजन्मर्क्षेनिधननारांवधतारांजन्मतारांच मूलम् अंतकंभरणी दास्रमश्विनी पौष्णंरेवती व्यतीपातं उपरागंग्रहणम् पातंव्यतीपातंमहापातंच वैधृतिम् पित्रोः मातापित्रोः श्राद्धदिनम् दिवादिवसे परिघयोगस्याद्यार्धम् उत्पातहतानिदिव्यभौमांतरिक्षैस्त्रिविधोत्पातैर्हतानिदू

स्त्रायादश्वार्तववतीमृगपौष्णवायुहस्ताश्विधातृभिररंलभतेचगर्भम् ॥
गंडांतंत्रिविधंत्यजेन्निधनजन्मर्क्षेचमूलांतकंदास्रंपौष्णमघोपरागादिव
सान्पातंतथावैधृतिम् पित्रोः श्राद्धदिनंदिवाचपरिघाद्यर्धंस्वपत्नीगमे
भान्युत्पातहतानिमृत्युभवनंजन्मर्क्षतःपापभम् ॥ भद्राषष्ठीपर्वरिक्ताश्च
संध्याभौमार्कार्कीनाद्यरात्रीश्चतस्रः

षितानिभानि जन्मर्क्षतः जन्मराशेर्जन्मलग्नाद्वा मृत्युभवनमष्टमलग्नम् पापयुतंभम् ॥ भद्राषष्ठीति पर्वाणिविष्णुपुराणे चतुर्दश्यष्टमीचैव अमावास्याच पूर्णिमा पर्वाण्येतानिराजेंद्र रविसंक्रांतिरेवचेति स्कांदेतु कृष्णाष्टमीचतुर्दश्यौ पूर्णिमादर्शसंक्रमइति संध्याद्वयम् भौमसूर्यशनिवारान् आद्यरात्रीः रजोदर्शनमारभ्य दिनचतुष्टयंत्यजेत् कालवि ६८

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धाने षष्ठ्यष्टमीपंचदशीचतुर्थीचतुर्दशीमप्युभयत्रहित्वा शेषाःशुभास्युस्तिथयोनिषेकेवाराःशशां
कार्यमितेकुजानामिति गर्भाधानमिति युत्तराः इंदुमृगः अर्कोहस्तः मैत्रमनुराधारोहिणीस्वातीश्रवण
धनिष्ठाशततारकासुगर्भाधानंसत्शुभम् गुरुः हरिहस्तानुराधाश्वस्वातीवरुणवासवम् उत्तरात्रित-
यंसौम्यंरोहिण्यश्वशुभाःस्मृताः आधानेमूलसार्पांत्यमशुभंसममन्यभमिति अथगर्भाधानेलग्न
मिंद्रवज्रयाह केंद्रेति शुभैःकेंद्रत्रिकोणेषुसद्भिःपापग्रहैरन्यायारिगैःसद्भिःपुंग्रहैः रविभौमगुरुभि
र्दृष्टेलग्नेसति तथाजेचंद्रे ओजांशगेविषमराशिनांनवांशगेसति अपिशब्दात्लग्नेपिविषमांशगेयुग्म

गर्भाधानंत्युत्तरेंदूर्कमैत्रब्राह्मस्वातीविष्णुवस्वंबुपेसत् ६ केंद्रत्रिकोणेषु
शुभैश्चपापैरन्यायारिगैःपुंग्रहदृष्टलग्ने ओजांशगेजेपिचयुग्मरात्रौचि-
त्रादितीज्याश्विषुमध्यमंसत् ७

रात्रौसमरात्रौगर्भाधानंकार्यम् मध्यमभान्याह चित्रादितीज्याश्विषुतद्गर्भाधानंमध्यमंस्यात् गुरुःचि
त्रादित्येतथातिष्येतुरगेचेतिमध्यमा शीर्षाण्यृक्षाणिदुष्टानिस्युर्निषेकारव्येकर्मणीति एवंगर्भाधानंवि
धायपुंसाकिंकार्यमित्याह विष्णुः निद्रासमयमासाद्यतांबूलंचंदनंत्यजेत् पर्यंकात्समदांभाद्यात्सुंदरुष्
ष्णाणिमस्तकात् इतिगर्भाधानम् अथसीमंतोन्नयनंशार्दूलविक्रीडितेनाह जीवार्केति गुरुरविभौम
वारेनिर्ऋतिर्मूलं अभंहस्तः एतैर्नक्षत्रैःरिक्ता ४ ९ १४ अमा ३० अर्को १२ रसाः ६ अष्टअष्टमी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आभिर्वर्जिततिथिभिरुपलक्षितेदिने मासाधिपेपीवरेपुष्येसतीत्यर्थः एतादृशसमये अष्टमषष्ठमासि अष्टममासेषष्ठमासेवासीमंतःसीमंतकर्माख्योगर्भसंस्कारः कार्यः तत्रशुभग्रहैः केंद्रत्रिकोणेसद्भिःस लैःपापैः लाभारिस्थितैःसद्भिःपुंभांशकेलग्ने पुरुषराशौविषमराशौलग्ने नवांशेचविषमराशौसति तदासीमंतः शुभः अत्रविशेषमाहकश्यपः चंद्रोपिशुभदोज्ञेयस्त्यक्त्वाषष्ठाष्टमव्ययान् सीमंतलग्नादे कोपिक्रूरः पंचाष्टरिःफगः हंतिसीमंतिनींसोपितद्गर्भंवानसंशयः ननैधनेतयोर्लग्नेनैधनेशदृष्टिसंयुते तयोःस्त्रीपुंसयोः अस्यापवादः लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः यद्यप्यष्टमभस्योक्तंदोषमा

जीवार्कारदिनेमृगेज्यनिर्ऋतिश्रोत्रादितिब्रह्मभैरिक्तामार्करसाष्टवर्ज्य तिथिभिर्गासाधिपेपीवरे

शक्र्यपोहति गर्गः सीमंतोन्नयनं कार्यशुभांशेशुभलग्नगे कुलीरयुगकन्याश्चवर्ज्याः शेषाश्चशोभनाइति अत्रयद्बलेसतिकुलीरमिथुनकन्या अपिग्राह्याइति ज्ञेयम् अतएवमूलेलग्नविचारोनकृतः कारिकायाम् मूलनक्षत्राणिचैतानितिष्योहस्तःपुनर्वसुः अ भिजिच्छ्रोष्ठपाच्चैवअनूराधाश्चियुक्ततथा ऋक्षस्यमध्यमेपादद्वयेसीमंतइष्यतेइत्युक्तम् अथमतांतर म् वाभ्रयांत्यसदहे ध्रुवाणिरोहिण्युत्तराअत्यंरेवती एषुतथासतांशुभग्रहाणांचंद्रज्ञगुरुशुक्राणांवा रेवाकार्यम् गुरुः रोहिण्यैंदवमादित्यंपुष्यहस्तोत्तरात्रयम् पौष्णंवैष्णवभंचैवसीमंतेसौम्यवासराइति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सीमंतादिषुशोभनाइत्यर्थः जन्मभंसीमंतेनिषिद्धमाहवसिष्ठः बालान्नभक्तौव्रतबंधनेचराजाभिषेके खलुजन्मधिष्ण्यम् शुभंलनिष्टसतनंविवाहसीमंतयात्रादिषुमंगलेषु गुरुः मासप्रयुक्तकार्येषुमूढ खंगुरुशुक्रयोः नदोषकृत् मलोमासोगुर्वादित्यादिकंतथा यद्यपिपुंसवनस्यप्रथमकर्त्तव्यत्वात्तत्पूर्व-निरूपणमावश्यकम् तथापिक्वचित्सीमंतेनसहैवविधानात् बहुषुनर्यैवाचारदर्शनात्सीमंतमुहूर्त्तेए वप्रथमसुक्तः नृसिंहः सीमंतोन्नयनस्योक्तितिथिवारभराशिषु पुंसंचकारयेद्विद्वान्सहवैकदिनेथवाइ ति ८ अथमासेश्वराः स्त्रीणांचंद्रबलंचवसंतनिलकेनाह मासेश्वराइति अष्टममासेआधानलग्ना

सीमंतोष्टमषष्ठमासिशुभदैःकेंद्रत्रिकोणेखलैर्लाभारिस्थितिषुवाधुवांत्यसद् हेलग्नेचपुंभाशके ८ मासेश्वराःसितकुजेज्यरवींदुसौरचंद्रात्मजास्तनुपञ्च द्रद्विवाकराःस्युः स्त्रीणांविधोर्बलमुशंतिविवाहगर्भसंस्कारयोरितरकर्मसु भर्त्तुरेव ९ धिपःस्त्रीणामिति विवाहेगर्भसंस्कारेगर्भाधानपुंसवनसीमंतादिरूपेस्त्रीणामपि चंद्रबलंग्राह्यम् इतरकर्मसुवस्त्रालंकारादिधारणादिषुभर्त्तुरेवचंद्रबलंग्राह्यम् यदाभर्त्तामृतस्तदापुन स्त्रीणामेव राजमार्तंडः विवाहकार्येषुक्षमप्रतिष्ठागर्भप्रतिष्ठावनितावशुद्धौ अन्यानिकार्याणिधव-स्यशुद्धौपत्योविहीनेप्रमदात्मशुद्ध्या ९ अथयेषांपृथगेवपुंसवनमित्याचारः तदर्थंपुंसवनमुहूर्त्तंवि ष्णुपूजासुहूर्त्तंचेंद्रवज्रयाह पूर्वोदितैरिति पूर्वोदितैःसीमंतकर्मण्युदितैस्त्रित्र्यादिभिरुपलक्षितनृतीये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मासिपुंसवनाख्यंकर्मविधेयम् सुमांस्सूयते ऽनेनेतिपुंसवनंकर्मणः पुंस्त्वहेतुना अथेति सीमंतानंतरम ष्टमेमासिविष्णुविधातृजीवैः श्रवणरोहिणीपुष्यैः उपलक्षितेदिवसेतथालग्नेशुभस्थानिकेशुभयु तदृष्टेवा मृत्कगृहेअष्टमस्थानेशुद्धेसर्वग्रहरहितेचसतिविष्णुपूजाकार्या १० अथजातकर्मनामकरणयो र्मुहूर्तउपजात्याह तज्जातकर्मादीनि जातकर्मयद्यपिजन्मनोनंतरमेवविहितंतथापिसंक्रांतिव्यतीपातादिदुष्ट दिवसतयापित्राद्यसन्निधानेचतन्मकृतंतदामुहूर्तविचारणेनकार्यगर्गः व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि श्राद्धंविनाशुभंकर्मशास्त्रेकालेपिनाचरेदिति अतएवकालविकल्पोक्तोनारदेन तस्मिन्जन्ममुहूर्तेनु-

पूर्वोदितैः पुंसवनंविधेयंमासेतृतीयेत्वथविष्णुपूजा मासेष्टमेविष्णुविधातृ
जीवैर्लग्नेशुभेमृत्कगृहेचशुद्धे १० तज्जातकर्मादिशिशोर्विधेयंपर्वाण्यरि-
क्तोनतिथौशुभेह्नि

सूतकांतेसदाशिशोः जातकर्मचकर्तव्यंपितृपूजनपूर्वकमिति अतएव-
जातकर्मादीति जातकर्मादीनितस्यजातस्यशिशोर्जातकर्मआदिशब्दान्नामकर्मोच्यते पर्वाणिचतुर्दश्यष्ट
म्यमावस्यादिपूर्वोक्तानि रिक्ताभिश्चऊनतिथौविवर्जितनतिथौ शुभेह्निशुभवारेतथाएकादशेद्वादशी-
वापिधरुवेदिवसेतथामृदुध्रुवक्षिप्रचरनक्षत्रेषुशस्तंस्यादतिक्रांतंजातकर्मादिविधेयंकर्त्तव्यम् तच्च श्रव
णानंतरंसचैलंस्नानंकृत्वाकार्यम् वसिष्ठः श्रुत्वाजातंपितापुत्रंसचैलंस्नानमाचरेत् अन्तराभिमुखोभूत्वा
नद्यांवादेवखातकेतच्चशीतोदकेनकुर्यान्नैमित्तिकंस्नानंशीताभिःकाम्यमेवचेति रात्रावपिकार्यं वसि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्टः पुत्रजन्मनियज्ञेचनथासंक्रमणेरवेः राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशीति सूतकेतुसमुत्पन्नेषु
त्रजन्मयदाभवेत् कर्तुस्तालकालिकाशाद्धिः पूर्वाशौचेनशाद्धानि रात्रौजलाशयेगमनाशक्तौसांख्यायनः दि
वायदाहृतंतोयंहृत्वास्वर्णयुतंततत् रात्रिस्नानेतुसंप्राप्तेस्नायादनलसंनिधाविति जातकर्मप्रयोजन
माहगुरुः जातकर्मक्रियांकुर्यात्पुत्रायुःश्रीविवृद्धये ग्रहदोषविनाशायसूतकाशुभविछिदे कुमारग्रह-
नाशायपुंसांसत्वविवृद्धयेइति वसिष्ठः एकादशेन्हिविप्राणांक्षत्रियाणांत्रयोदशे वैश्यानांषोडशेनाम
मासांतेशूद्रजन्मनइतिवसिष्ठेनमासनामान्युक्तानि चैत्रादिमासनामानिवैकुंठोथजनार्दनः उपेंद्रोयज्ञ

एकादशेद्वादशकेपिधत्तेमृदुध्रुवक्षिप्रचरोडुषुस्यात् ११ पौष्णाध्रुवेंदुक
रवातहयेषुसूतीस्नानंसमित्रभरवीज्यकुजेषुशस्तम् नार्द्रात्रयश्रुतिमघां
नकमिश्रमूलत्वाष्ट्रेज्ञसौरिवसुषड्विरिक्तातिथ्याम् १२

पुरुषोवासुदेवस्त्रिविक्रमः योगीशःपुंडरीकाक्षःकृष्णोऽनंतोऽच्युतस्तथा चक्रधारीतिचैतानिक्रमादाहु
र्मनीषिणइति ११ अथसूतिकास्नानमुहूर्तंवसंततिलकेनाह पौष्णेति हयोश्विनी एषुरेवत्यादिनक्षत्रे
षुसमित्रभरवीज्यकुजेषु अनूराधानक्षत्रसूर्यगुरुभौमवारसहितेषुसूत्याःप्रसूतायाःस्त्रियाःस्नानंशस्तम्
आर्द्रात्रयेश्रवणमघाभरणीमिश्रेकृत्तिकाविशाखेमूलचित्रास्वनशस्तम् बुधवारेशनिवारे वसुरुद्रभीषट्ष-
ष्ठीरविर्द्वादशीरिक्तातिथिषुचनशस्तम् अन्यपानमुहूर्तंदैवज्ञवल्लभे रिक्तांभौमंपरित्यज्यविष्टिंपातंसवै-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धृतिम् मृदुभक्षविक्षिप्तमेषुस्तनपानंदितंशिशोरिति १२ अथप्रसंगात्प्रथमादिमासोत्पन्नदंतफलं शार्दूलविक्रीडितेनाहमासेचेदिति बालश्चेज्जन्मानंतरंप्रथमेमासेचेत्सदशनोदंतयुक्तोभवेत् तदास्वयं बालोनश्येत् ततोद्व्यादिकेद्वितीयादिमासेअनुजातभगिनीमात्रयजान्क्रमाद्हंति द्वितीयेमासियदिदंतो त्पत्तिस्तदाऽनुजातंकनिष्ठभ्रातरंहंति एवंतृतीयेभगिनीं चतुर्थेमातरम् पंचमेज्येष्ठभ्रातरंषष्ठादिमासेषु अतुलंभोगंलभते सप्तमेनातापितुःसुखम् अष्टमेपुष्टताम् नवमेलक्ष्मीम् दशमेसौख्यम् अग्रेपिसुखाधिक्यमेव अथोदंति अथोजनोजन्मकालएवसदशनः दंतयुक्तःस्वपित्रादिहास्वमात्मानंपितरंचआदिशब्दा-

मासेचेत्प्रथमेभवेत्सदशनोबालोविनश्येत्स्वयंहन्यात्सक्रमतोनुजातभगिनीमात्रय जान्द्व्यादिके षष्ठादौलभतेहिभोगमतुलंतातात्सुखंपुष्टतांलक्ष्मींसौख्यमथोज नौसदशनोवोर्ध्वंस्वपित्रादिहा १३

भ्रातरमपिनाशयतीतिस्वपित्रादिहा वोर्ध्वमिति वाअथवाऊ र्ध्वंऊर्ध्वपंक्तौजन्मानंतरंविहितेनिषिद्धेपिकालेसदशनश्चेत्स्यात्तदापिस्वपित्रादिहाआत्मापितृनाशकइति उ क्तंचविष्णुधर्मोत्तरे उपरिप्रथमंयस्यजायंतेचशिशोर्द्विजाः तैर्वासहचयस्यस्यात्जन्मभार्गवसत्तम मा तरंपितरंचाथस्वदेहात्मानमेवचेति तत्रैवशांतिरपि गजपृष्ठगतंबालंनौस्थंवास्नापयेद्द्विजः तदभावेतुध र्मज्ञकांचनेनतुनरासने सर्वौषधैःसर्वगंधैर्बीजैःपुष्पैःफलैस्तथा पंचगव्येनरत्नैश्चमृत्तिकाभिश्चभार्गव स्थालीपाकेनधातारंपूजयेत्तदनंतरं सप्ताहंचात्रकर्त्तव्यंतथाब्राह्मणभोजनम् अष्टमेऽहनिविप्राणांत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थादेयाच दक्षिणा कांचनंरजभागाश्चध्रुवंवासनमेवचेति ११ अथदोलाचक्रमनुष्टुभाह दोलेति तत्रबालस्यदोलायांरोहेदोलायांस्थापनेअर्कभात् सूर्यर्क्षात्नक्षत्रात्पंचनक्षत्रैर्नैरुज्यम् तदग्रिमपंचनक्षत्रैर्मरणम् तदग्रिमपंचनक्षत्रैर्देहकार्श्यंक्लेशत्वंस्यात् तदग्रिमैरिषुभिःपंचनक्षत्रैर्व्याधिःरोगः ततःसप्तनक्षत्रैःसौख्यंस्यात् शिशोरेवंफलंसंस्कार्यत्वात् उक्तंच सूर्यभाच्चंद्रभंयावत्पंचपंचचतुर्दिशाम् मध्येतुसप्तदेयानिदोलिकाचक्रमुत्तमम् पूर्वभागेनिरोगत्वंदक्षिणेमरणंध्रुवम् पश्चिमेतुक्लेशोबालउत्तरेव्याधिसंभवः शेषेषुसप्तधिष्ण्येषु बालकःशयनेसुखीति १२ अथदोलारोहणमुहूर्त्तमवसंन-

दोलारोहेऽर्कभात्पंचेषुशरपंचेषुसप्तभैः नैरुज्यंमरणंकार्श्यंव्याधिःसौख्यंक्रमाच्छिशोः १४ दंतार्कभूपधृतिदिङ्मितवासरेस्याद्वारेशभेमृदुलघुध्रुवभैःशिशूनाम् दोलाधिरूढिरथनिष्क्रमणंचतुर्थमासेगमोक्तसमयेर्कमितेऽह्निवासत् १५

तिलकापूर्वार्द्धेनोत्तरार्धेननिष्क्रमणमुहूर्तेचाह दंतार्केति दंताद्यविंशत् अर्काद्वादशभूपाःषोडशधृतयोष्टादश दिशोदश एतस्मिन्दिवसेतथाशुभवारेमृदुलघुध्रुवनक्षत्रैरुपलक्षितेबालानांदोलाधिरूढिः दोलायामधिरूढिरारोहःस्यात् अथचतुर्थमासेगमोक्तसमयेयात्राप्रकरणोक्तसमीचीनकालेशिशूनांनिष्क्रमणाख्यंसंस्कारपूर्वकंगृहाद्बहिर्गमनंस्यात् वाअथवाअर्कमितेऽह्निद्वादशदिवसेकुर्यात् गृहान्निष्क्रमणंसूनोश्चतुर्थमासिकारयेत् यात्रोक्तेसमयेमासितृतीयेद्वादशेऽह्नीवेतिगुरूक्तेनात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथजलपूजामुहूर्तंऋजंगमयातेनाह कवीज्यास्तेति शुक्रगुर्वोरस्तेचैत्रेअधिमासेपौषेमाससमासेसूनि कामासूतास्त्रीजलंनपूजयेत् एतद्व्यतिरिक्तकालेतथाबुधचंद्रगुरुवारेरिक्तावर्जिततिथौहिनिश्चितंश्रव णपुष्यपुनर्वसुमृगहस्तमूलअनूराधाएभिर्नक्षत्रैःसहितेदिनेजलंपूजयेत् अथक्वचिद्दुग्धपानमुहू र्तः एकत्रिंशेवासरेवाद्वितीयेजन्मर्क्षेवाशऋक्षलग्नेनुकूले क्षीरंवेक्षीरंसन्निदध्याच्छिशूनांचक्षेधात्रीपू ज्यपूजांविधाय १६ अथान्नप्राशनंस्त्रग्धरयाह रिक्तानंदेति अथोनिष्क्रमणानंतरमेवंविधेकाले बालकानांअन्नप्राशनंसत्ऋक्षंस्यात् सत्रैतान्हित्वा एतेवर्ज्याःरिक्तानंदाष्टदर्शाः ४ ९ १४ १ ६ ११

कवीज्यास्तचैत्राधिमासेनपौषेजलंपूजयेत्सूनिकामासपूत्तौ बुधेंद्वीज्यवा रेविरिक्तेतिथौहिश्रुतीज्यादितींदूर्कनैर्ऋत्यमैत्रे १६ रिक्तानंदाष्टदर्शंहरि दिवसमथोसौरिसोमार्कवारान्लग्नंजन्मर्क्षलग्नाष्टमगृहलवगंमीनमेषा लिकंच ८ ३० हरिदिवसंद्वादशी उपलक्षणत्वात्तिथिक्षयंहित्वा शनिभौमरविवारांश्चहित्वा जन्मर्क्षलग्नाष्टमगृहलवगंलग्नंचहित्वाजन्मर्क्षेजन्मलग्नेताभ्यामष्टमलवोःष्टमगृहंअष्टमलवोष्टमनवांशस्तौगच्छतिप्राप्नोतिएवंविधंलग्नंत्यजेत्इत्यर्थः जन्मराशिविलग्नाभ्यांनैधनेंशेचवर्जयेदितिकश्यपोक्तेः तथामीनमेषालिकंचअलिर्वृश्चिकः एतानिलग्नानिहित्वा गोश्वकुंभतुलाकन्यासिंहकर्कनृयुग्मकाः शुभदाराशयश्चैतेनमीनमेषवृश्चिकाःइतिकश्यपोक्तेः षष्ठादिति षष्ठमासमार

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यसमभमासेषष्ठाष्टमदशाद्वादशमासेषु बालानामन्नप्राशनंकार्यम् पुंबालविषयमेतत् अथानंत-
रंहिनिश्चयेनमृगदशांकन्यानांपंचमादोजमासेपंचमसप्तमनवमैकादशेषु अन्नप्राशनम् तथाच
सिद्धः युग्मेषुमासेषुचषष्ठमासात्सांवत्सरेवानियतंशिशूनाम् असुग्ममासेषुचकन्यकानांनवान्न
संप्राशनमिष्टमेतादृशि अत्रानेककालाभिधानेपिस्वगृह्योक्तकालोमुख्यस्तत्रशुक्रास्तादिविचारोनास्ति
इतरेषुगौणकालेषुशुक्रास्तविचारआवश्यकएवेति नक्षत्रैरिति मृदुलघुचरसंहितैः स्थिरनक्षत्रैःकुर्यात्
१७ लग्नबलंवसंततिलकेनाह केंद्रत्रिकोणेति लग्नेखदशमशुद्धसहितेसर्वग्रहरहितेदशमेत्यर्थः केंद्र

हिलाभरिपुगैश्चवदंतिपापैः षष्ठाष्टमेमासेषथहि मृगदृशांपंचमादोजमासेनक्षत्रैःस्यात्स्थिरसंज्ञैः समृ
दुलघुचरैर्बालकान्नाशनंसत् १७ केंद्रत्रिकोणसहजेषुशुभैःखशुद्धेलग्नेत्रि

त्रिकोणसहजेषुशुभैः सद्भिः त्रिलाभरिपुगैः पापैः सद्भिः लग्ना
दृष्टषष्ठस्थानरहितंचंद्रंच अन्नप्राशनेप्रशस्तंवदंति नारदः दशमेशुद्धिसंयुक्तेशुभलग्नेशुभांशकेशुक्ल
पक्षेचपूर्वाण्हेसौम्ययुक्तनिरीक्षिते त्रिषष्ठलाभगैःपापैः केंद्रधीधर्मगैःशुभैः व्ययत्रिनिधनस्थेनचंद्रेणप्रा
शनंशुभम् विशेषमाहगुरुः शुक्रारज्ञाःक्रमाद्यातास्सप्तमाष्टमधर्मगाः भोज्यंभोक्तुर्नवत्वेतुसर्वदामरण
प्रदाइति भोज्यमन्नंगोधूमादितस्यनवत्वेनभक्षणीयत्वेसतिभोक्तुरन्नप्राशनकर्तुर्बालस्यनवत्वेसतिवा
शुक्रः सप्तमः भौमोष्टमः बुधोनवमः एतेग्रहाःमरणप्रदाइत्यर्थः मैत्रेति अनुराधाशततारकास्वातीजन्मन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षत्राणिकेचित् असहृदंति श्रीपतिना अनुक्तत्वादिनिषावः जन्मनक्षत्रनिषेधोगुरुणोक्तः जन्मर्क्षेकर्म नक्षत्रे आधानर्क्षेचवर्जयेत् कर्णवेधंतथापानक्षुरकर्मान्नभोजनमिति जन्मनक्षत्रान्नस्यभोजनमिति तत्रान्नस्यभोजनमितिसुत्सत्सावार्षिकनवान्नभोजनविषयमेतत् नसुनर्बाल्यान्नप्राशनपरम् तत्रनारदे नातिप्राशस्त्याभिधानात् तथाचनारदः षट्वंधनचौलान्नप्राशनेचोपनायने शुभदंजन्मनक्षत्रमशुभं त्वन्यकर्मणीति १८ अथग्रहाणांस्थानवशात्फलान्यनुष्टुप्द्वयेनाह क्षीणेंदुहति त्रिकोणव्ययकेंद्राणिदशमरहितानि ९ ५ १२ १ ४ ७ अष्टौ ८ एषुस्थितैः क्षीणेंदुादिभिः अष्टभिर्भिक्षाशीत्यादिफ

लग्नाष्टषष्ठरहितंशशिनंग्रशस्तंमैत्रांबुपानिलजनुर्भमसच्चकेचित् १८ क्षीणें दुपूर्णचंद्रेज्यज्ञभौमार्कीर्किभार्गवैः त्रिकोणव्ययकेंद्राष्टस्थितैरुक्तंफलंग्रहैः १९

लंभवति यथा एषुस्थानेषुस्थितः क्षीणचंद्रश्चेत्तदान्नप्राशनकृत्बालोभिक्षाशीदरिद्रः स्यात् पूर्णचंद्रश्चेत्तदाज्योतिष्टोमादियज्ञकृत् गुरुश्चेद्दीर्घजीवी बुधश्चेत् ज्ञानी भौमश्चेत् पित्तरुक् पित्तकृतारुगस्यासौपित्तरुक् अर्कश्चेत्कुष्ठी आर्किःशनिश्चेत् अन्नाभावसंबंधीक्लेशोन्नक्लेशः वातप्रधानोव्याधिर्वातव्याधिः एतौविद्येनेयस्यसोऽन्नक्लेशवातव्याधिमान्स्यात् राहुकेत्वोरप्येतदेवफलम् शुक्रश्चेद्भोगभाक्स्यात् क्षीणचंद्रपूर्णचंद्रयोर्लक्षणमाहवसिष्ठः संपूर्णेंदूभयाष्टम्योर्मध्येंदुः पूर्णसंज्ञकः विनष्टेंदूभयोष्टम्योर्मध्येसौक्षीणसंज्ञकइति १९ ७ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२० अथभूम्युपवेशनंवसंततिलकेनाह पृथ्वीमितिकुजेविशुद्धेशौमबलेसति रिक्तावर्जितेतिथौपंचम-
मासिव्रजतिलग्नेसतिशुभेन्हिशुभग्रहवारे तथाध्रुवमृगेज्यानुराधालघुनक्षत्रैरुपलक्षितेकालेकटिसू
त्रंपट्टसूत्रादिनिर्मितंकटिस्थलेबध्वाकौपृथिव्यांबालमुपवेशयेत् मंत्रपाठपुरःसरंउपवेशनाख्यंसंस्कारं
कुर्यात् मंत्राश्चपद्मपुराणे रक्षैनंवसुधेदेविसदासर्वगतंशुभे आयुःप्रमाणंसकलंनिक्षिपस्वहरिप्रिये
अचिराद्यायुषस्तस्ययेकिंचित्परिपंथिनः जीवितारोग्यविघ्नेषुनिर्दहस्वाचिरेणतान् धारिण्यशेषभूता
नांमातस्त्वमधिकात्यसि कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यताम् तस्योपवेशनंकृत्वाभूमौब्राह्मणभो

भिक्षाशीयज्ञकृद्दीर्घजीवीज्ञानीचपित्तरुक् कुष्ठीचान्नकृशवातव्याधिमान्
भोगभागिति २० पृथ्वीवराहमभिपूज्यकुजेविशुद्धेरिक्तेतिथौव्रजतिपंचममा
सिबालम् बध्वाध्रुभेन्हिकटिसूत्रमथध्रुवेदुज्येष्ठर्क्षमैत्रलघुभेरुपवेशयेत्तो
२१ तस्मिन्कालेस्थापयेत्तत्पुरस्ताद्दस्त्रंशस्त्रंपुस्तकंलेखनींच स्वर्णंरौप्यंयच्चगृ
ह्णातिबालस्तैराजीवैस्तस्यवृत्तिःप्रदिष्टा २२ जनम् ततःकृत्वाततःकार्यमुत्सवंपूर्ववद्विजइ-
ति उत्सवोनीराजनादिः इदंकन्यापुत्रयोःसाधारणम् विशेषाभावात् इतिभूम्युपवेशनम् २१ अथजीवि
कापरीक्षाभूम्युपवेशनकालएवशास्त्रिण्याह तस्मिन्कालइति स्पष्टार्थम् आजीवैर्जीविकाभिः आजीवोजी
विकावार्तादृस्यभिधानात् २२ अथशिशोस्तांबूलमुहूर्त्तस्नग्धरयाह वारेभौमार्किहीनेइति भौमशनिव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्जितेवारेश्रवणमूलपुनर्वसूज्येष्टास्वातीधनिष्ठासहितैः ध्रुवमृदुलघुनक्षत्रैरुपलक्षितेकालेमिथुनमकर
कन्याकुंभवृषमीनानामन्यतमेलग्नेसौम्यग्रहैःकेंद्रत्रिकोणगतैः अशुभगगनगैः पापग्रहैः षष्ठैकादशद्
तीयगैः सार्धमासद्वयेसमयेबालकस्यतांबूलदानंप्रोक्तम् वा॰ अथवाअन्नाशनेअन्नप्राशनसमयेप्रो
क्तम् २३ अथकर्णवेधमुहूर्तरत्नधरयाह हित्वैतानिति एतान्यदार्थान्हित्वाकर्णवेधःप्रशस्तः इत्यन्व
यः हरिशयनंआषाढशुक्लैकादशीकार्तिकशुक्लैकादशीपर्यंतम् जन्ममासंयस्मिन्चांद्रमासेचैत्रादौजन्म
सजन्ममासः केचित् आरभ्यजन्मदिवसंयावत्त्रिंशद्दिनंभवेत्जन्ममासःसविज्ञेयोवर्जितःसर्वकर्मसु२

वारेभौमार्किहीनेध्रुवमृदुलघुभैर्विष्णुमूलादितींद्रस्वातीवस्वभ्युपेतैर्मिथुनमृग
सकुंभगोमीनलग्ने सौम्यैःकेंद्रत्रिकोणैरशुभगगनगैःशत्रुलाभत्रिसंस्थैस्तां
बूलंसार्धमासद्वयमितसमयेप्रोक्तमन्नाशनेवा २३ हित्वैतांश्चैत्रपौषावमहरिशय
नंजन्ममासंचरिक्तांयुग्माब्दंजन्मतारामृतुमुनिवसुभिःसंमितेमास्यथोवा

तिलक्षणलक्षितंवर्जयंतिरिक्ताम् ४ ९ १४ युग्माब्दंसमवर्षेद्वितीयचतुर्थादिकम् जन्मतारांप्रथम
दशमैकोनविंशात्मिकांचहित्वा ऋत्विति ऋतुमुनिवसुभिःसंमितेमासि षष्ठसप्तमाष्टममासेषु अथोवा
जन्माहात्सूर्यैः द्वादशभिः भूपैः षोडशभिः परिगणितेदिवसेसौरसावनेबुधगुरुशुक्रचंद्रवारे ओजा ७४
ब्देविषमवर्षे विष्णुयुग्मश्रवणधनिष्ठे पुनर्वसूमृदूनिमृगरेवतीचित्रानुराधालघूनिहस्ताश्विपु-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्याभिजितएतैर्नक्षत्रैः कर्णवेधःप्रशस्तः ॥ अथकर्णवेधेलग्नशुद्धिमाहर्षिपुत्रः संशुद्धेति मृतिभ
वनेऽष्टमस्थानेसंशुद्धेग्रहरहितेसति शुभग्रहैस्त्रिकोणकेंद्रस्थाय ९ ५ १ ४ ७ १० ३ ११ स्थै
सद्भिः कवीज्यलग्नेशशुक्रबुधैर्लग्नेवृषतुलाधनुर्मीनारव्ये पापास्त्यैर्ग्रहैस्तृतीयषष्ठैकादशस्थानस्थैः
गुरौलग्नस्थेसति कर्णवेधःशुभावहःशुभजनकःस्यात् अथाब्दपूर्तिमुहूर्तःप्रसंगात् विधिरत्रे अब्दे
नसौरेणशिशोःसमानेबालंशसंस्थाप्यजन्मर्क्षयुषोर्दृढिकरंचकर्मतद्वारये द्रस्त्रशुक्लवर्ण-

जन्माहात्सूर्यभूपैःपरिमितदिवसेज्ञेज्यशुक्रेंदुवारेथोजाब्देविष्णुयुग्मादिति
मृदुलघुभैःकर्णवेधःप्रशस्तः ॥ संशुद्धेमृतिभवनेत्रिकोणकेंद्रस्थायस्थैः
शुभैरवचरैःकवीज्यलग्नेपापास्त्यैररिसहजायगेहसंस्थैर्लग्नस्थेत्रिदशगु
रौशुभावहःस्यात् ॥ गीर्वाणांबुप्रतिष्ठापरिणयदहनाधानगेहप्रवेशाश्चौ
लंराजाभिषेकोव्रतमपिचशुभंनैवयाम्यायनेस्यात् सूत्रम् तत्रखंडनक्षत्रेगर्गः उदयव्या
पिजन्मर्क्षेतस्माद्वात्यंतुजन्मतःसंगवव्यापिखंडर्क्षेतत्रजन्मकरंशुभम् दाक्षिणात्यास्तुजन्ममासीयज-
न्मतिथावब्दपूर्तिकुर्वंतीति ॥ अथचूडाकर्ममुहूर्तेविवक्षुस्तन्निषेधकंप्रसंगतोन्यकर्मनिषेधकंचकालं
स्मरन्नाह गीर्वाणेति गीर्वाणादेवाः अंबुजलंजलाशयःतयोःप्रतिष्ठाउत्सर्गःपरिणयोविवाहः दहना
धानमग्न्याधानम् गेहप्रवेशोगृहप्रवेशः चौलराजाभिषेकौप्रसिद्धौ व्रतमुपनयनम् इदंसर्वंयाम्यायने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणायनेशुभमदंनस्यात् तथागुरुशुक्रयोर्बाल्येअस्तेवार्धक्येचपूर्वोक्तम् नशुभमदंस्यात् अथकेतू दयेधूमकेतोरुदयेपिपूर्वोक्तंनशुभंस्यात् मंडेश्वरः केतोरस्तदिनादूर्ध्वंसप्ताहंमंगलंत्यजेत् यावत्के तूदयस्तावदशुद्धः समयोहिसः अत्रकेचित्केतूदयेजातेसतिपक्षंपंचदशदिनानिजहतिवर्जयंति वरा हः दृष्टःषोडशवासरान्नशुभदः कैश्चित्त्यदृष्टः शिखीति केचित्तुपक्षांतरेअर्धपक्षार्द्धंसप्तदिनानिकेतू दयानंतरंजहति इदमपितत्रैव केतूदयेसप्तदिनानित्योर्ध्वंविहाययात्रादिषुगर्हितानि दिनानिशेषा णिशुभानिनूनंवदंतिरैभ्यप्रमुखामुनींद्राः तमिति अपरेआचार्याः तंकेतुंयावदीक्षांयावद्दर्शनंयज्जह

नोवाबाल्यास्तवार्द्धंसशुक्रगुरुमितयोर्नैवकेतूदयेस्यात्पक्षंवार्द्धंचकेचिज्जहति
तमपरेयावदीक्षांतदुग्रे २६ पुरःपश्चाद्भृगोर्बाल्यंत्रिदशाहंचवार्धकम्

तितदुग्रे केतौहिशिखिचूडोजामसकीलकादावतिदुष्टफलंद्रष्टव्यम् तेषांलक्षणमाहगर्गः शिशिरवाश्व त्रितारास्वरक्तलोहितरश्मयः भायशस्तूत्तरामाशांसचंतेनित्यमेवहीतिवर्षंतुयावद्दर्शनंकेतूदयेनि षिद्धंइत्यक्तंतदुग्रे ब्रह्मपुत्राख्येकेतौज्ञेयम् ज्योतिर्निबंधे केतोरस्तदिनादूर्ध्वंसप्तरात्राणिवर्जयेत् ब्र ह्मपुत्रोद्गमेवर्ज्यंव्रतयात्राचमंगलम् तल्लक्षणमाहवराहः ब्रह्मसूतएवत्रिशिखोवर्णैस्त्रिभिर्युगांत करः अनियतदिवसंप्रभवोविज्ञेयोब्रह्मदंडाख्यइति २६ अथशुक्रगुर्वोर्बाल्यवार्धक्ययोर्दिनसंख्या मनुष्टुभाह पुरःपश्चादिति भृगोःशुक्रस्यपुरः पूर्वस्यांदिश्युदितस्यपश्चिमदिशिदृष्टस्यचयथासंख्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिदशाहं बालत्वं स्यात् पूर्वस्यांत्रिदिनं पश्चाद्दशदिनमित्यर्थः चपुनः भृगोर्वार्धकं पूर्वस्यामस्तेपक्षंपंच दशदिनानि पश्चादस्तेपंचदिनानि गुरोः तेबाल्यवार्धकेपक्षंपंचदशदिनानिउदाहृतेकथिते २७ अथापरमतेनबाल्यवार्धकंचालुलुभाह तेदशाहमिति दिङ्मियमंत्यक्त्वाद्वयोर्गुरुशुक्रयोः तेबाल्यवार्धकेदशाहंदशदिनंप्रोक्तेकैश्चित् अपरैस्तुसप्तदिनंबाल्यवार्धकेप्रोक्ते अन्यैरुच्यहंत्रिदिवसंतेबाल्यवार्धकेप्रोक्तेपरंतुआत्ययिकेकार्यस्यावश्यंभावः अत्ययः सप्रयोजनमस्येति आत्ययिकंतस्मिन्लग्नांतराभावेसति अतिकालस्यबलोः अवश्यदेयायाः कन्यायावायथासंभवंदशसप्तत्रिदिनानिवर्ज्यानिनान्य

पक्षंपंचदिनंतेद्वेगुरोःपक्षमुदाहृते २७ तेदशाहंद्वयोःप्रोक्तेकैश्चित्सप्तदिनंपरैः ।
त्र्यहंत्वात्ययिकेप्यन्यैरर्धाहंचत्र्यहंविधोः २८

थेत्यर्थः अथदेशभेदेनवाव्यवस्था गर्गः शुक्रोगुरुः प्राक्परतश्चबालोविंध्येदशार्वतिषुसप्तरात्रम् वंगेषुद्वयेषुचषट्चपंचशेषेषु देशेत्रिदिनंनिगदितम् चंद्रस्यविशेषमाह अर्धाहमिति विधोस्तेबाल्यवार्धकेक्रमेणार्धाहंत्र्यहंचभवतः बाल्यमर्धदिनंवार्धकंत्रिदिनंचंद्रस्येत्यर्थः उक्तंचवसिष्ठेन दृङ्मूलमिंदोस्त्रिदिनंदिनार्द्धं बालत्वमस्तस्य महद्दिनं यंचापिनोक्तमेकंदिवसंशिशुत्वमित्येतदिंदोस्तदयुक्तमेवेति कश्यपेनबालोपींदुः शुभाएवोक्तः दृङ्मूलचंद्रस्त्रियंहंतिपतिंहंत्यस्तमागतः यतस्त्वमृतरश्मिलाद्बालेपिशुभदःशशीति अतएवसंपूर्णायामपिपतिपदिद्वितीयादिनेद्वितीयायांज्ञातिर्यज्ञोपवीतादिकंशिष्टाःकुर्वंति २८ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथचौलमुहूर्त्तंस्वगृह्यरारथोद्वताभ्यामाह चूडावर्षादिनिक्षीणचंद्रेति तृतीयाद्वर्षादितिलयपलोपेपंचमी तेनगर्भाधानकालाज्जन्मकालाद्वातृतीयेवर्षेपंचमेवाचूडाकरणंप्रभवतिकृतंशक्नोदर्कंभवतीत्यर्थः तृतीयेब्देशिशोर्गर्भाज्जन्मतोवाविशेषतः पंचमेसप्तमेवापिस्त्रियाःपुंसोपिवासममिति मनुनाप्रथमेवर्षेअप्युक्तं चूडाकर्महिजातीनांसर्वेषामेवधर्मतः प्रथमेब्देतृतीयेवाकर्त्तव्यंश्रुतिनोदनादिति अत्रबहुकालोक्तौयथागृह्यंव्यवस्थास्वगृह्येविशेषकालानुक्तौतुसमबलत्वात्सर्वेषांविकल्पः अष्टमीभर्कोद्वादशीरिक्ताआद्यात्रितिपत् षष्ठीपर्वाणिपूर्वोक्तानिचनुर्दश्यष्टमीत्यादीनि एतैरूनेरहितेऽह्नि गुरुणागलग्नहोपिनिषिद्धः विद्यारंभव्रतोद्वेशंसौरंचैवविशेषतः गलग्नहेनकर्तव्यंयदीच्छेत्सुतजीवितमिति विचैत्रइति चैत्ररहितेउत्तरायणेचूडास्यात् शुक्लाशुक्लप्रकरणोक्तोजन्ममासनिषेधोत्रापिध्येयः तथाचेंदुशुक्रेज्यकानांवारे लग्नांशयोश्चेतिसौम्यग्रहाणांवारेसौम्यग्रहाणांलग्नेतेषामेवनवांशेचचूडास्यात् पापग्रहाणांवारेपिविशाणांतुशुक्लोरविः क्षत्रियाणांतुभूसूनुर्विट्शूद्राणांशनिःशुक्लइतिप्रयोगपारिजातोक्तेः तथास्वभनिधनतनौभंलग्नेराशिश्चस्वस्यभेस्वस्वभाभ्यांनिधनंअष्टमंलग्नंतन्नविद्यतेयस्मिंस्तनौस्वजन्मलग्नजन्मराशिभ्यामष्टमलग्नरहितेलग्नेचूडास्यात् तथानैधनेअष्टमस्थानेशुद्धियुक्तेशुक्रव्यतिरिक्तसर्वग्रहरहितेलग्नेचूडास्यात् अष्टमस्थाग्रहाःसर्वेनेष्टाशुक्रंविवर्जितम् शुक्रस्तुनिधनेचौलेसर्वसंपत्करः शिशोरितिपराशरोक्तेः ज्येष्ठापुष्यैरनूराधारहितैर्मृदुचरलघुभैर्दृदशनक्षैः अथलग्नबलम् एकादशषष्ठतृतीयस्थानस्थैः पापग्रहैः सद्भिः तथाक्षीणचंद्रभौमशनिसूर्यैः केंद्रगतैः क्रमेणयथासंख्यंमृत्युकृशत्वान्मृतिः पंगुता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खंजत्वम् ज्वरः एतानि फलानि स्युः बुधजीवभार्गवैस्तु केंद्रस्थैः शुभं कल्याणं स्यात् वसिष्ठेनलग्नादिविषये विशेषउक्तः मेषे दुःखी मृगेंद्रेच वृश्चिकेव्यसनं भवेत् राजा बौधेचधनुषि शुभयुक्तेनदुष्यति विषशस्त्रजलैर्घोरैः पीड्यतेमरणान्वितः क्षौरेमृत्युर्घटेलग्नेशुभयुक्तेपिसंकटं सामित्रेभास्करेक्षौरेमृत्युःस्याद्भूमिजेतथा कुंभेसौख्यविनाशः स्यान्मंदभाग्यंशनैश्चरेइतिनक्षत्रेषुविशेषमाहगुरुः हस्ताश्विविष्णुपौष्णानिश्रविष्ठादित्यपुष्यभम् सौम्यचित्रेनथाक्षौरेउत्तमानवतारकाः त्रीण्युत्तराणि वायव्यंरोहिणीवारु-

चूडा वर्षात्तृतीयात्स्यभवतिविषमेऽष्टार्करिक्ताद्यषष्ठीषर्वोनाहेविचैत्रोदगयन
समयेस्तेंदुशुक्रेज्यकानाम् क्षारेलग्नांशयोश्चस्वभनिधनतनौनैधनेशाद्रिशु
क्रेशाक्रोपैतैर्विमैत्रैर्मृदुचरलघुभैरायषड्रिस्थपापैः २१

णंतथा क्षौरेषण्मध्यमाःशोक्ताः शेषाद्वादशगर्हिताइति क्षौरादधुजन्मलग्नंशुभमाहभृगुः ऋषिंप्रयाणं क्षौरंचविवाहः भाशनंतथा शिशोर्वस्त्रंचपानंचजन्मराशौशुभंभवेत् जन्मलग्नेशुभंक्षौरंमध्येवर्ज्यंव्ययेष्टमइति मर्मस्तु आत्मराश्युदयेषष्ठेद्वादशेनिधनेतथा अन्यक्षेत्रेचनीचेचक्षौरंनैवप्रशस्यते जन्मलग्नंसतिसंभवेवर्ज्यमित्यनयोर्व्यवस्था पुनरिष्टतारयागोचरप्रकरणोक्तयाशुभफलदयातारयाचूडास्यात् केशवमानर्तपुरंपाटलिपुत्रंपुरीमाहिच्छत्रम् दिनमदिनंचस्मरनांक्षौरविधौभवतिकल्याणमिति २२ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३० अथसगर्भायांसंस्कार्यमातरिविशेषमनुष्टुभाह पंचमासाधिकेति संस्कार्यमातुर्गर्भेपंचमासे भ्योधिकेसतिचौलंशुभंनस्यात् पंचमासेभ्यः पूर्वेचौलंशुभमित्यर्थः गर्भेमातुः कुमारस्यनकुर्याच्चौल कर्मच पंचमासादधः कुर्यादतऊर्ध्वनकारयेदितिवसिष्ठोक्तेः अस्यापवादमाह पंचवर्षाधिकस्येति उल्लंघितपंचवर्षस्यशिशोर्मातरिगर्भिण्यामपिसत्यांपंचमादूर्ध्वमपिचौलमिष्टम् नारदः सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् पंचाब्दात्परतोर्ध्वंतुगर्भिण्यामपिकारयेत् सहोपनीत्याकुर्याच्चेत्तदादोषोन-

क्षीणचंद्रकुजसौरिभास्करैर्मृत्यशस्त्रमृतिपंगुताज्वराः स्युःक्रमेणबुधजी वृभार्गवैःकेंद्रगैश्चशुभमिष्टतारया ३० पंचमासाधिकेमातुर्गर्भेचौलंशिशो र्नसत् पंचवर्षाधिकस्येष्टंगर्भिण्यामपिमातरि ३१ तारादोष्येऽब्जेत्रिकोणो च्चगेवाक्षौरंसत्स्यात्सौम्यमित्रस्ववर्गे सौम्येभेऽब्जेशोभनेदुष्टताराशस्तान्हे याक्षौरयात्रादिकृत्ये ३२ विद्यतइति अत्रतुपंचवर्षणांन्यूनाधिकभावोनापेक्षितःसर्वा पवादकत्वात् ३१ अथचौलेतारबलमावश्यकमित्यक्तंतत्रदुष्टतारापवादंशालिन्याह तारादोष्येति दु ष्टतारायामपिसत् अब्जेचंद्रेत्रिकोणोच्चगेत्रिकोणगेउच्चगेवासतिक्षौरंसत्शुभंस्यात् वासौम्यमित्रस्ववर्गेसौम्यानांबुधगुरुशुक्राणांषड्वर्गेचंद्रेसति अथवास्वस्थेवषड्वर्गेसतिक्षौरंसत्स्यात् सौम्येति सोम्येभे शुभग्रहराशौचंद्रेसति स्वस्यगोचरेणशोभनेसतिदुष्टतारापिक्षौरयात्रादिकृत्येशोभनासमीचीनाज्ञेया ३२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथविशेषमनुष्टुभाह ऋतुमत्याइति ऋतुमत्यारजस्वलायाः तथासूतिकायाजातापत्यायाश्वसूनोश्चौ-लोपनयनविवाहादिकृत्यंबालस्यबालिकायाश्चवानाचरेत्नकुर्यात् उक्तंचप्रचेतसा यस्यमांगलिकंकृ त्यंतस्यमानारजस्वलात्तदासमृत्युमाप्नोतिपंचमंदिवसंविनेति विवाहोत्सवकार्येषुमानाचैवरजस्वला वैधव्यंजायतेतत्रनृनार्योः पाणिपीडनेइति ज्येष्ठापत्यस्याद्यगर्भसूतस्यकन्यायावाशुभकृत्यंचौलादिकं-ज्येष्ठेमासिनभवति केश्चिदिति मार्गशीर्षेपिकैश्चिदाचार्यैराद्यगर्भेसूतकन्ययोर्मंगलकृत्यंनेष्यते भर-द्वाजः मार्गशीर्षेतथाज्येष्ठे क्षौरंपरिणयंव्रतम् आद्यगर्भदुहित्रोश्चयत्नेनपरिवर्जयेदिति ३३ अथसा

ऋतुमत्याः सूतिकायाःसूनोश्चौलादिनाचरेत् ज्येष्ठापत्यस्यनज्येष्ठेकैश्चिन्मा
र्गेपिनेष्यते ३३ दंतक्षौरनखक्रियात्रविहिताचौलोदितेवारभेपातंग्यारर्धी-
न्विहायनवमंयत्रंचसंध्यांतथा रिक्तांपर्वनिशांनिरासनरणग्रामप्रयाणोद्यत-
स्नाताभ्यक्तकृताशनैर्नहिपुनःकार्याहितप्रेप्सुभिः ३४

मान्यतः क्षौरमुहूर्ततन्निषिद्धं कालंचशार्दूलविक्रीडितेनाह दंतक्षौरेति चौलोदितेवारनक्षत्रेदंतक्रियाघर्षणादिकाक्षौरक्रियाविहि ताउक्ता निषिद्धकालमाह पातंगीति पतंगस्यसूर्यस्यापत्यंपातंगिः शनिः शनिभौमरविवारान्त्यक्त्वा नवमंयत्रंयद्दिनेक्षौरंकृतंततोनवमदिनेपुनः क्षौरंनकार्यम् तथासंध्यांप्रातःसायंकालौविहाय-तथा रिक्ताम् पर्वाणिपूर्वोक्तानि निशांरात्रिंचविहाय अथाधिकारिणःहितप्रेप्सुभिःस्वशुभमिच्छद्भिः ए-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तादृशैर्हिनिश्चयेनक्षौरक्रियानकार्या कैर्निरासनैः आसनरहितैः रणः संग्रामः ग्रामप्रयाणमर्थयात्राएत
दर्थमुद्यतैः कृतोद्योगैः स्नातैः कृतस्नानैः अभ्यक्तैः कृतैलाभ्यंगैः कृतांशनैः कृतभोजनैः सवर्णाद्यलंका
रभूषितैरित्यपिध्येयम् ३४ अथमंजुभाषिण्याविशेषमाह ऋतुपाणिपीडेति ऋतौयज्ञे तथापाणिपी
डोविवाहस्तत्रश्मश्रुकर्मादौ मृतौमातापित्रोर्मरणे बंधमोक्षणेकारागृहेबद्धस्यमोक्षणे द्विजाज्ञयाब्रा
ह्मणाज्ञया बंधमोक्षणेराजाज्ञया दुष्टेपिवारनक्षत्रादौक्षौरंचरेत्कुर्यात् अन्यच्च गांगायांभास्करक्षेत्रे
मातापित्रोर्मृतेहनि आधानेसोमपानेचषट्सुक्षौरंविधीयते अन्यच्च राजकार्यनियुक्तानांनटानांरू-

ऋतुपाणिपीडमृतिबंधमोक्षणेक्षुरकर्मचद्विजनृपाज्ञयाचरेत् शववाहतीर्थ
गमसिंधुमज्जनक्षुरमाचरेन्नखलुगर्भिणीपतिः ३५

पजीविनाम् श्मश्रुरोमनखच्छेदेनास्तिकालविशोधनमिति अथशवेति गर्भिणीगर्भवतीतस्याःभर्ता
शववाहं मृतकवहनम् तीर्थगमंतीर्थयात्राम् उपलक्षणत्वाद्देशगमनमपि सिंधुमज्जनंसमुद्रस्नान
म् क्षौरंएतानिकर्माणिनाचरेन्नकुर्यात्उक्तंच सिंधुस्नानंद्रुमच्छेदंवपनंमैथुनंवाहनम् विदेशगमनंचै
वनकुर्याद्गर्भिणीपतिः राजायोगीपुरंध्रीचमातापित्रोस्तुजीवतोः मुंडनंसर्वतीर्थेषुनकुर्याद्गर्भिणीपतिः
नारदः वपनंमैथुनंतीर्थवर्जयेद्गर्भिणीपतिः आद्यंचसप्तमान्मासादूर्ध्वंचान्यत्रवेदवित् ३५ ७८

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथराज्ञांक्षौरेविशेषंसर्वथावर्ज्यनक्षत्राणिचभजंगमयातेनाह नृपाणामिति नृपाणांपंचमेपंचमेदिनेक्षौरनक्षत्रेश्मश्रुकर्महितंस्यात् पंचमेदिनेयदिक्षौरनक्षत्राभावस्तदर्थमाह अस्योदयेवेति अथवाऽस्यक्षौरभस्यउदयेश्मश्रुकर्मकार्यम् उदयशब्देनतन्नक्षत्रस्यस्वामिनोमुहूर्तः तथाचगर्गः क्षौरकर्ममहीशानां पंचमेपंचमेहनि कर्त्तव्यंक्षौरनक्षत्रेप्यथवातन्मुहूर्तकेइति उत्पलेनतुवराहपद्यव्याख्यानावसरेअस्य उदयेअस्यक्षौरभस्योदयेलग्नेइतिव्याख्यातम् यथा मेषलग्नंत्रिंशत्भागात्मकंतत्राद्यास्त्रयोदशभागाविंशतिकलाधिकायावताकालेनमेषलग्नेउदयंयांतितावदश्विनीनक्षत्रमुदयंयातीति तदनंतरं यावंतएवांशायावताकालेनोदयंयांतितावद्भरण्युदयइत्यनेनन्यायेनसर्वेषांनक्षत्राणामुदयाज्ञेयाः भा

नृपाणांहितंक्षौरमेषश्मश्रुकर्मदिनेपंचमेपंचमेस्योदयेवा षडग्निस्त्रिमैत्रो ऽष्टकःपंचपित्र्योऽब्दतोब्ध्यर्यमाक्षौरकृन्मृत्युमेति ३६ तरस्तत्र एवंव्याकुर्यात् यस्मिन्काले अश्विन्याउदयंक्षितिजसंबंधंसंपद्यतेतत्समयमारभ्ययावद्भरण्याउदयंक्षितिजसंबंधंतदंतरेयावान्कालःसोश्विन्याउदयउच्यते एवंसत्युदयलग्नद्वयांशांतरालात्गणितमार्गेणयावानिष्टकाल आगच्छेत्सएवतन्नक्षत्रोदयइतिनिष्कृष्टोऽर्थः षडग्निरिति अग्निःकृत्तिकाक्षौरादृत्याषड्भरंकृत्तिका यस्यसः एवंत्रीणिमैत्रःअनूराधायस्य अष्टौकःरोहिण्योयस्य पंचपित्र्याणिमघायस्य अब्धयश्चत्वारः अर्यमाणउत्तराफाल्गुनीयस्यसएतादृशाः क्षौरकृदब्दतोवर्षानंतरंमृत्युंमरणमेतिप्राप्नोति वसि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्ठः अष्टाभ्रक्षैपितृपंचकस्त्वष्टवह्निधिष्ण्याश्वतुरर्यमर्क्षः त्रिमैत्रभः पद्मजसंनिभोपि क्षौरेनरोब्धान्धिधनंगतःसन्नति क्षौरम् ३६ अथप्रशस्तकालत्वादक्षरारंभमुहूर्तंप्रपंचामरखंडस्माह गणेशेति गणेशविष्णूभसिद्धौ वाक्सरस्वती रमालक्ष्मीः एतादेवताःप्रपूज्यपंचमेवर्षेसति शिवएकादशीद्वादशीदशमीद्वितीयाषष्ठीपंचमीतृतीयाआसामन्यतमतिथौ रवावुदक्उत्तरायणगतेसति तथालघुनक्षत्राणि हस्ताश्विपुष्यःश्रवणस्वातीरेवतीपुनर्वसूः ईशआर्द्रातक्षचित्रा मित्रमनूराधाएषामन्यतमनक्षत्रेसति तथासतांसोमज्ञगुरुशुक्राणांदिनेदिवसे तथाचरराशयोमेषकर्कतुलामकरास्तद्रहितशुभस्वामिकेवृषमिथुनकन्याधनुर्मीना

गणेशविष्णुवाग्रमाःप्रपूज्यपंचमाब्दकेतिथौशिवार्कदिक्द्विषट्शरत्रिकेरवावुदक्लघुश्रवोनिलांत्यभादितीशतक्षमित्रभेचरौनसत्तनौशिशोर्लिपिग्रहःसतांदिने ३७ मृगात्करार्च्छुतेस्त्रयेश्विमूलपूर्वकात्रयेगुरुद्वयेर्कजीवविस्तिनेन्द्विषट्शरत्रिके शिवार्कदिक्द्विके नामन्यतमेलग्नेसतिशिशोर्लिपिग्रहोनूतनाक्षरलिखनारंभः कार्यः ३७ अथविद्यारंभमुहूर्तंप्रपंचामरेणाह मृगादिति मृगात्त्रयेमृगार्द्रापुनर्वसुषु हस्तात्त्रये हस्तचित्रास्वातीषु श्रुतेः श्रवणात्त्रयेश्रवणधनिष्ठाशतभेषु अश्विन्यामूः मूलेपूर्वात्रयेगुरुद्वयेपुष्याश्लेषयोः तथासूर्यगुरुबुधशुक्राणांदिने तथाषष्ठीपंचम्यादिसप्ततिथिषु शुभैः केंद्रत्रिकोणगैः सद्भिः अधीतिः शुभास्मृता अधीतिरध्ययनम् परैः ध्रुवांत्यमित्रभेअधीतिःशुभाप्रोक्ता इदंच ७९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नंविद्याविषयमितिदीपिकोक्तेः विद्यारंभेश्रवणत्रयोपादानंमहेश्वरादिमतात् वसिष्ठादिभिः श्रवणस्यैकबलस्यनोक्तत्वात् इतिविद्यारंभः ३८ अथव्रतबंधइति विंशतिपद्यैःप्रोच्यतेइतिशेषः तस्यत्रिविधोपिकालोनित्यः काम्योगौणश्चक्रमेणतंशार्दूलविक्रीडितेनाह विप्राणामिति गर्भादिनमारभ्याष्टमेसौरेवर्षेऽथवाजनेरुत्पत्तिदिनात्सौरवर्षेष्टमेसतिविप्राणांव्रतबंधनंनित्यंनिगदितम् अथकाम्यम् विप्राणामेवगर्भाज्जनेर्वापंचमेवर्षेकार्यम् एवंक्षितिभुजांक्षत्रियाणांगर्भाज्जनेर्वाषष्ठेकाम्यम् गर्भाज्जनेर्वाएकादशेसौरवर्षेनित्यंवैश्यानांपुनस्तथैवाष्टमेकाम्यम् तथैवगर्भाज्जनेर्वाद्वादशेनित्यम् नारदः आधानादष्टमेवर्षे

शिवार्कदिक्ऋद्धिकेतिथौध्रुवांत्यमित्रभेपरैः शुभैरधीतिरुत्तमात्रिकोणकेंद्रगैः स्मृता ३९ विप्राणांव्रतबंधनंनिगदितंगर्भाज्जनेर्वाष्टमेवर्षेवाप्यथपंचमे क्षितिभुजांषष्ठेतथैकादशे

गर्भतोवाग्रजन्मनाम् राज्ञामेकादशेमौंजीबंधनंद्वादशेविशामिति अत्रफलाश्रवणान्नित्यमित्यवसीयतेमनुः ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे राज्ञोबलार्थिनःषष्ठे वैश्यस्यार्थार्थिनोष्टमे अत्रफलश्रवणात्काम्यतापैठीनसिनागर्भपंचमेव्रतबंधनमुक्तम् गर्भपंचमेब्राह्मणमुपनयेदिति गर्भषष्ठेऽष्टमेचक्षत्रियविशोर्ज्ञेयः गर्भादिसंख्यावर्षाणामितिस्मृतेश्च आपस्तंबसूत्रे गर्भाष्टमेषुब्राह्मणमुपनयेदृभैकादशेषुवैश्यमितिबहुत्वान्यथानुपपत्यागर्भषष्ठसप्तमाष्टमेष्विति वृत्तिकृद्व्याख्यानात्त्रयाणामपिनित्यकालता एवंगर्भैकादशेत्यादावपिव्याख्येयम् एतच्चतच्छाखाध्यायि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयंज्ञेयम् अथमौणकालउच्यते निगदितेप्रोक्तेगर्भान्ननेर्वाष्टमेइत्यादिकेकालेतस्मिन्द्विगुणितेगतेस
तिनद्व्रतबंधनंगौणमाहुः यथा ब्राह्मणस्यषोडशवर्षपर्यंतम् क्षत्रियस्यद्वाविंशतिवर्षपर्यंतम् वैश्यस्यचतु
र्विंशतिवर्षपर्यंतंगौणमित्यर्थः मतुः आषोडशाद्ब्राह्मणस्यसावित्रीनाभिवर्तते आद्वाविंशाद्क्षत्रबंधोराच-
तुर्विंशतिर्विशः अतऊर्ध्वंत्रयोप्येतेयथाकालमसंस्कृताः सावित्रीपतिताव्रात्याभवंत्यार्यविगर्हिताइतिकेश
वः स्वस्वमौंजीमुख्यकालेश्रेष्ठमध्याधमाःसमाः तिस्रःकेशवदैवज्ञैः प्रोक्तामौंजीनिबंधनेइति ११ अथव्र
तबंधेनक्षत्रादिकंवसंतनिलकेनाह क्षिप्रेति गीर्वाणांबुधनिष्ठेत्यादिनादक्षिणायननिषेधाद्दुत्तरायणमास

वैश्यानांपुनरष्टमेप्यथपुनःस्याद्द्वादशेवत्सरेकालेयद्दिगुणेगतेनिगदितेगौ
णंतदाहुर्बुधाः ११ क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेऽर्कविद्गुरुसितेंदु
दिनेव्रतंसत्

षट्पंप्रशस्तमितिमासानामुक्तत्वान्नक्षत्रादिकमेवोक्तम् तत्रकाश्यपः ऋतौवसं
तेविप्राणांग्रीष्मेराज्ञांशरद्यथा विशांमुख्यंचसर्वेषांद्विजानांचोपनायनम् साधारणंचमासेषुमाघादिषु
चपंचसु क्षिप्रेति क्षिप्राणिहस्ताश्विपुष्याभिजवाणिरोहिण्युत्तरात्रयम् अहिराश्लेषा चरणाणिश्रवणधनि-
ष्ठाशततारापुनर्वसुस्वात्यः मूलम् मृदूनिमृगरेवतीचित्रानुराधाः तिस्रःपूर्वारौद्रेआर्द्रायाम् एषुद्वाविंश
तिभेषुव्रतबंधनंसत् उक्तंच प्राजापत्यादिषट्क्षेभगर्क्षादिषुपंचसु मूलादिदशकेचैवसमैत्रेव्रतबंधनमि
ति अर्थाद्भरणीकृत्तिकामघाविशाखाज्येष्ठासूनकार्यमित्यर्थः एतानिसर्वशास्त्रवानक्षत्रमेलकाभिप्रायेणो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षानि क्षविज्ज्येष्ठाशतताराषिगृहीता श्रीपतिनिबंधे अश्विनीमृगचित्रास्वहस्तेस्वात्यांचशक्रभे पुष्येचपूर्व फल्गुन्यांश्रवणेपौष्णभेतथा वासवेशततारास्वव्रतबंधः प्रशस्यते ऋजबलराजमार्तंडयोरपि हस्तत्रयेदैत्य रिपुत्रयेचशक्रेंदुपुष्याश्विनिरेवतीषिति हस्तेशक्राश्विचित्रादितिवसुवरुणोपेंद्रपुष्येंदुपौष्णस्वातीषु श्रव्या हतास्वस्मृतमुपनयनंभार्गवाद्यैर्मुनींद्रैरितिच अर्केति सूर्यबुधगुरुशुक्रचंद्रदिवसेषुव्रतंसत् अर्थाद्दोमश नीनिषिद्धौ नारदः आचार्यसौम्यकाव्यानांवाराः शस्ताशशीनयोः वारौतौमध्यफउदाहृतौनिंदितौव्रते तत्रा प्यस्तंगतेबुधस्यवर्ज्यः अस्तंगतस्यसौम्यस्यवारोवर्ज्योद्विजन्मनीतिनारदोक्तेः द्वित्रीषिति द्वितीयातृतीया

द्वित्रीषुरुद्ररविदिक्प्रमितेतिथौचकृष्णादिमत्रिलवकेपिनचापराण्हे ४०

पंचम्येकादशीद्वादशीदशमीसंज्ञास्तिथिषुचव्रतंसत्स्यात् नारदेनसप्तमीत्रयोदश्योः प्राशस्त्यमुक्तंतदसं नाभिप्रायेणज्ञेयम् उक्तंचतेनैव विनातुर्नावसंतेनकृष्णपक्षेगलग्रहे अपराण्हेचोपनीतःपुनःसंस्कारमर्हतीति कृष्णादिमेति विहितमासानांकृष्णपक्षस्यादिमत्रिलवकेपंचमीपर्यंतंव्रतंसत् स्यात्कांचतुर्थीमपिकृष्ण पक्षेत्वाद्यत्रिभागेशुभदंव्रतंसदेनिवासिष्ठोक्तेः नचेति त्रिधाविभक्तदिनस्यत्रयोविभागाः क्रमेणपूर्वाण्हम ध्यान्हापराण्ह संज्ञकाभवंति तत्रापराण्हभागेव्रतंनसत् अपराण्हेचोपनीतःपुनःसंस्कारमर्हतीतिनारदोक्तेः त्रिधाविभज्यदिवसंतत्रादौकर्मदैविकम् द्वितीयेमानुषंकार्यंतृतीयेपैतृकमितिनारदोक्तेः ४० ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथव्रतबंधेसामान्यतोलग्नभंगयोगंग्रमाणिकयाह कवीज्येति ऋणोषष्ठेमृतावष्टमस्थानेचेच्छुक्रगुरुचंद्र लग्नस्वामिनोभवंतिनदाअधमामरणकारकाः अब्जभार्गवौचंद्रशुक्रौव्ययेअधमौ खलाः पापग्रहाः लग्नाष्ट मपंचमस्थानेषुस्थिताः अधमाः ४१ अथसामान्यतोलग्नमनुष्टुभाह व्रतबंधइति शुभग्रहाः अष्टमषष्ठ द्वादशस्थानस्थिताश्चेत्स्युर्नशोभनाः अन्यस्थानेव्रतबंधेशोभनाः खलाः पापाः तृतीयषष्ठैकादशस्थाने षुशोभनाःस्युः गोकर्केति पूर्णःशुक्लपक्षीयोविधुःवृषभस्थः कर्कस्थश्चतनौयदिभवेत्तदासत्शोभनः नान्यथा गुरुःचंद्रेलग्नेभिशस्तःस्यात्क्षयरोगासितेनरे शुक्लपक्षेभवेद्यज्वास्वमेत्तुंगेविशेषतइति क्षयप

कवीज्यचंद्रलग्नपारिपौमृतौव्रतेधमाः व्ययेऽब्जभार्गवौतथातनौमृतौसुते खलाः ४१ व्रतबंधेषष्ठरिःफवर्जिताः शोभनाः शुभाः त्रिषडायेखलाःपू र्णोगोकर्कस्थोविधुस्तनौ ४२ विप्राधीशौभार्गवेज्यौकुजार्कौराजन्यानामो षधीशोविशांच्च शूद्राणांज्ञश्चांत्यजानांशनिःस्याच्छाखेशास्युर्जीवशुक्रारसौ म्याः ४३ स्तूच्चस्थंचंद्रंसदाएवन्यथेधत् वर्धमानोपिवापूर्णश्चंद्रोयदिविलग्नगः निःसंकरोतिव्र तिनंलग्नगः क्षयरोगिणमिति उच्चस्थसंबंधिनोःपक्षयोर्देशाचारतोव्यवस्था स्वगृहगस्तूउत्तममतदूये ४२ अथवर्णेशशाखेशान्शालिन्याह विप्राधीशाविति शुक्रबृहस्पतीब्राह्मणाधीशौ भौमसूर्यौक्षत्रियाणांस्वा मिनौ ओषधीशश्चंद्रोवैश्यानांस्वामी बुधःशूद्राणांस्वामी शनिरंत्यजानांचांडालानांस्वामी ऋग्वेदोथयजुर्वे ८१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दः सामवेदोत्यथर्वणइतिवेदकृगाज्जीवशुक्रारसौम्याःशास्त्रेशाःस्युःऋग्वेदस्यगुरुः यजुषः शुक्रः साम्नोभौमः अथर्वणोबुधस्यधी ५३ वर्णेशशास्त्रेशयोःफलमाह शास्त्रेशेति यःस्वशास्त्राधिपस्तस्यवारस्तनुर्लग्नंच वीर्यबलंगोचरशुकारेणास्वगृहाद्यवस्थितत्वेनवाबलवत्त्वंचव्रतबंधेनीचशस्तम् यथा गुरुः ऋग्वेदिनामीशोऽतोगुरुवारेगुरुलग्नेधनुर्मीनास्थेगुरुबलेचसतिउपनयनमतीवशुभम् एवंसर्वत्र ज्ञेयम् नारदः शास्त्राधिपतिवारश्चशास्त्राधिपबलंशिशोः शास्त्राधिपतिलग्नंचव्रितयंदुर्लभंव्रते शास्त्रेति शास्त्रावेदस्तस्येशःस्वोक्तेःजीवेऽति जीवेभृगौचकाराच्छास्त्रेशेवर्णेशेचाविजितेयुद्धेपराजितेनीचराशिस्थेचसतिव्रतेनानुष्ठितेनसतांवेदशास्त्रविधिनावेदाध्ययनविधिर्नित्यनैमित्तिकश्रौतस्मार्तकर्मानुष्ठाना

शास्त्रेशवारतनुवीर्यमतीवशस्तंशास्त्रेशसूर्यशशिजीवबलेव्रतंसत् जीवेभृगौ रिपुगृहेविजितेचनीचेस्याद्वेदशास्त्रविधिनारहितोव्रतेन ५४

व्यस्तेषांसमाहारद्वंद्वस्तेनरहितोव्रतोस्यात् वसिष्ठः शास्त्रेशगुरुशुक्राणांमौढ्येबाल्येचवार्धके नैवोपनयनंकार्यंवर्णेशेदुर्बलेसतीति तेनभौमबुधयोरस्तेसामगाथर्वणशास्त्रिणोरुपनयनादिनभवतीतितत्त्वम् तत्रनीचाद्यवस्थितत्वेऽपिशास्त्रेशेपरिहारमाह वसिष्ठः शत्रुनीचाधिशत्रुस्थेस्वांशेवास्वोच्चभागगे शास्त्रेशेवागुरौशुक्रेननीचफलमश्नुतइति शुक्रस्यशत्रुराशिस्थत्वंवृषभस्थेर्केकदाचित्संभवति नीचगत्वंशरदिवैश्यसुपनयेदिनिवेशो पनयनंसंभवतीतिध्येयम् ५४ अथजन्ममासादेःप्रतिप्रसवमाह जन्मर्क्षेति जन्मनक्षत्रंजन्ममासेजन्म

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लग्नेआदिशब्देनजन्मनिथौविप्राणांब्राह्मणानांआद्यगर्भेपिअपिशब्दात्द्वितीयगर्भादावपिव्रती बालोव्र
तेयज्ञोपवीतेविद्याधिकःस्यात् क्षत्रादीनांक्षत्रियवैश्यानांपुनरनादिमेद्वितीयगर्भादिबालकेसतिजन्मर्क्षमा
सलग्नादौविद्याधिकोव्रतीस्यात् आद्यगर्भेनुतेषांसर्वथानिषेधएव शौनकः जन्मोदयेजन्मऋक्षतारकासुमा
सेनथाजन्मनिथौचराशौव्रतेनविप्रोल्यपरिश्रुतोपिप्राज्ञोविशेषःपथितःपृथिव्याम् गर्भाष्टमेगर्गपराशरा
द्यैः फलंयदुक्तंव्रतबंधनेतुजन्मोधिकंजन्मसुतारकासुमासेथवाजन्मनिवाडवानाम् विप्रभूदेववाडवाइत्य
भिधानात् प्रथमदशमैकोनविंशनक्षत्राणांग्रहणार्थंजन्मऋक्षतारकास्वित्युक्तम् जन्ममासनिषेधस्तु आ-

जन्मर्क्षमासलग्नादौव्रतेविद्याधिकोव्रती आद्यगर्भेपिविप्राणांक्षत्रादीनामनादिमे ४५ वटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तग

द्यगर्भविषयःक्षत्रियवैश्ययोर्विप्राणांतुवाडवानामितिविशेषोक्तेराद्यगर्भानाद्यगर्भसाधारणंजन्ममासे
उपनयनम् जन्ममासादौशस्तमितिज्ञेयम् ४५ अथगुरुबलमनुब्रुवन् वटुकन्येति वटुरुपनयनाधिका
रीतथाकन्यास्त्रीजातिपत्यंजन्मराशेर्नवपंचमैकादशद्वितीयसप्तमस्थानस्थितोगुरुः श्रेष्ठउत्तमः दशषट्तृ
तीयप्रथमस्थानस्थितोगुरुः पूजयापूजाविधानेनानुष्ठितेनश्रेष्ठः अन्यत्रचतुर्थाष्टमद्वादशस्थानस्थोनिंद्यो
निषिद्ध इत्यर्थः नारदः बालस्यबलहीनोपिशांत्याजीवोबलप्रदः यथोक्तवत्सरेकार्यमनुक्तेनोपनायनम्
सिद्धः उक्तेपिवर्षेनगुरुर्बलीचेन्नशांत्याप्रशस्तंव्रतबंधकर्म अनुक्तवर्षेसबलप्रदोपिनैवैतयोरब्दबलंगरी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यऽति गर्गः व्रतबंधेविवाहेचपतिष्ठायांविशेषतः गोचरेणैवकर्त्तव्यंवेधादिकमकारणमिति वेधस्त्र्ययेपक्षैःत्रिगशैलैःस्वगेनंदैःसखेशरैःरंध्रेरुद्रैर्यहैर्विद्वोगुरुःशुद्धोशुभोन्यथा ग्राह्यास्तुगोचरबलाभावेअष्टकवर्गबलमाहुःराजमार्तंडः अष्टवर्गविशुद्धेषुगुरुशीतांशुभानुषु व्रतोद्वाहौतुकर्त्तव्यौगोचरेणकदाचनेति अन्यच्च अष्टवर्गेणयेशुद्धास्तेशुद्धाःसर्वकर्मसु सूक्ष्माष्टवर्गसंशुद्धि स्तुलाशुद्धिस्तुगोचरे तत्र गुरोरष्टवर्गोवृहज्जातके दिक्स्वाद्याष्टमदायबंधुषुकुजात्स्वात्सप्तमेकेंगिरा सूर्यात्सप्तमनवमेषुधीस्वनवदिग्लाभारिगोभार्गवात् जायायार्थनवात्यजेषुहिमगोर्मदात्रिषट्द्वीव्ययेदिग्धीषट्स्वसुखायपूर्वनवगो

श्रेष्ठोगुरुःस्वषट्थाद्येपूजयान्यत्रनिंदितः ४६ स्वोच्चेस्वभेस्वमैत्रेवास्वांशेवर्गोत्तमेगुरुः

ज्ञात्सस्मरेषूदयात् वराहः पूजाभिलाषंप्रतिनिस्पृहेपिकुर्याद्गुरोश्शुद्धिविवर्जितेपि वरस्यलाभेशुभदंविवाहंवदंतिगर्गच्यवनादिमुख्याः अत्रचतुर्थाष्टमद्वादशस्थानस्थितेनगुरौदिगुणत्रिगुणादिकांपूजांविधायविवाहव्रतबंधादिशुभमितिसंप्रदायविदः ४६ अथगुरुदोषापवादमनुष्टुभाह-स्वोच्चइति गुरुश्चतुर्थादिनिंद्यस्थानस्थितोपिस्वोच्चेकर्केस्वभेधनुर्मीने स्वमैत्रेमेषसिंहवृश्चिके स्वांशेधनुर्मीननवांशे वर्गोत्तमेनवांशेवा यथा दशराशौवृषनवांशेगुरुर्वर्गोत्तमइतिवर्गोत्तमलक्षणम् वर्गोत्तमानवांशाश्चरादिषुप्रथममध्यांनाइति स्थितोगुरुः दृष्टशुभफलदाना अन्येषुएतादृशोगुरुः अतीवशुभः भुजबलः वर्गोत्तमेस्वभवनेभवनेथमैत्रेमित्रांशकेस्वभवनोच्चनवांशकेवा जन्माष्टमे पारिपुरवत्रिचतुर्थगो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिजीवः स्वस्वार्थसाधनेऽवहित्थकरोविवाहे नीचेति नीचंभङ्गः अरिस्थः मिथुनकन्यातुलावृषराशिस्थः शुभोप्यसन् अनिष्टफलदानेत्यर्थः उक्तंच उच्चस्थः स्वगृहेसद्वद्धनगोवाचस्पतिर्नित्यशः पूर्णायुर्विविधार्थसौख्यजनकोजन्माष्टमस्थोपिचेत् नीचस्थोरिगृहेदिवाकरकरच्छायानुगामीसदापीष्टोऽनिष्टफलंददातिनियतंवैधव्यदुःखास्पदम् अत्राष्टमस्थोपिचेदित्यपिशब्देनचाष्टमंलक्षगुणंप्रपूजयेदितिविधानात्पूजामनीहमानेप्युपनयनादिशुभंस्यात्तूद्वादशचतुर्थस्थानस्यतुद्विगुणपूजामिच्छतः तथातृतीयादिस्थानस्यपूजामात्रापेक्षस्यगुरोः शुभफलदातृतास्तीतिकिंवक्तव्यमितिकैमुतिकन्यायसूचनार्थोपिशब्दः नचाष्टमंलक्षगुणंपूजयेदितिशास्त्रगृहस्थितगुर्वभिप्रायम् अस्यापवादोरत्नकोशे गोचराष्टकवर्गाभ्यांयस्यशुद्धिर्न

रिःफाष्टतुर्यगोपीष्टोनीचारिस्थःशुभोप्यसन् ४७ कृष्णेप्रदोषेऽनध्यायेशनौ निष्यपराह्णके लभ्यते तस्योपनयनंकार्यंचैत्रेभानगतेरवौ हरौसिंहांशगेजीवेनीचर्क्षेनीचभागगे मौंजीबंधः शुभःप्रोक्तश्चैत्रेभानगतेरवौ पाठांतरम् जन्मभादष्टगेसिंहेनीचेवाशास्थगेगुरावितिअर्थश्चैत्रेमेषगोर्कोनिषिद्धः तथाचोक्तम् सौम्यायनेव्रतंकार्यंचैत्रेमासिविशेषतः अघोननिंद्योयदिफाल्गुनेस्याद्जरत्तुवैशाखगतोननिंद्यः मधाश्रितौ हावपिवर्जनीयावित्यादिवाचामप्येवंयुक्तिरितिइदंगणेशदैवज्ञैरप्यधायिताभिर्मूलमिवप्रतिभातिमूलवाक्याभावात् ४७ अथव्रतबंधेवर्ज्यानन्नुष्टुभाह कृष्णेइति एषुव्रतबंधोनेष्टः कृष्णेपथमवर्जितागरहितेकृष्णपक्षे प्रदोषेयस्मिन्दिनेसंध्याकालेप्रदोषोभवे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रद्विवसे प्रदोषलक्षणमर्कतर्केत्याद्ययेवक्ष्यति अनध्यायेवक्ष्यमाणे निशीति अंगवंगकलिंगेषु सौराष्ट्र मगधेषुच तीर्थयात्रांविनागच्छन्पुनःसंस्कारमर्हतीतिपुनःसंस्कारप्राप्तौनिमित्तानंतरमेवनैमित्तिकमिति न्यायेनयदिरात्रिसद्भावस्तदोपनयनंमाभूदितिरात्रिपदोक्तिःतथाप्राक्संध्याप्रातःसंध्यातस्यांगर्जितेमेघ शब्दे वसिष्ठः अनेहिपूर्वसंध्यायांवारिदोयदिगर्जति त्रद्विनंस्यादनध्यायंव्रतंतत्रविवर्जयेदिति अपरार्कः क्षीणेचंद्रेष्टमेशुक्रेनिरंशेचैवभास्करे कर्तव्यंनोपनयनंनानध्यायेगलग्रहे रांशोःप्रथमभागस्तेनिरंशःसू र्यउच्यते तथागलग्रहे गलग्रहानाह गुरुः त्रयोदश्यादिचत्वारिसप्तम्यादिदिनत्रयम् चतुर्थीचैकतःमो-

प्राक्संध्यागर्जितेनेष्टेव्रतबंधोगलग्रहे ४८ क्रूरोजडोभवेत्पापःपटुःषट्कर्मकृत्पटुः यथार्थभाकृतंथासूस्वैरिव्याघ्रंशेतनौक्रमात् ४९ विद्यानिरतःशुभराशिलवेपापांशलवेहिदरिद्रतरः चंद्रेस्वलवेबहुदुःखयुतःकर्णादितिभेधनवान्स्वलवे

५०

क्षाअष्टावेतेगलग्नहा दैवज्ञमनोहरे प्रदोषेनिशयनध्यायेमंदेक्षणेगलग्रहे मधुविनोपनीतस्तूपुनःसं स्कारमर्हति गलग्रहेप्रदोषेचस्वल्पायुरुपजायतेइतिच ४८ अथांशफलमनुष्टुभाह क्रूरोजडइति षट्कर्मा णि यजनंयाजनंचैवतथादानप्रतिग्रहौ अध्यापनंचाध्ययनंषट्कर्माधर्मभाकृद्विजइति अन्यत्स्पष्टम् ४९ अथचंद्रनवांशफलंस्वनवांशेसापवादंतज्ज्ञौलगुरुवदमोटनकमितिलक्षणलक्षितेनमोटनकछंदसाह वि द्यानिरतइति यस्मिन्कस्मिनराशौचंद्रोयदिशुभग्रहराशिनवांशेचेत्तदाग्रतोविद्यानिरतोभवेत् यदिपा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पद्यहराशिनवांशेचंद्रस्तदादरिद्रतः धनरहितः यदिस्वलवेकर्कांशेस्यात्तदाबहुदुःखसहितोभवेत् अथस्वांशगतचंद्रस्यापवादमाह कर्णेनि कर्णेश्रवणेअदितौपुनर्वसौनक्षत्रेउपनयनेस्वांशेचंद्रःस्यात्त दाधनवान्भवेत् नाम श्रवणादितिनक्षत्रेकर्कांशस्थेनिशाकरेनदाव्रतीवेदशास्त्रधनधान्यसमृद्धि मान् केंद्रस्थानांफलमनुष्टुभाह राजसेवीति केंद्रेसूर्यादिखेचरैःसत्येकंसहितेक्रमादिदंफलंज्ञेय-म् अन्यत्स्पष्टम् अत्रलग्नस्थंचंद्रंकेंद्रस्थंशनिंचविनासर्वेग्रहाःशुभाइत्यवगम्यते मुनिभिस्तुकेंद्रेपा पानिषिद्धाइत्युक्तम् नारदःस्फूर्जितंकेंद्रगेभानौव्रतिनोवंशनाशनम् कुजितंकेंद्रगेभौमेशिष्याचा-

राजसेवीवैश्यवृत्तिःशास्त्रवृत्तिश्चपाठकः प्राज्ञोर्थवान्मूंच्छसेवीकेंद्रेसूर्यादि खेचरैः शुक्रेजीवेतथाचंद्रेसूर्यभौमार्किसंयुते निर्गुणःक्रूरचेष्टःस्यान्नि र्घृणःसद्युतेपटुः विधौसितांशगेसितेत्रिकोणगेतनौगुरौ र्यविनाशनम् अत्रस्व

गृहोच्चाद्यवस्थिताःपापाःकेंद्रस्थाःशुभफलदाताः अन्यथानेतिविरुद्धार्थवचनयोर्विषयविवेकः अथान्यदाह शुक्रेति शुक्रेजीवेचंद्रेसत्येकंसूर्यसंयुतेव्रतीनिर्गुणःस्यात् भौमसंयुतेक्रूरचेष्टःक्रू राहिंसनशीलश्चेष्टायस्यतादृशःस्यात् तथाशनिसंयुतेनिर्घृणोनिर्लज्जोनिर्दयोवास्यात् तथातस्मिन्भे वजीवेशुक्रेचंद्रेवासत्येकंसद्दिर्युतेपटुःसर्वविद्यानिपुणःस्यात् अथान्यत्समाधिकत्वाह निशौसि तांशगेति चंद्रेशुक्रांशगेशुक्रेत्रिकोणगेगुरौतनौलग्नेचसतिव्रतीबहुः समस्तांश्चतुरोवेदान्वेत्ती-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिसमस्तवेदवित् एवंयमांशगेशनिनवांशसंस्थितेचंद्रेसतिलग्नेगुरौचसतिसिंहेत्रिकोणगेसतिअतिनिर्गुणः स्यात् महेश्वरः जीवेलग्नमधिष्ठितेभृगुसुतेधर्मात्मजस्थेविधौशुक्रांशेखिलवेदविद्विभूतस्यांशेकृतप्रोधमरति गतः लग्नंसर्वगुणोपेतंलभ्यतेन्यदिनेनसत् दोषाल्पत्वंगुणाधिक्यंबहुसंमतमिष्यते दोषदुष्टोहिकालोयः सगृहीतुंनशक्यतेदोषावेधादयोमहादोषास्तत्यर्थः ५३ अथानध्यायान्जननचपलार्थमाह शुचिशुक्लेतिअनध्यायाः आषाढशुक्लदशमीज्येष्ठशुक्लद्वितीया पौषशुक्लैकादशी माघशुक्लद्वादशी एताअनध्यायाः भूतश्चतुर्दशीतद्वद्विनियंचतुर्दशीपूर्णिमाप्रतिपदः कृष्णपक्षेअमावास्यातन्मध्येअष्टमीचतयोःसमाहा-

समस्तवेदवितृतीयमांशगेतिनिर्गुणः ५३ शुचिशुक्लपौषतपसांदिगाश्चि रुद्रार्कसंख्यसितनिथयः र: तथासंक्रमणंसूर्यस्यनिरयनंसंक्रांतिदिनम् चकारान्मन्वाद्यास्ति थीमधावित्यादिनोक्ताः तत्राषाढशुक्लदशमीपौषशुद्धैकादशीचमन्वादीज्येष्ठशुक्लद्वितीयामाघशुद्धद्वादशीचसोपपदे यद्यपिचैत्रशुद्धतृतीयामन्वादिर्वैशाखशुद्धतृतीयायुगादिस्तथापितेउभेतृतीयेनानध्यायौ तथैवफाल्गुनकृष्णद्वितीयाचातुर्मास्यद्वितीयापिनानध्यायः नासांप्राशस्त्याभिधानात् तथाचवसिष्ठः याचैत्रवैशाखसितातृतीयामाघस्यसासम्यथफाल्गुनस्य कृष्णोद्वितीयोपनयेप्रशस्तामोक्ताभरद्वाजवसिष्ठमुख्यैरिति अन्यासांयुगादिमन्वादीनांव्रतबंधेअप्रसंगादेवअग्रहणम् केचिदाचार्याः याचैत्रवैशाखेतिवचनंलिखित्वापिस्वेच्छयानांगीकुर्वंति तत्रशपथमात्रमेवप्रमाणंनपश्यामस्तत्त्वम् तन्मतेतृतीयेअनध्यायत्वेनज्ञेये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्रतेष्वितिपदमावश्यकत्वद्योतनार्थम् गौतमः पक्षद्वयेचतुर्दश्यामष्टमीद्वितयेतथा पक्षादावपिपक्षांतेऽप्य
ह्यनाधीयतेनरैः फलंच अष्टमीहत्पाध्यायंशिष्यंहंतिचतुर्दशी अमावास्योभयंहंतिमतिपत्पाठनाशि
नी मनुः चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु अष्टकासुचसंक्रांतौशयनेबोधनेहरेः अनध्यायंप्रकु
र्वीतनतथासोपपदासुचेति चातुर्मास्यद्वितीयागर्गेणोक्ता आषाढफाल्गुनोर्जेषुयाद्वितीयाविधुक्षये चातु
र्मास्यद्वितीयास्तावदंतिमहर्षयः मन्वादयोयुगादयश्चपूर्वमुक्तासिताज्येष्ठेद्वितीयाच आश्विनेदशमीसि
ता चतुर्थीद्वादशीमाघेएताःसोपपदाःस्मृताः नैमित्तिकाअनध्यायासुस्मृत्यर्थसारे निर्घातभूकंपोल्कानि
पतनादिसर्वाद्युतेष्वकालिकानध्यायाः अग्न्युत्पातेवाःकालदृष्टौवा आर्द्रादिज्येष्ठांतान्नक्षत्रादन्यत्राकालदृ

भूतादित्रितयाष्टमीसंक्रमणंचव्रतेष्वनध्यायाः ५४

ष्टिः सायंसंध्यागर्जनेउदयांतोन
ध्यायः अर्धरात्रादूर्ध्वगर्जनेअर्धरात्रेवा आकालिकोनध्यायः प्रातःसंध्यागर्जनेत्वहोरात्रमितिकालमर्यादोक्त
स्तेत्याकालम् अकालेभवआकालिकः यस्मिन्कालेनिमित्तमुत्पन्नंतदारभ्यद्वितीयदिनेतत्कालपर्यंतमित्यर्थः
स्मृतिरत्नावल्याम् अनूराधर्क्षमारभ्यषोडशर्क्षेषुभास्करः यावच्चरतिचैतावदकालमुनयोविदुरिति कालदृ
ष्टौतुतत्कालमकालेतुत्रिरात्रकम् अनिमित्ताथवादृष्टिर्नाधीयीतदिनत्रयम् आपस्तंबः उल्कायामग्न्युत्पा
तेचसर्वासांविधानामाकालिकमिति मनुः चौरैरुपप्लुतग्रामेसंग्रामेचाग्निकारिते आकालिकमनध्यायंवि
द्यात्सर्वाद्युतेषुचेति अद्युतेषुरुधिरादिदृष्टिषु वसिष्ठः उपलरुधिरप्रपातेत्यहमिति स्मृत्यंतरे विद्युद्गर्जित

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृष्टीनांसंनिपातोयदाभवेत्-कालदृष्टौतुतत्कालमकालेतुत्रिरात्रकमित्यादिकानैमित्तिकाअनध्यायायदा-
मेखलाबंधात्प्रागुत्पन्नास्तदाव्रतबंधोनकार्यएव यदातुमेखलाबंधादनंतरंब्रह्मोदनपाकात्प्रागुत्पन्नास्त
दाजातोपिनप्रवर्त्तते ॥ अथप्रदोषलक्षणमनुष्टुभाह अर्केति तदग्निमैरर्कादितिथिषुप्रदोषःस्यात् यथा
ह्यदृश्यामर्धरात्रात्प्राक्त्रयोदशीप्रवृत्तौप्रदोषः षष्ठ्यांसार्धप्रहरमध्येसप्तमीप्रवृत्तिस्तदाप्रदोषः तथातृतीया
यांप्रहरमध्येचतुर्थीप्रवेशेप्रदोषः अत्रद्वितीयप्रहरस्यचरमघटिकातृतीयप्रहरस्याद्यावाघटिकेत्येवंघटि
काद्वयमितः कालःस्थूलोरात्र्यर्धशब्दोवाच्यः तेनसमांशवत्त्वाभावादर्धनपुंसकमितिएकदेशिसमासश्चा

अर्कतर्कत्रितिथिषुप्रदोषःस्यात्तदग्निमैः रात्र्यर्धसार्धप्रहरयाममध्येस्थितैः
क्रमात् ॥५५॥ प्राक्ब्रह्मोदनपाकाद्व्रतबंधानंतरंयदिचेत् उत्पातानध्ययनोत्प
त्तावपिशांतिपूर्वकंतत्स्यात् ५६ वः ५५ अथव्रतबंधानंतरंसायंकालेबल्वांब्रह्मोद
नाख्यःसंस्कारोभिहितस्तत्रार्थयाविशेषमाह प्राक्ब्रह्मोदनेति स्पष्टार्थम् उक्तंचनृसिंहप्रसादे ब्रह्मो
दनविधेः पूर्वंप्रदोषेगर्जितंभवेत् तदाविघ्नकरंज्ञेयं बटोरध्ययनस्यतत् तस्यशांतिप्रकारंतुवक्ष्येशास्त्रा
नुसारतः स्वस्तिवाचनपूर्वंतुहवनंकारयेद्बुधः प्रधानंपायसंसाज्यंद्रव्यंशांतियजोभवेत् सूक्तंबृहस्पते-
र्विद्वान्पठेद्विद्यासमृद्धये गायत्रीयुंजतोमंत्रः प्रायश्चित्ततुसर्पिषा धेनुंसवत्सकांदद्यादाचार्यायपयस्वि-
नीम् शिलांहोमविधेःपश्चात्स्थापयेत्तत्रसंसदि ब्राह्मणान्भोजयेत्पश्चात्ततोब्रह्मोदनंचरेदिति ॥५६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवेदविशेषेणनक्षत्राणिवसंततिलकयाह वेदेति मृगाश्लेषार्द्राहस्तचित्रास्वातीमूलपूर्वात्रयेषुऋग्वेदाध्यायिनाम् रेवतीहस्तानुराधामृगपुष्यश्रोहिण्युत्तरात्रयेषुयजुर्वेदाध्यायिनाम् अश्विनीधनिष्ठापुष्यहस्तोत्तरात्रयार्द्राश्रवणेषुसामवेदाध्यायिनांमृगरेवतीपुष्याश्विनीहस्तानुराधाधनिष्ठापुनर्वसुषुअथर्ववेदाध्यायिनाम् पूर्वश्लोकानुवृत्ततत्पदपरामृष्टमुपनयनंसन्शुभमित्यर्थः उक्तंच मूलेहस्तत्रयेसार्पशैवेपूर्वात्रयेतथा ऋग्वेदाध्यायिनांकार्यमेखलाबंधनंबुधैः पुष्येपुनर्वसौपौष्णेहस्तेमैत्रेशशांकभेषुचेषुचप्रशस्तंस्याद्यजुषांमौंजिबंधनम् पुष्यवासवहस्ताश्विशिवकर्णोत्तरात्रयम् प्रशस्तंमेखलाबंधेवटूनांसामगायिनाम् मृगमैत्राश्विनीहस्तोरेवत्यदितिवासवम् अथर्वपाठिनांशस्तोभगणोयंव्रतार्पणे ८७

वेदक्रमाच्छशिशिवाहिकरत्रिमूलपूर्वासुपौष्णकरमैत्रमृगादितीज्ये धौवेषुचाश्विवसुपुष्यकरोत्तरेशकर्णेमृगांत्यलघुमैत्रधनादितोसत् ८७ नांदीश्राद्धोत्तरंमातुःपुष्येलग्नांतरेनहि अथान्यंविशेषमनुष्टुभाह नांदीश्राद्धेति नांदीश्राद्धंदृष्ट्वाश्राद्धंतत्कृत्यानंतरंयदिसंस्कार्यमातुःपुष्येरजोदर्शनेजातेसतिलग्नांतरेचनसतितदावश्यकर्त्तव्यलेधर्मशास्त्रोक्तांशांतिंविधायचौलंयज्ञोपवीतंविवाहश्चकार्यः अन्यथासमीचीनलग्नांतरसत्वेसतिचौलादिनसन्दुष्टफलमित्यर्थः मेधातिथिः चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि पत्नीरजस्वलायस्यशायस्तस्यनशोभनम् मृत्यंतरे शास्त्रमप्युदयंश्राद्धंपुत्रसंस्कारकर्मणि पत्नीरजस्वलाजातानकुर्यात्तस्मिन्नदे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति तस्मिंतेतिनांदीश्राद्धकर्तुरुपलक्षणम् अतोज्येष्ठभ्रात्रादिनाकरिष्यमाणनांदीश्राद्धात्पूर्वंकृतत्पत्नीरज-स्वलाचेत्तदानांदीश्राद्धनिषेधान्मंगलंनकार्यमेव संस्कार्यमातरिरजस्वलायांतुसन्निहितलग्नांतरासंभवे शांतिंकृत्वातदीनीमेवतन्मंगलंकार्यमू आरब्धत्वान्नस्मृत्युक्तदोषः अपशकुननिरासार्थंशांतिःकार्या उक्तं च वधूवरान्यतरस्यजननीचेद्रजस्वला संपूर्णेतुबलेप्राप्तेकुर्यात्तत्पाणिपीडनमिति बलेग्रहबलेऽवश्य-सति अलाभेसकलमुहूर्तस्यरजोदोषेत्युपस्थिते श्रियंसंपूज्यविधिवत्ततोमंगलमाचरेत् हैमींमाषमितांपद्मां श्रीसूक्तविधिनार्चयेत् भक्तघृतंपायसंहुत्वाभिषिच्यहितमाचरेत् यदातुकृतेपिमंगलेमंडपोद्वासनात्पूर्वमा

शांत्याद्यौलंघ्रतंपाणिग्रहःकार्योन्यथानसत् ५८ विचैत्रव्रतमासादौविभौ
मास्तेविभूमिजे छुरिकाबंधनंशस्त्रंनृपाणांप्राग्विवाहतः ५९

तरिरजस्वलायांशांत्यादिकंकार्यमेव मंगलस्यासमाप्तत्वात् यदातुज्येष्ठभ्रात्रादिना कृतान्नांदीश्राद्धात्पूर्वं तत्पत्नीरजस्वलाचेत्तदानकोपिदोषः अन्योपिविशेषस्तत्रैव उपवासेनशुध्यंतिनार्यः सद्योरजस्वलाःस्मृता किन्योविवाहादौदेशभंगेषुवायदीति ५८ अथछुरिकाबंधनमुहूर्तमलुब्धाहविचैत्रेति चैत्रवर्जितेषूपन यनमासेषुमाघफाल्गुनवैशाखज्येष्ठेषित्यर्थः आदिशब्देनव्रतबंधोक्ततिथिनक्षत्रजन्मलग्नादीनांग्रहणंवा कीदृशेव्रतमासादौविभौमास्तेभौमास्तरहितेगुरुशुक्रास्तादिसामान्यनिषेधादेवसिद्धम् तथाविभूमि-जेभौमवाररहितेसूर्यादिवारेनृपाणांक्षत्रियाणांविवाहतः पूर्वंछुरिकायाअल्पशस्त्रविशेषस्यबंधनंकृत्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिनिशेषः तच्छस्तंहितम् विवाहात्पागित्युक्तेः अवधित्वनिश्चयात्समावर्तनानंतरंकार्यम् अन्यथोप

नयनानंतरंकार्यमित्येवब्रूयात् ५९ अथकेशांतसमावर्त्तनमुहूर्त्तावनुष्टुभाह केशांतमिति षोडशेवर्षे-

चौलोक्तदिवसेशुभे मुहूर्तेगोदानापरपर्यायंकेशांतसंज्ञंकर्मशुभंस्यात् गावः केशादीयंतेस्वंड्यंतेयस्मिंस्तद्गो

दानम् गोदानंषोडशेवर्षेइत्येतद्ब्राह्मणविषयम् क्षत्रियविशोर्द्वाविंशेचतुर्विंशेचविरोधात् अथामनुः केशां

तंषोडशेवर्षेब्राह्मणस्यविधीयते राजन्यबंधोर्द्वाविंशेवैश्यस्यद्व्यधिकेततइति आश्वलायनः प्रथमंस्या

न्महानाम्नीद्वितीयंचमहाव्रतम् तृतीयंस्यादुपनिषद्गोदानाख्यंततःपरम् अत्रजाताधिकाराद्गोदानंज

केशांतंषोडशेवर्षेचौलोक्तदिवसेशुभम् व्रतोक्तदिवसादौहिसमावर्तनमिष्य

ते ६० इतिमुहूर्तचिंतामणौसंस्कारप्रकरणंपंचमंसमाप्तम् ५ ७

न्माद्यब्देतुषोडशेइतिवृत्तिकारवचनात् त्रयोदशेमहानाम्यादिभवंति त्रयोदशेमहानाम्नी चतुर्दशेमह्य

व्रतम् पंचदशेउपनिषद्गृतंषोडशेगोदानमिति एवंक्षत्रियविशोरपिउक्तगोदानकालात्पाकूवर्षचतुष्टय

क्रमेणमहानाम्यादिभवंति व्रतोक्तेति हिनिश्चयेनयज्ञोपवीतोक्तदिवसेआदिशब्देनवारनक्षत्रतिथिलग्नां

शकेषुसमावर्तनकर्मेष्यते अत्रकश्यपेनचैत्रोवर्जितः चैत्रमासविवर्जेषुमाघादिषुचपंचसु एतच्चगोदाना- ८७

नंतरंविवाहात्पाक्कार्यम् कुर्यात्समावर्तनंकर्मपश्चाद्गोदानकं पाणिनिपीडनात्पागितिवसिष्ठोक्तेः कश्चिद्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीयवर्षेतन्निषेधउक्तः वधूप्रवेशंव्रतमोक्षणंचपुंसांपुनर्दारपरिग्रहंच नाब्देद्वितीयेविदधीतधीमान्वदंतिगर्गाग्निवसिष्ठमुख्याइतितन्निर्मूलत्वादुपेक्ष्यम् परिकरोऽलंकारउत्सर्गापवादरूपःशेषंस्पष्टम् ६० इतिदैवज्ञानंतसूनुदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंतामणिटीकायांप्रभिनामशरायांसंस्कारप्रकरणंपंचमंसमाप्तम् ५ ७ ५ ७ अथविवाहप्रकरणंव्याख्यायते तत्रानाश्रमीनतिष्ठेत्येतादिवचनात्समावर्तनानंतरंसर्वाश्रमाणामुपकारकत्वाद्गृहस्थाश्रमएवमुख्यःसचशीलरूप्याधीनःशीलंसलग्नाधीनमित्यतोलग्नशुद्धिकथनंवसंततिलकयाप्रतिजानीते भार्येति शुभं भर्तुर्देरनुकूलंशीलंस्वभावोयस्याःसात्रिवर्गस्यधर्मार्थकामरूपस्यकरणमतिशयेनसाधनम् तस्याःसुल

अथविवाहप्रकरणप्रारंभः

भार्यात्रिवर्गकरणंशुभशीलयुक्ताशीलंशुभंभवतिलग्नवशेनतस्याः तस्माद्विवाहसमयःपरिचिंत्यतेहितन्निघ्नतामुपगताःसकृतशीलधर्माः १

मूलवशेनशीलंशुभंभवति यतःसकृतशीलधर्माःतन्निघ्नतांविवाहाधीनताम् अधीनोनिघ्नआयत्तइत्यमरोक्तेःउपगताःप्राप्ताः अतोहेतोर्निश्चयेनविवाहसमयःपरिचिंत्यतेविचार्यतइति ननुजन्मकालीनग्रहजनितंशुभाशुभंदुरतिक्रममितिविवाहलग्नानर्थक्यमितिचेन्न ज्योतिषस्मृत्यावेदितशुभसमयारब्धविधिजन्यापूर्वजनितशुभफलेनजन्मांतरीयदुर्दृष्टध्वंसोभवतीत्येवमर्थतयासार्थक्यात् अतएवसत्याचार्यः शुभक्षणक्रियारंभजनिताःपूर्वसंभवाः संपदःसर्वलोकानांज्योतिस्तत्रप्रयोजनमि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति सर्वत्रज्ञेयम् १ अथप्रश्नलग्नाद्विवाहयोगद्वयंस्वाधरयाह अथशब्दोमंगलार्थः आदौसंपूज्येति आ
दौगणकंज्योतिर्विदंरत्नादिभिः मणिवस्त्रफलादिभिःसंपूज्य ततःप्रष्टाकन्यायाश्चहृद्गंगणकंवेदयेत् गति
बुद्ध्यादिनाऽणौकर्तुः कर्मत्वम् ईदृशंगणकंस्वस्थचित्तंअव्याकुलांतःकरणम् स्वस्थेचित्तेबुद्धयः संभ
वतीत्यर्थः उत्सलः प्रष्टामणिकनकयुतैः फलकुसुमैराशिचक्रमभ्यर्च्यपृच्छेद्यथाभिलषितंभक्त्याविनयान्वि
तःप्रश्नम् दिगिति यदिप्रश्नलग्नाद्दशमैकादशतृतीयसप्तमपंचमानामन्यतमेस्थानेस्थितश्चंद्रोजीवेन-
गुरुणादृष्टःसद्यःशीघ्रंपरिणयनकरःस्यात् वाअथवागोतुलेति वृषतुलाकर्कीणामन्यतमंप्रश्नलग्नं-

आदौसंपूज्यरत्नादिभिरथगणकंवेदयेत्स्वस्थचित्तंकन्योद्वाहंदिगीशानल
द्वयविशिखेप्रश्नलग्नाद्यदींदु- दृष्टोजीवेनसद्यः परिणयनकरोगोतुलाक
र्कटाख्यंवास्यात्स्वप्रस्यलग्नंशुभरवचरयुतालोकितंतद्विदध्यात् २ विषम
भांशगतौशशिभार्गवौतनुगृहबलिनौयदिपश्यतः रचयतोवरलाभमिमौ
यदायुगलभांशगतौयुवतिप्रदौ ३ स्यात्तच्चशुभग्रहैर्युतमवलोकितंवाभवेत्तत्परिणयनं

विदध्यात् २ अथान्ययोगद्वयंद्युतविलंबितेनाह विषमभांशगताविति स्पष्टार्थम् ३ अथप्रश्नलग्ना
द्वैधव्ययोगत्रयंशालिन्याह षष्ठाष्टस्थइति चंद्रः प्रश्नलग्नात्षष्ठाष्टमस्थस्तदाकन्याष्टसंवत्सरेणविवाह ८८
वर्षाद्दंडाभर्तृनाशिकास्यात् अथवालग्नेयः कश्चित्क्रूरग्रहःस्यात्ततः सप्तमेकुजोभवेत्तदाष्टवर्षमध्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रंडास्यात् केचित्सप्तमेपिपापएवंपश्चमेनिषेधंति कश्यपः एकोलग्नगतःपापोअन्यःसप्तमराशिगः आ
सप्तमाब्दान्मरणंपुरुषस्यनसंशयइति तेषांमतेसप्तमेवारवलःस्यादितिपाठः अथवामूलेलग्नेचंद्रः तस्य
सप्तमेभौमोभवेत्तदाऽष्टवर्षेणरंडास्यात् ४ अथपश्चलग्नाकुलटामृतवत्सायोगंदोषकृतेनाह प्र
श्नतनोरिति स्पष्टार्थः कश्यपःस्वनीचगः शत्रुदृष्टः पापः पंचमगोयदा मृतपुत्रांकरोत्येवकुलटांवानसंशय
इति ५ अथविवाहभंगयोगंपुंधिनाघ्नमाह यदीति सितातिरिक्तपक्षेकृष्णपक्षेयदिचंद्रः समराशिपु रुष

षष्ठाष्टस्थःपश्चलग्नाद्यदींदुर्लग्नेक्रूरःसप्तमेवाकुजःस्यात् मूर्त्तार्विंदुः
सप्तमेतस्यभौमोरंडासास्यादष्टसंवत्सरेण ४ प्रश्नतनोर्यदिपापनभोगः
पंचमगोरिपुदृष्टशरीरः नीचगतश्चनदारवलुकन्यासाकुलटात्वथवामृ
तवत्सा ५ यदिभवतिसितातिरिक्तपक्षेतनुगृहतः समराशिगःशशांकः
अशुभखचरवीक्षितोरिरंध्रेभवतिविवाहविनाशकारकोयम् ६

कर्कादिषुगतःसन्तनुगृहतः पश्चलग्नादरिरंध्रेषष्ठेऽष्टमेवास्थानेस्थितः पापयुहावलोकितोभवतितदायं-
योगोविवाहस्यविनाशकारकोभवति ६ एवंपश्चलग्नाद्वैधव्यादियोगमभिधायेदानींजन्मलग्नादावपिवा
लवैधव्ययोगविचारमनिदिशन्नुत्तरिहारंशार्दूलविक्रीडितेनाह जन्मोत्थमिति पश्चलग्नाद्यथाविधवायो-
गोविचारितस्तथाजन्मोत्थंजन्मलग्नोद्भवंचबालविधवायोगंजानकशास्त्रात् बाल्येविधवाभौमेपतिसंस्थ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षादिवाकरेतस्थे सौरेपापैर्दृष्टेकन्यैवजरांसमुपयाति तथा लग्नेव्ययेचपातालेजामित्रेचाष्टमेकुजे क
न्याभर्तृविनाशायभर्त्राकन्याविनाशदृष्टयायुक्तैर्बालवैधव्ययोगैर्बालविधवायोगंविचार्यवक्ष्यमाणंव्रतंवै
धव्ययोगपरिहारकरंकारयेदित्यन्वयः तन्नवैधव्ययोगपरिहाराभावः योयोभावः स्वामिदृष्टेयुतोवासौम्यै
र्वास्यात्तस्यतस्यास्तिरद्विरिनिसप्तमस्थानंस्वस्वामिसौम्येक्षितंचेद्भवतितदाभर्तृसुखंभवतीति अन्येस्त्री
णांमहत्यरिष्टयोगेभर्तुश्चस्वल्पेऽरिष्टयोगेनत्परिहारमाहुः अथवापरिहार्यैवैधव्ययोगेप्रतिकारमाह विधा
येति रहइतिवक्ष्यमाणमिहापियोज्यम् पित्रादिःकृतयाकन्ययाकृत्वारहएकांतेहिनिश्चयेनसाविच्याव्रतंवि
धायपश्चादिमांकन्यांविरजाविनेवरायदद्यात् तदुक्तंव्रतखंडेसाविच्यादिव्रतादीनिभक्त्याकुर्वीतियाःस्त्रि
यःसौभाग्यंचसुतत्वंचभवेत्तासांसुसंततिरिति व्रतग्रहणप्रकारस्तएवावगंतव्यः पिप्पलव्रतंज्ञानभास्क
रे बलवद्विधवायोगेबाल्येसतिमृगादृशाम् पितारहसिकुर्वीततद्वंशास्त्रसंमतम् कृदिनेशुभनक्षत्रेचं
द्रताराबलान्विते अवैधव्यकरैर्योगैर्लग्नेग्रहबलान्विते व्रतारंभंप्रकुर्वीतबालवैधव्यनाशकम् स्नानांनि
त्यसनांकन्यांपितृगृहाद्बहिः नीत्वाश्वत्थंशमीस्थानेयद्वाबदरिकाश्रमे आलवालंप्रकुर्वीतविपुलंमृदुक
र्षितम् कुम्भार्याचार्यनिर्दिष्टंकृतसंकल्पमादरात् करकांबुघपूर्णेनसिंचनंप्रतिवासरम् चैत्रेवाश्विनमासे
चतृतीयाऽसितपक्षतः यावत्कृष्णतृतीयान्यामासमेकंयथाविधि ब्राह्मणानांतथास्त्रीणांपूजनंचसमारभे
त् तदाशिषासुयात्कन्यासौभाग्यंचसुखान्वितम् प्रतिमांपार्वतीनाम्नीं वैणवेभाजनेन्यसेत् चंदनाक्षतदू
र्वाद्यैर्बिल्वपत्रैर्यथाविधि उपचारैर्यथाभक्त्यानैवेद्यैःप्रतिवासरम् एवंव्रतप्रभावेनबालवैधव्यनिष्कृतिःभा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतेकन्यकानांचततःपाणिग्रहक्रिया इत्यश्वत्थवनम् अन्यमपिवैधव्ययोगपरिहारमाह वारहइत्या दि अथवारहएकांते अच्युतमूर्तिर्विष्णुप्रतिमा पिप्पलघटौप्रसिद्धौ एषांमध्येऽन्यतरेणसहसलग्ने वक्ष्यमाणदोषरहितेसौभाग्यगुणान्वितेचविवाहलग्नेविवाहंकारयित्वापश्चात्तांकन्यांस्फुटंलोकप्रसिद्धं यथाभवतितथाचिरजीविनेवरायदद्यात् दत्वापित्रादिकः तदुक्तंमार्कंडेयेन बालवैधव्ययोगेपिकुंभद्रु प्रतिमादिभिः कृत्वालग्नंरहःपश्चात्कन्योद्वाह्येतिचापरेइति कुंभइतिमंथन्याअपिउपलक्षणम् द्रुवृक्षो श्वत्थएव प्रतिमाविष्णोःसौवर्णीकरशिरोवयवादिसहिता नशालिग्रामादिरूपा तत्रकुंभविवाहः सूर्या रुणसंवादे विवाहात्पूर्वकालेतुचंद्रतारबलेशुभे विवाहोक्तेचमंथन्याकुंभेनसहोद्वहेत् पितासंक ल्यबालत्वंचविवाहविधिपूर्वकम् सूत्रेणावेष्टयेत्साध्वादृशंतंतुविधानतः कुंभमालंकृतंदेहंतयोरेकांतमंदिरे ततःकुंभंविनिःसार्यप्रभाज्यसलिलाशये ततोभिषेचनंकुर्यात्पंचपल्लववारिभिः तत्सर्ववस्त्रपूजाद्यंब्राह्म णायनिवेद्यच कन्यालंकारवस्त्राद्यंब्राह्मणायनिवेदयेत् प्रार्थना वरुणांगस्वरूपत्वंजीवनानांसमाश्रय पतिंजीवयकन्यायाश्चिरंपुत्रान्सुरत्नंवरम् देहिविष्णुवरानंदंकन्यांपालयदुःखतः इति कुंभविवाहः अ श्वत्थविवाहोपितत्रैव द्विजान्गुरून्सुहृन्नारींमंगलोच्चारणैःसमम् आहूयोद्वाहकालेचरम्यभूमौचमंड पे गत्वाप्रणम्यगौरींचगणनाथंचभूरुहम् भवानींचैवमंथानींपितामंत्रमुदीरयेत् उद्वाहयिष्येविधिव दश्वत्थेनमनोहरम् कन्यांसौभाग्यसौख्यार्थहेतवेहंद्विजोत्तमाः नमस्तेविष्णुरूपायजगदानंदहेतवे पितृ देवमनुष्याणामाश्रयायनमोनमः वनानांपतयेतुभ्यंविष्णुरूपायभूरुहे नमोनिखिलपापौघनाशनायन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मोनम॰ पूर्वजन्मकृतंपापंबालवैधव्यकारकम्॰ नाशायासुस्वरंदेहिकन्यायाममभूरुद्र इत्यश्वत्थविवाहेसं कल्पप्रार्थने विवाहस्तुकुंभविवाहवद्विधेयः एवमेवसौवर्ण्यांविष्णुप्रतिमयासहविवाहंविधायप्रतिमांब्रा ह्मणायदद्यात् दानप्रकारस्तत्रैव शुभेमासेसितेपक्षेसानुकूलग्रहेदिने ब्राह्मणंसाधुमामंत्र्यसंपूज्यविधि धार्हणैः तस्मैदद्याद्विधानेनविष्णोर्मूर्तिंचतुर्भुजाम् सुद्रुवर्णसुवर्णेनवित्तशाठ्यंविवर्जयेत् अथवापुनर्निर्मितांरुचिरां शंखगदाचक्राब्जसंयुताम् दधानांवाससीपीतेकुमुदोत्पलमालिनीम् सदक्षिणांचतांदद्यान्मंत्रमेनमुदीर येत् यन्मयापूर्वजनुषिभ्रंत्यापतिसमागमम् विषोपविषशस्त्राद्यैर्हतोवातिविरक्तया प्राप्यमाणमहाघोरंय

नन्मोत्थंचविलोक्यबालविधवायोगंविधायव्रतंसावित्र्याउतपैप्पलंहिसकृतया दद्यादिमांवारहः

शसौख्यधनापहम् वैधव्याद्यतिदुःखौघनाशायसुखलब्धये बहुसौभा ग्यलब्ध्यैचमहाविष्णोरिमांतनुम् सौवर्णीनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज अनघालहमस्मीतिविचारं प्रवदेदिति एवमस्त्विति विप्राशीर्गृहीत्वास्वगृहंविशेत् ततोवैवाहिकंतातोविधिंकुर्यान्मृगीदृशाम् इतिप्रति मादानविधिः एवंघटादिभिःसहविवाहंएकांतेविधायपश्चाद्वादित्रत्रयघोषपुरःसरंपित्रादिःकन्यामायुष्मते वरायदद्यात् अत्रपुनर्विवाहात्पुनर्भूत्वदोषोनभवति यतोविश्वानखंडे स्वर्णांचुपिप्पलानांचप्रतिमाविष्णुरू पिणीतयासहविवाहेचपुनर्भूत्वंनजायतइत्यक्तत्वात् नकारानूघटस्यापि लक्ष्मीरूपासदाकन्याहरिरू

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पंसदाजलम् हरेर्दत्तंचयद्दानंदातुःपापहरंसदा लक्ष्मीनारायणप्रीत्यैयादत्ताकन्यकाबुधैः तारयेत्सकलं
दातुः कुलंपूर्वापरंसदा चंद्रवन्त्संबुगंधर्वशिवसोमस्मराद्मे पतयःकन्यकानांचबाल्यात्संतिसदैवते तद्दुद्वाहविधिर्यत्नात्कृतोनोजनयेदघम् यथालिप्तकलंदेवानांपूजनायवै अर्हंभवतिसर्वत्र तथाकन्या
नृणांभवेत् पुतावपिसोमादिभिः सहविवाहोऽभिहितः सोमः प्रथमोविविदेगंधर्वोविविदउत्तरः तृतीयोऽग्निष्टेपतिस्तुरीयस्तेमनुष्यजइति अतोदैवतभोग्यानांकन्यानांपुरुषविवाहेनदोषः पुनर्भवः तथात्रापि अतएव मंथन्याभास्करोयत्नात्कृतवान्दुहितुर्विधिं रेणुकोपिस्वकन्यायास्तरूद्वाहंचकारसइतिविधानखंडे

सच्छग्नेऽच्युतमूर्तिंपिप्पलघटैःकृत्वाविवाहंस्फुटंदद्यात्तांचिरजीविनेत्रनभवेद्दोषःपुनर्भूभवः ॥ प्रश्नलग्नक्षणेयादृशापत्ययुक्स्वेच्छयाकामिनीतत्रवेदाव्रजेत् कन्यकावासकृतोवातदापंडितैस्तादृशापत्यमस्याविनिर्दिश्यते ॥

भिधानात् अतएव पित्रामात्रातथाभ्रात्रादत्तायातोयधारया विप्राग्निसाक्षंदांसाक्ष्यं कृत्वासोद्वाहिता भवेदितिकात्यायनादिपरिभाषितत्वादेकदाकन्यापुरुषविवाहंनिर्वर्त्यपुनर्द्वितीयपुरुषविवाहेजातेसापुनर्भूरेवेत्यलम् ॥ अथान्यत्स्वाग्विण्याह प्रश्नलग्नक्षणेति तत्रज्योतिर्वित्समीपे यादृशापत्ययुक्यादृशापत्यमेवविवृणोतिकन्यकासकृतादिशेषंस्पष्टम् ॥ अथसामान्यतोनिमित्तवशेनशकुनाशकुनप्रश्नंस्वाग्विण्याह शंखभेरीति विपंचीवीणाच एतेषांरवैः प्रश्नलग्नेशुतैर्मंगलंजायते उपलक्षणत्वान्मनो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ल्हादितुरगगजछत्रादिसान्निध्येपिशुभम् अथाशुभयोगाः वैपरीत्यमिति वायसः काकः स्वरोगर्दभः श्वाकुक्कुरः सृगालःप्रसिद्धः यदिप्रश्नलग्नक्षणेचवायसादिर्नादंशब्दंकरोतितदावैपरीत्यमशुभंलक्षयेत् उपलक्षणादुलूकोष्ट्रमहिषनादोप्यशुभः अन्येशुभयोगाः शौनकादिभ्योज्ञेयाः विवाहवृंदावनेउपशुतिरप्युक्ता आरोप्याक्षतपूरितेगणपतिंप्रस्थादिपात्रेशनैः संमार्जन्यधिवेष्टितेयुवतयस्तिस्रःसकन्यानिशि निर्यातारजकादिवेश्मसकरेरुखातमभ्यर्चितंयांवाचंशृणुयुस्तदर्थसदृशीलोकेकिलोपश्रुतिः तन्मंत्र

शंखभेरीविपंचीरवैर्मंगलंजायतेवैपरीत्यंतदालक्षयेत् वायसोवाखरः श्वासृगालोपिवाप्रश्नलग्नक्षणेरौतिनादंयदि ॥ विश्वस्वातीवैष्णवपूर्वात्रयमैत्रैर्वस्वाग्नेयैर्वाकरपीडोचितऋक्षैः वस्त्रालंकारादिसमेतैः फलपुष्पैः संतोष्यादौस्यादनुकन्यावरणंहि १० धरणीदेवोथवाकन्यकासोदरः शुभदिनेगीतवाद्यादिभिःसंयुतः श्र उपश्रुतिमहादेविचांडालगृहवासिनि यथार्थंब्रूहिदेविस्वंशकराज्यप्रवर्धिनीति २ अथकन्यावरणमुहूर्तमत्तमयूरछंदसाह विश्वस्वातीति उत्तराषाढादित्रिऋक्षैरथवा विवाहनक्षत्रैरुपलक्षितेकालेवस्त्रालंकारादिशब्देनस्वाद्यादिमधुरवस्तुभिःसहितैः फलपुष्पैः आदौकन्यांतोष्यतोषयित्वाऽनुपश्चात्कन्यावरणंहिनिश्चयेनस्यात् कन्यावरयोर्लक्षणानिसामुद्रिकाध्यायादवगंतव्यानि १० अथवरवरणमुहूर्तमाह धरणिदेवइति धरणिदेवोब्राह्मणः पुरोहितादिः चंडेश्वरः पूर्वान्वितयामे ९१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यमुत्तराश्रितयेनथा रोहिणीनत्रवरणेभगणःशस्यतेसदा उपवीतंफलंपुष्पंवामांसिविविधानिच देयं
वरायवरणेकन्याभ्रात्राद्विजेनवेति ॥ अथकन्याविवाहकालंग्रहशुद्धिंचवसंतमालिकाछंदसाह गुरु
शुद्धिवशेनेति कन्यकानांविवाहःषडब्दकोपरिष्टात् षड्वर्शाऽतिक्रमानंतरंसमवर्षेषुयुग्मवर्षेषुसत्संवत्स
रबटुकन्याजन्मराशेरित्याद्युक्तंगुरुशुद्धौसत्यांविवाहःशुभः अर्थात्मुरुषाणांविषमवर्षेषुगोचरप्रकरणो
क्तरविशुद्धौसत्यांविवाहःशुभः राजमार्तंडः तृतीयःषष्ठगश्चैवदशमैकादशस्थितः रविःशुद्धोनिगदि-
तोवरस्यैवकरग्रहे जन्मस्थेचद्वितीयस्थेपंचमेसप्तमेपिवा नवमेभास्करेपूजांकुर्यात्पाणिग्रहोत्सवे चतु-

वरक्षतिंवस्त्रयज्ञोपवीतादिनाध्रुवयुतैर्वन्हिपूर्वात्रयैराचरेत् ॥ गुरुशुद्धिवशो
नकन्यकानांसमवर्षेषुषडब्दकोपरिष्टात् र्थेवाष्टमेचैवद्वादशेभास्करेस्थिते वरःपंचत्व
माप्नोतिकृतेपाणिग्रहोत्सवेइति यतउक्तम् षडब्दमध्येनोद्वाह्याकन्यावर्षद्वयंयतः सोमोभुंक्तेथगंधर्व-
स्ततःपश्चाद्धुताशनइति व्यासः अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी दशवर्षाभवेत्कन्याभनऊर्ध्वंरज
स्वला वात्स्यः द्वादशेवृषलीस्मृतेतिगौरींददद्वह्मलोकंसावित्रंरोहिणींददत् कन्यांददत्स्वर्गलोकमतःप
रमसङ्गतिम् प्राप्नोतीतिशेषः अत्र युग्मेब्देजन्मतःस्त्रीणांशुभदंपाणिपीडनमित्युक्तत्वात् पुनर्नववर्षा
यारोहिण्याअयुग्मवर्षत्वाद्विवाहनिषेधःप्राप्नोतीत्यत्रव्यवस्थामाह श्रीपतिः मासत्रयादूर्ध्वमयुग्मवर्षेषु
युग्मेतुमासत्रयमेवयावत् विवाहशुद्धिंप्रवदंतिसंतोवात्स्यादयोगर्गवराहमुख्याः इत्युक्तोनवमवर्षस्यायु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गम्लदनिषेधोऽष्टवर्षानंतरंमासत्रयपर्यंतमेकनदनंतरंतुसप्तरवेनविवाहइत्यविरोधः एवंचषष्टवर्षानंतरं
जन्मतोविषमवर्षीयामासत्रयानंतरंनवमासाःशुभासमवर्षेआद्यमासत्रयंत्रयंचेतिगर्भतोयुग्मवर्षइति
निष्कृष्टोऽर्कउभयोरिति स्त्रीपुंसयोश्चंद्रविशुद्धितोविवाहःशुभउभयोश्चंद्रबलमावश्यकमित्यर्थः
द्विर्गोचरेणाभिहिता गोचरबलाभावेऽष्टकवर्गादिबलंग्राह्यमित्याहनारदः गोचरंवेधजंचाष्टवर्गज-
रूपजंबलम् यथोत्तरंबलाधिक्यंस्थूलंगोचरमार्गजमितिव्यासः कन्यायाग्रहशुद्धिश्चदशवर्षावधिस्मृ
ता दशवर्षव्यतिक्रांताकन्याशुद्धिविवर्जिता तस्यास्तारेंदुलग्नानांशुद्धौपाणिग्रहोमतइति अथवि

शविशुद्धिवशाच्छुभोनराणामुभयोश्चंद्रविशुद्धितोविवाहः मिथुनकुंभ मृगालितृषाजगेमिथुनगोपिरवौत्रिलवेशुचौ

हितान्मासान्दुतविलंबितेनाह मिथुनेति अलिर्वृश्चिकः एतद्राशिगतेरवौसतितच्चापिमिथुनस्थितेर
वौसतिशुक्रेआषाढस्यत्रिलवेनृतीयांशेआषाढशुद्धप्रतिपदमारभ्यदशमीपर्यंतंकरपीडनंविवाहोभवति
अर्थादितरराशिगेसूर्येआषाढशुद्धदशम्यनंतरंमिथुनराशिगेर्केपिहरिशयनेचविवाहोनस्यात् अलीति
एतद्राशिगेसूर्येकार्तिकपौषमधुष्वपिकरपीडनंस्यात् दृश्चिकेकार्तिकेमकरेपौषेमेषेचैत्रेपीत्यर्थः इ-
दंतुसौरमासग्रहणंमतम् श्रीधरोपि पौषेपिकुर्यान्मकरस्थितेर्केचैत्रेभवेन्मेषगतेयदास्यात् प्रशस्तमा
षाढऋतंविवाहंवदंतिगर्गामिथुनस्थितेऽर्केइति येतुचांद्रमासानेवाहुर्नारदादयस्तेमाघफाल्गुनवैशाख

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्येष्ठशसाः शुभप्रदा मध्यमः कार्तिकोमार्गशीर्षोवैनिंदिताः परेइति तेषांमतेफाल्गुनोविहित इतितत्र मीनसंक्रमणसद्भावेपिशुभः वैत्रोनिषिद्ध इतिमेषसंक्रमणसद्भावेप्यशुभः तदुक्तंवृद्धावने मृषोननिंद्यो यदि फाल्गुनेस्यादजस्तुवैशाखगतोननिंद्यो मध्याश्रितौद्वावपिवर्जनीयाविति अजस्तुवैशाखगतोननिंद्यइतिनिर्मूलमेव वस्तुतस्तुवसिष्ठेनउभयमासविधानात्सौरचांद्रमासैक्येउत्तमोविवाहः एकतरपक्षाश्रयेणमध्यमः दिनाधिपेमेषवृषालिकुंभनृयुग्मनक्रान्त्यघटर्क्षसंस्थेमाघद्वयेमाधवशुक्रयोश्चमुख्यो थवाकार्तिकसौम्ययोश्चेति अथप्रसंगात्सौरचांद्रमासविधायकवचनानिनेषांव्यवस्थाचलिख्यते तत्रऋष्यशृंगः विवाहव्रतयज्ञेषुसौरमानंप्रशस्यते गार्ग्योपि विवाहोत्सवयज्ञेषुसौरमानंप्रशस्यते वृद्धगर्गः

अलिमृगाजगतेकरपीडनंभवतिकार्तिकपौषमधुष्वपि ॥१

विवाहादौस्मृतःसौरोयज्ञादौसावनःस्मृतः इत्येवमादीनिसौरमासविधायकवचनानि अथचांद्रमासविधायकानि तथाचवसिष्ठः उद्वाहयज्ञोपनयप्रतिष्ठातिथिव्रतक्षौरमहोत्सवाद्यम् पर्वक्रियावास्तुगृहप्रवेशाः सर्वेहिचांद्रेणविगृह्यतेनेतत् नारदः यात्रोद्वाहव्रतक्षौरतिथिवर्षेशनिर्णयम् पर्ववास्तूपवासादिकृच्छ्रंचांद्रेणगृह्यते इत्यादीनितत्रैकतरमासावलंबनेऽपरवैय्यर्थ्यस्यादित्यत्रसमाधीयते यत्रसौरचांद्रमानाभ्यांमासशुद्धिरुपलभ्यतेसउत्तमोविवाहः एकतरपक्षावलंबनेमध्यमइत्युक्तंप्राक् मध्यमपक्षावलंबनंचअवश्यदेयाकन्याविषयंवेदितव्यम् अपरेपुनर्देशविवाह्योर्नथातपनीकृष्णायोर्मध्येचांद्रोमासः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रशस्यते अन्येषुसर्वदेशेषुसौरोव्रतविवाहयोः तथा विंध्याद्रेर्दक्षिणेभागेचांद्रोमासः प्रशस्यते उदग्भा गेतुविंध्यस्यसौरंमानंविधीयते अन्येषुसर्वदेशेषुमिश्रंमानंप्रकल्पयेदिति १३ अथमासप्रसंगाज्जन्म मासादिप्रयुक्तनिषेधविधीन्वयोऽनयाह आद्येति यस्मिन्चांद्रेमासेजन्मसजन्ममासः जन्मतिथिमार भ्यत्रिंशत्तिथ्यात्मकोमासोजन्ममासः यत्रमासेजन्मसजन्ममासइत्युच्यते पक्षद्वयमध्येप्रथमप्रकारेण प्रतिपादितम् जन्मनक्षत्रंजन्मतिथिश्च समाहारद्वंद्वः जन्ममुहूर्तोपि तत्राद्यगर्भयोः सुतकन्ययोर्द्वयोः क रग्रहोविवाहोनोचितः निषिद्धः वसिष्ठः स्वजन्ममासर्क्षतिथिक्षणेषुवैनाशिकाद्यृक्षगणेषुचैवम् नोद्वा हमात्माभ्युदयाभिकांक्षीनैवाद्यगर्भहितयंकदाचित् एतदपवादोपि जातंद्विदूषतेवसिष्ठइत्यादिपूर्व

आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौकरग्रहः नोचितोथविबुधैः प्रशस्यतेचेद्वितीयजनुषोःसुतप्रदः १४ ज्येष्ठद्वंद्वमध्यमंसंप्रदिष्टंत्रिज्ये ष्ठंचेन्नैवयुक्तंकदापि

मुक्तम् अथेति द्वितीयजनुषोरनाद्यगर्भयोश्चेद्विवाहस्तर्हिसुतप्रदो विबुधैः पंडितैः शस्यते अत्राद्यगर्भराहित्यंसर्वथाविवक्षितम् अन्यथाचेदनाद्यजनुषोरिति पठितव्यम् नक्षत्रंच्यवनः जन्मर्क्षेजन्ममासेवातारायामथजन्मनि जन्मलग्नेभवेद्योदापुत्राद्यापतिवल्लभेति एतच्चा नाद्यगर्भविषयम् आद्यगर्भेसाक्षान्निषेधात् १५ ज्येष्ठमासेविशेषंचालिन्याह ज्येष्ठद्वंद्वमिति पुत्रोज्ये ष्ठः कन्याज्येष्ठा मासोपिज्येष्ठः इत्येतत्त्रिज्येष्ठंत्रिज्येष्ठंयत्कदापिनैवयुक्तंनप्रशस्तम् ज्येष्ठमासेज्येष्ठयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्वधूवरयोर्विवाहोनैवकार्यइत्यर्थः यदात्वेकतरज्येष्ठलेज्येष्ठमासोभवतिनदामध्यमंसंपदिष्टम् अगानिवि
षयकमित्यर्थः एकंज्येष्ठमन्यद्वयमज्येष्ठंतदाशुभमेव वराहः द्वौज्येष्ठौमध्यमौप्रोक्तावेकज्येष्ठः शुभावह
ज्येष्ठत्रयंनकुर्वीतविवाहेसर्वसंमतम् अस्यापवादमाहकेचिदितिसत्यावश्यकलेसूर्यवन्हिगंशुक्रास्थंत्या
स्काज्येष्ठमासेपिज्येष्ठवरस्यकन्यकायाः विवाहः शुभइतिकेचिदूचुः एतच्चज्येष्ठापत्यस्यनज्येष्ठेइतिसामा
न्यतोमंगलकृत्यनिषेधेपिद्रष्टव्यम् भरद्वाजः ज्येष्ठेज्येष्ठस्यकुर्वीतभास्करेचानलस्थिते मोत्सवादीनिका
र्याणिदिनानिदशवर्जयेदिति अत्रज्येष्ठपुत्रदुहित्रोर्ज्येष्ठमासवत्मार्गशीर्षेपिमंगलकृत्यनिषेधमाह भर
द्वाजः मार्गशीर्षेतथाज्येष्ठेक्षौरंपरिणयंव्रतम् आद्यगर्भदुहित्रोस्तुयत्नेनपरिवर्जयेदिति स्वयमपिज्येष्ठा

केचित्सूर्यवन्हिगंप्रोत्यचाहुर्नैवान्योन्यंज्येष्ठयोःस्याद्विवाहः ॥ सुतपरिण
यात्षण्मासांतःसुताकरपीडनंनचनिजकुलेतद्वद्भामंडनादपिमुंडनम्

पत्यस्यनज्येष्ठेकेश्चिन्मार्गेपिनेष्यतइत्युक्तंमाकूकेचिद्ब्रुवंतिशिष्टाचाराभावादितिसूचयितुम् नैवान्योन्यमि
ति ज्येष्ठायाःकन्यायाःज्येष्ठपुत्रेणसहविवाहोनैवस्यात् मर्गः ज्येष्ठायाःकन्यकायाश्चज्येष्ठपुत्रस्यवैमिथः
विवाहोनैवकर्त्तव्योयदिस्यान्निधनंनयोरिति ॥ अथान्यंविशेषंहरिणीछंदसाह सुतपरिणयादिति नि
जकुलेइतिदेहलीदीपन्यायेनात्रापिसंबध्यते निजकुलेस्ववंशेसुतस्यपुत्रस्यपरिणयात्षण्मासांतःषण्मास
मध्येसुताकरपीडनंकन्याविवाहोनस्यात् नारदः पुत्रोद्वाहात्सरंपुत्रीविवाहोनत्रुत्रयेनयोर्वनमुद्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हान्मंडनादपिमुंडनमिति नहदिति निजकुलेत्रिपुरुषमध्येपुत्रस्यकन्यायावामंडनाद्विवाहान्मुंडनंचौलोप
नयनसमावर्तनादिवातद्वत्षण्मासमध्येनकार्यमूनाब्दैः कुलेत्रुत्रयादर्वागमंडनान्नतुमुंडनम् पवे-
शान्निर्गमंचैवनकुर्यान्मंडनत्रयमिति अत्रविशेषः शार्ङ्गधरे व्रतंसमावर्तनकंसचौलंकेशांतमेतानिवदंति
तज्ज्ञाः क्षौरंपुरस्कृत्यभवंतियस्माच्चत्वारितस्मादिहमुंडनानि चूडासीमंतकेशांतविवाहोपनयान्बुधा गुरु
मंगलमित्याहुस्तदन्यल्लघुमंगलम् ज्येष्ठंकृत्वातुषण्मासंनकुर्याल्लघुमंगलम् कुर्वंतिमुनयःकेचिदन्ये
स्मिन्नपिवत्सरे लघुवामंगलंकार्यंकार्यंनैमित्तिकंहितु पुत्रोद्वाहःपवेशाख्यः कन्योद्वाहस्तुनिर्गमः मुंडनं

नचसहजयोर्देयेभ्रात्रोःसहोदरकन्यकेनसहजस्तोद्वाहोर्धाब्देशुभेनपितृ क्रिया १६

चौलमित्यत्रतोद्वाहोतुमंगलम् चौलंमुंडनमेवोक्तंवर्जयेद्वरणात्परम् मौंजीतूप
यनःकार्यायतोमौंजीनमुंडनम् अग्निन्नेवत्सरेपिस्यात्तद्वस्तत्रभेदयेत् अग्नेर्देदिवसस्थापिनकुर्यादेक
मंडपेइति एषांसमूलत्वेदेशकालसंकटेसतिबोद्व्यम् उक्तंच एकोदरयोर्द्वयोरेकदिनोद्वहनेभवेन्ना
शनद्यंतरएवैकेदिनेप्याहुःसंकटेचशुभम् नपतिर्पिंडलग्नंसंप्राप्तेसंकटेमहति एकोदरसंभवयोरेकाहे
भिन्नमंडपेकालेइति नचेतिसहजयोःसोदरयोर्भ्रात्रोःसहोदरकन्यकेनदेयेनोद्वाहेभारद्वः नचैकजन्म
नोःपुंसोरेकजन्येतुकन्यकेमूनंकदाचिदुद्वाह्येनैकदामुंडनद्वयमिति अत्रचकारोनुक्तसमुच्चयार्थस्तेनै

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कस्मैचरायसहोदरकन्याद्वयमपिनदेयम् नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेतिवसिष्ठोक्तेर्नसहजसूतो
र्द्वयोरर्धइति सूतश्चसूतौसूताचसूतेसरूपाणामेकशेषइत्येकशेषः सूताचसुतौपुमान्स्त्रियेत्येकशेष
सूतौचसूताचसूतेचसूतौवेतिसूता इतिसूतेनैकशेषेणद्वंद्वेपुमान्स्त्रियेत्येकशेषसहजाश्चतेसूताश्चते
सूताश्चेतिकर्मधारयस्तेषांसोदरभ्रातृणांविवाहः अब्दार्धेषण्मासमध्येनकार्यइत्यर्थः द्वाहइत्युपलक्षणम् त
तश्चैकमातृजयोःपुत्रयोःकन्ययोर्वासमानसंस्कारोनकार्यइत्यर्थः वृद्धमनुः एकमातृजयोरेकवत्सरेपुरुष
स्त्रियोर्नसमानांक्रियांकुर्यान्मातृभेदेविधीयतेसमानक्रियामुंडनादिकाभिन्नमातृजयोःसमानक्रियायां
नदोषः नारदः समानापिक्रियाःकार्यामातृभेदेतथैवच विवाहोदुहितुःकार्योनविवाहश्चतुर्दिनभिन्नि
न्नमातुर्दुहितुर्विवाहःसमानक्रियायांयदिदिनचतुष्टयमध्येनकार्यइत्यर्थः वसिष्ठेनविशेषउक्तः एकोदर
प्रसूतानांनात्रकार्यत्रयंभवेत्भिन्नोदरप्रसूतानांनेतिशातातपोब्रवीत्इति चौलोपनयनविवाहरूपंका
र्यत्रयम् आदौचौलंततोमौंजीविवाहश्चशुभप्रदमातृभेदेबुधैरुक्तोमातुरैक्येनकर्हिचित् एवंसतिभि
न्नोदरमंगलमावश्यकलेगृहभेदात्एकगृहेआचार्यभेदाद्वाकार्यम् वसिष्ठः द्विशोभनंलेकगृहेनचेष्टंशु
भंनुपश्यान्नवभिर्दिनैरतआवश्यकंशोभनमुत्सवोवाद्वारेणवाचार्यविभेदतोवेति समलजातयोरस्त्रयम
पिनिषेधोनास्ति एकस्मिन्वत्सरेचैववासरेमंडपेतथा कर्त्तव्यंमंगलंस्त्रीभ्रात्रोर्यमलजातयोस्त्रयाणि
ज्येष्ठानुक्रमेणकार्यंज्येष्ठानुक्रमस्तुगर्भोत्पत्तिक्रमेणतथाचभागवतेनृतीयस्कंधेहिरण्याक्षहिरण्यक
शिपूत्पत्तौप्रजापतिर्नामतयोरकार्षीद्यःशाक्स्वदेहाद्यमयोरजायतांवैहिरण्यकशिपुंविदुःप्रजायतेहि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रण्याक्षमसूतसायनइति तथावैद्यके आत्रेयसंहितायाम् यदाविशेद्द्विधाभूतंबीजंपुष्पेपरिक्षरत् त
दाभवेद्द्विधागर्भः सूतिर्वेशविपर्ययात् तेनप्रथमंजातःकनिष्ठः अनंतरंजातोज्येष्ठः अतएव यमयोश्चैवग
र्भेतुजन्मतोज्येष्ठतामनुरितिमनुनागर्भेजन्मतइत्युक्तम् जन्मज्येष्ठेनचाह्वानंसब्रह्मण्यास्मृतमितितु
मनुवचनम् एककोशजातयमलविषयम् तथाचदेवलः यस्यजातस्ययमयोः पश्यतिप्रथमंमुखम् संता-
नः पितरश्चैवतस्मिन्ज्येष्ठ्यंप्रतिष्ठितमिति संतानोवंशः यदातुपुंसोबलातिशयाद्रेतसोद्विधापातः तदा
कोशद्वयेयमलोत्पत्तिः यदातुगर्भवायुनाएकस्मिन्नेवकोशेरेतसोद्वैधीभावस्तदाएककोशेएवयुगपद्यम
लजनोति नतुस्त्रीणांविवाहउपनयनस्थानइतिस्मृतेः कन्याविवाहस्यपुत्रोपनयनस्यचसमानलमितिचे

वध्वावरस्यापिकुलेत्रिपूरुषेनाशंव्रजेत्कश्चननिश्चयोत्तरम् तूनअष्टवर्षब्राह्मणमुपन
येदितिवचनेब्राह्मणग्रहणात्स्त्रीशूद्राणांव्रतबंधनिषेधाच्च यतुस्त्रीणांविवाहउपनयनस्थानइत्युक्तं
तत्तासांद्विजत्वसिध्यर्थंअतःस्त्रीविवाहोविवाहएवनतूपनयनंतस्मात्सोदरकन्यापुत्रयोर्विवाहोपनयनयोः
समानसंस्काराभावात्षण्मासमध्येपितेकार्यं शमेइति शमेविवाहादिमंगलकृत्येपितृक्रियाश्राद्धक्रियान
कार्यमंगलेनाप्यमंगलमितिनारदोक्तेः अमंगलंश्राद्धम् समाप्तेएवमंगलेकार्यमूनमध्येरत्यर्थः अथ
प्रतिकूलनिर्णयमिंद्रवंशयाह वध्वावरस्येति निश्चयोत्तरंवाग्दानानंतरंवध्वाः कन्यायाः वरस्यवाकुलेवंशे
त्रिपूरुषेपुरुषत्रयमध्येकश्चनसपिंडोनाशंप्राप्नुयात्तत्रमासोत्तरम् मरणादिनादारभ्यत्रिंशद्दिनंप्रतिकू

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लमृ॰ शांत्यास्वनुष्ठितयाविवाहः सुखेनइष्यते इदंपित्रादिभिन्नविषयम् मांड॰ अन्येषांतुसपिं
डानामाशौचंमासंसंमितम् नदंतेशांतिकंकृत्वाततोलग्नंविधीयतेपित्रादिमरणेतुविशेषः वरवध्वोः
पितामातापितृव्यश्वसहोदरः एतेषांप्रतिकूलंचेन्महाविघ्नकरंभवेत् पितामातामहश्चैवमातावापिपिता
महीपितृव्यःस्वसृतोभ्राताभगिनीवाविवाहिता अभिरेवविपन्नेश्चप्रतिकूलंबुधैःस्मृतम् आगदानानंत
रंयत्रकुलयोः कस्यचिन्मृतिः तदासंवत्सरादूर्ध्वंविवाहः शुभदोभवेत् पितुराशौचमब्दंस्यात्तदर्धंमातुरे
वहि मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः अन्यच्च प्रतिकूलंसपिंडस्यमासमेकंविवर्जयेत् विवाहस्तु
तयोःपश्चात्तयोरेवविधीयते दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये औदायामपिकन्यायांप्रतिकूलंनदु

मासोत्तरंतत्रविवाहइष्यतेशांत्याथवासूतकनिर्गमेपरैः

ष्यति दीर्घरोगाभिभूतस्यदूरदेशास्थितस्यच तदासवर्तिनश्चैवप्रतिकूलंनविद्यते संकटेसमनुप्राप्ते
याज्ञवल्क्येनयोगिना शांतिरुक्तागणेशस्यकृत्वातांशुभमाचरेत् अथावश्यकत्वेपवादमाह अथवेति
आशौचनिर्गमेशांत्यास्वनुष्ठितयाविवाहः परैराचार्यैरिष्यते ज्योतिःप्रकाशेप्रतिकूलेपिकर्तव्योविवाहो
मासमंतरंशांतिंविधायगांदत्वावाग्दानादिचरेद्बुधः अथान्यदपिविशेषांनरसुपजात्याह चूडाव्र
तमिति अपिशब्दात्समावर्तनादि चौलसुपनयनंसमावर्तनंचविवाहानंतरंपुरुषत्रयमध्य एवनेष्टम् त
थाव्रताद्युपनयनात् चूडाचपुरुषत्रयपर्यंतंनेष्टा तथावध्वाः स्नुषायाः प्रवेशात्स्नायाविनिर्गमोपिपुरुषत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यपर्यंतमेवनेष्टः मेथातिथिः पुरुषत्रयपर्यंतंप्रतिकूलंगोत्रिणाम् प्रवेशान्निर्गमस्तद्वत् तथामुंडनमंडनेइ
ति तस्मान्मूलपुरुषस्यचतुर्थत्वेनायंदोषः सचायंदोषः पुरुषत्रयेपिषण्मासपर्यंतमेव अतएवषण्मासत
इतिमासषट्कानंतरंपरतोपिविवाहादिः शक्यएतन्मूलवाक्यंकुलेकुतुत्रयादर्वागित्यादिनाप्रागुक्तम् अत्रा
पवादउच्यते वेति अथवाअब्दभेदात्वर्षभेदात्षण्मासमध्येपिशक्यथामाघेविवाहोवैशाखेचौलंय
ज्ञोपवीतंवाभवतीत्यर्थः संहितासाक्षात्कल्याम् फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने भेदादब्दस्यकुर्वीत
नर्तुत्रयविलंघनमिति अथमूलाद्यनिष्टनक्षत्रोत्पन्नयोर्वधूवरयोः श्वसुरादिपीडकत्वंसंततिलक्षेणा

चूडाव्रतंचापिविवाहतोव्रताच्चूडाचनेष्टापुरुषत्रयांतरे वधूप्रवेशाच्चसुना
विनिर्गमःषण्मासतोवाब्दविभेदतःशक्यः श्वश्रूविनाशमहिजौसुत
रांविधत्तः कन्यासुतौनिर्ऋतिजौश्वशुरंहतश्च ज्येष्ठाप्रजातनयास्वधवाग्रजं
चशक्राग्निजाभवतिदेवरनाशकर्त्री ९९ श्वश्रूविनाशमिति अहिर्जौआश्लेषानक्ष
त्रोत्पन्नौकन्यापुत्रौश्वश्वाःसाक्षाद्भरस्यमातुः कन्यायावासाक्षान्मातुःनाशंविधत्तः कुरुतः तथानिर्ऋति
जौमूलोत्पन्नौश्वशुरंहतः नाशयतः जनकंजननींहंतिभर्तुर्मूलाहिधिष्ण्यजेतिवसिष्ठोक्तेः कुलन्यायत्वा
त्कन्यायामपिसाक्षान्मातरम् ज्येष्ठेति ज्येष्ठानक्षत्रोत्पन्ना कन्यास्वधवाग्रजंभर्तुर्ज्येष्ठभ्रातरंहंति शक्रा
ग्निजाविशाखोत्पन्नादेवरस्यभर्तृकनिष्ठभ्रातुर्नाशकर्त्री उक्तंच ऐंद्रीपत्यग्रजंहंतिदेवरंतुद्विदैवजेति ९९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतदपवादमनुवृत्ताह द्वीशाद्येति स्पष्टार्थम् नहंतिदेवरंकन्यातुलाभिथाहिदैवजा तदंतपादजात्याज्यादु
ष्टाऋश्चिकपुच्छयदिनिन्द्यनरदोक्तेः मूलेति मूलचतुर्थचरणोत्पन्नोकन्यासतोश्वसुरसौख्यदो श्लेषा
प्रथमचरणोत्पन्नोचश्वश्रूनाशकृतः कृतावानियतंश्वसुरंहंतिमूलजौ तदंत्यपादजौनैवतथाश्लेषाद्यपा
दजाविति पुंस्त्वमविवक्षितं योनिर्निबंधेमौंजीबंधनानंतरंमूलाश्लेषादोषोनास्तीत्युक्तम् मूलव्याडोद्वो-
दोषः पुंसांमौंज्यांविनश्यतीतिभूपालवल्लभवचनादिति तत्र मूलाश्लेषादोषः पूर्वविषयः पर्यवस्यति तथा
ज्येष्ठोत्पन्नः पुमान्पत्न्यायजमग्रजंवाहंति विशाखोत्पन्नश्चपत्न्यनुजमनुजांहंति उक्तंचकलत्रपटले पत्न्य

द्वीशाद्यपादत्रयजा कन्यादेवरसौख्यदा मूलांत्यपादसार्पाद्यपादजातेतयोः
शत्रौ वर्णोवश्यंतथातारायोनिश्चयग्रहमैत्रकम् गणमैत्रंभकूटंचनाडी
चैतेगुणाधिकाः द्विजाझषालिकर्कटास्तुतोनृपाविशोंध्रिजाः वरस्यव
र्णतोधिकावधूर्नशस्यतेबुधैः

ग्रजामग्रजंवाहंतिज्येष्ठर्क्षजःपुमान्तथाभार्यानुजांचैवानुजंहंतिहिदैवजइत्यत्र तत्परिहारश्चतत्रैव मूलांत्यपादजौज्येष्ठौतथाश्लेषाद्यपादजौद्वीशांत्यपाद
जौदुष्टौतद्वज्येष्ठांत्यपादजाविति ज्येष्ठाविशाखोत्पन्नपुंसः दोषतत्परिहारनिरूपणग्रंथेष्वदृष्टत्वादुपेक्ष्य
म् अथाष्टकूटानांनामान्यनुवृत्ताह वर्णइति तत्रवर्णादिमैत्र्यांसत्यांगुणाधिकाएकादिगुणाधिकान्पुः
यथावर्णमैत्र्यामेकोगुणः वश्येहाविंशादि तत्रादौवर्णकूटंप्रमाणिकयन्नाह द्विजाइति मीनकर्कटवृश्चिका

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विजा ब्राह्मणाः ततोनंतरमन्येमेषसिंहधनुराशयोनृपाःक्षत्रियाः वृषकन्यामकराविशोवैश्याःमिथुनतु
लाकुंभाः अंघ्रिजाः शूद्राः तत्रवरवधूराश्योर्वर्णोज्ञात्वावरस्यवर्णतोब्राह्मणादिकावधूरधिकाज्येष्ठवर्णाबु
धैर्नशस्यतेकिंतुसमाहीनावाशस्यतइत्यर्थः एकोगुणःसदृग्वर्णेतथावर्णोत्तमेवरेहीनवर्णेवरेशून्यंकेप्या
हुःसदृशेदलमिति अथवश्यकूटमिंद्रवज्रयाह हित्वेति नरराशयोमिथुनकन्यातुलाएषांमेषादयः
सर्वेपिसिंहंत्यक्त्वावश्याःननुजलचराणांसहानवस्थानात्कथंवश्यत्वंतत्राह जलजास्तुभक्ष्याइति एषांनर
राशीनांजलजाःमकरकुंभमीनकर्कास्तुभक्ष्याः किंपुनर्वश्याइतिसूचयितंतुशब्दःसिंहस्यालिंगद्यंकिंविना

हित्वामृगेंद्रंनरराशिवश्याःसर्वेतथैषांजलजाश्चभक्ष्याः सर्वेपिसिंहस्यव
शेविनालिंगेयंनराणांव्यवहारतोऽन्यत् कन्यर्क्षादूरभंयावत्कन्याभं
वरभादपि गणयेन्नवह्रच्छेषेत्रीष्वद्रिभमसत्स्मृतम्

सर्ववश्याः अन्यदनुक्तंचतुष्पदानांजलचराणांवश्यावश्यंनराणांमनुष्याणांव्यवहारतोज्ञेयम् वश्यकूट-
वश्यभक्ष्यवैरभेदेनत्रिधा तत्रवरराशेःस्त्रीराशौवश्येसतिगुणद्वयम् भक्ष्येएकोगुणः वैरेगुणाभावः
अथतारकूटमनुष्टुभाह कन्यर्क्षादिति कन्यानक्षत्राद्वरनक्षत्रंयावद्गणयेत् तथावरनक्षत्रादपिक
न्यानक्षत्रंगणयेत्ततोविशिष्टकेनवभिर्भक्तेयदवशिष्टंतत्रेत्रिपंचसप्तमितंभवेत्तदाःसदशकंस्मृतम् अ
न्यथाएकद्वित्रयुः षडष्टनवमितंचेत्तदाशुभम् उभयत्रापित्रिपंचाद्रिमितेशेषेतारामैत्रीनास्त्येवगुणाभावः ९७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकत्रचेत्तदाऽर्धमैत्रीतदासार्धैकोगुणः उभयत्रापिचेन्नाडीशेषाभावस्तदापूर्णमैत्रीगुणत्रयम् ॥ अथ योनिकूटंशार्दूलविक्रीडितहृत्तेनाह अश्विन्यंबुपयोरिति अश्विनीशततारकयोर्हयोश्चयोनिरुक्तः एवं-स्वातीहस्तयोः कासरोमहिषः लुलायोमहिषोवाहृदिषट्कासरसैरभाइत्यमरोक्तेः कर्णः श्रवणः अंबुपूर्वा षाढातयोर्वानरोमर्कटः चांद्रंमृगः अजयोनिर्ब्रह्मा नद्रंरोहिणीनयोरहिः सर्पः कुरंगोहरिणः अनुराधाज्ये ष्ठयोर्हरिणंविशाखाचित्रयोर्व्याघ्रः बुभ्यर्क्षउत्तराभाद्रपदाअर्यमोत्तराफाल्गुनीतयोर्गोयोनिः अन्यत्स्प ष्टम् फलमाह पादगयोरिनिएकस्मिन्यादेश्चरणेगतयोरुक्तनक्षत्रयोन्योः परस्परमहावैरंभवेत् यथा अ

अश्विन्यंबुपयोर्हयोनिगदितः स्वात्यर्कयोः कासरः
सिंहोवस्वजपाद्र्योः समुदितो याम्यांत्ययोः कुंजरः
मेषोदेवपुरोहितानलभयोः कर्णोबुनोवानरः
स्याद्वैश्वाभिजितोस्तथैवनकुलश्चांद्राजयोन्योरहिः ॥

श्विन्यंबुपयोर्हयोनिगदितःस्वात्यर्कयोः कासरइतिपादः तत्रोक्तयोर्भयोन्योरश्वमहिषयोर्महावैरम् ए वंसिंहहस्तिनोरित्यादि एतत्फलमाह अत्रिः एकयोनिषुसंपत्येदंपत्योःसंगमःसदाभिन्नयोनिषुमध्यःस्या दरिभावोनचेत्तयोः योनेरर्थोवैरभावः सतुकार्योवियोगदःशिवश्चयद्यस्तिकारयेन्नतुदोषभाक् अत्रा तिवैरवैरोदासीनमैत्रातिमैत्रक्रमेणगुणविभागः गोव्याघ्रादीनांअतिवैरंतत्रगुणाभावः सुनकमार्जारादीनां वैरस्तत्रैकोगुणः अश्वमेषादीनामौदास्यंतत्रगुणद्वयम् गोमेषादीनांमैत्रंतत्रगुणत्रयम् एकयोनौअतिमैत्रं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रगुणचतुष्टयम् ... अथमित्रमैत्रीशार्दूलविक्रीडिताभ्यामाह मित्राणीति मित्रेचेद्युमणेः सू
र्यस्यभौमगुरुचंद्राःमित्राणि शुक्रशनी अस्यवैरिणौ अस्यसौम्यः बुधः समः विधोः चंद्रस्यबुधरवीमित्रसु
नरस्यविधोर्द्विषन्शत्रुर्नास्ति मंगलगुरुशुक्रशनयः समाएव अथभौमस्य गुरुचंद्रसूर्यामित्राणि बुधः श-
त्रुःशुक्रशनीसमौ अथशशभृत्सूनोः बुधस्यसिताहस्करौशुक्ररवीमित्रे अस्यबुधस्यशशीशत्रुःगुरुशनी
भौमाःसमाः अथगीष्पतेर्गुरोः सूर्यभौमचंद्रामित्राणि बुधशुक्रौशत्रू सूर्यजः शनिः समः अथकवेः शुक्र
स्यबुधशनीमित्रे चंद्रसूर्यौशत्रू कुजगुरूसमौ अथशनेः शुक्रबुधौमित्रे रविचंद्रभौमाद्विषोवैरिणः अ

न्येषामैत्रभयोः कुरंगउदितोमूलार्द्रयोश्चातथा मार्जारोदितिसार्पयोरथमघा
योन्योस्तथैवोंदुरव्याघ्रोद्वीशभचित्रयोरपिचगौरार्यम्णबुध्न्यर्क्षयोर्गोनिःपाद
गयोः परस्परमहावैरंभयोन्योस्त्यजेत्तु मित्राणिद्युमणेः कुजेज्यशशिनः शुक्रा
र्कजौवैरिणोसौम्यश्चास्यसमोविधोर्बुधरवीमित्रेनचास्यद्विषत् शेषाश्चास्यस
माः कुजस्यसुहृदश्चंद्रेज्यसूर्याबुधः शत्रुःशुक्रशनीसमौचशशभृत्सूनोःसिताहस्क
रौ २७

न्योगुरुः समः अत्रगुणविचारः तत्रैकाधिपतित्वेपरस्परमित्रत्वेपंचगुणाःसममित्रत्वेचत्वा
रः उभयसमत्वेत्रयोगुणाः मित्रवैरेगुणद्वयंसमवैरेएकगुणः परस्परवैरेगुणाभावः २७ अथ
गणकूटंवक्तुंतिलकयाशाऽऽह रक्षोनरेति निजनिजेति क्रमतोरक्षोनरामरगणाः पादत्रयेणोच्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ते नक्षत्रचित्रा राधाविशाखा मघादिएतत्पर्यंतंनक्षत्राणिरक्षोगणः पूर्वात्रयमुत्तरात्रयंविधातारोहिणी चेभा भरणी र्द्रशआर्द्रा एतानिमानिनरगणोमनुष्यगणः मैत्रमनुराधा अदितिःपुनर्वसुः इंदुर्मृगः हरिःश्रव णः पौष्णंरेवती मरुत्स्वाती लघूनिअश्विनीपुष्यहस्ताःएतानिनवभान्यमरगणोदेवगणश्च २९ नि जेति स्वस्वगणेविद्यमानयोः स्त्रीपुरुषनक्षत्रगणयोरत्यंतमाप्रीतिः स्यात् अमरमनुजयोर्देवमनुष्ययो

मित्रेचास्यरिपुः शशीगुरुशनिक्षाजाःसमागीष्यतेमित्राण्यर्ककुजेंदवोबुधसि तौशत्रूसमःसूर्यजःमित्रेसोस्यशनीकवेःशशिरवीशत्रूकुजेज्यौसमौमित्रेशु क्रबुधौशनेःशशिरविक्षाजाद्विषोन्यःसमः रक्षोनरामरगणाःक्रमतो मघाहिवस्विंद्रमूलवरुणानलतक्षराधा पूर्वोत्तरात्रयविधातृयमेशभानिमै त्रादितींदुहरिपौष्णमरुल्लघूनि २९ निजनिजगणमध्येप्रीतिरत्यंतमास्यादम रमनुजयोःसामध्यमासंप्रदिष्टा असुरमनुजयोश्चेन्मृत्युरेवप्रदिष्टोदनुजविबु धयोःस्याद्वैरमेकांतनोत्र स्त्रीपुरुषयोःपरस्परंप्रीतिर्मध्यमास्यात् असुरमनुजयोराक्ष समनुष्ययोःस्त्रीपुरुषयोर्मृत्युरेवप्रदिष्टः प्रबलदुर्बलन्यायेनमनुष्यगणस्यैवनाशः शार्ङ्गीये रक्षोगणः पुमान्चेत्स्यात्कन्याभवतिमानवी केपीच्छंतिनदोद्वाहंव्यस्तंकोपीहनेच्छति एतत्तुल्यन्यायाद्देवराक्षसयोरपि द्रष्टव्यम् अस्यापवादमाहगर्गः रक्षोगणोयदापुंसांकुमारीनृगणाभवेत्तद्वूटंस्वगप्रीतिर्योनिश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शऋभंतदेति अत्रेयंगुणकल्पना नररक्षसोर्महद्वैरंतत्रगुणाभावः देवरक्षसोर्वैरंतत्रगुणाभावः देवमनुष्यत्वेचत्वारः गणैकत्वेषडुणाः ३० अथराशिकूटमनुष्टुभाह मृत्कर्क्यिति स्त्रीपुरुषयोः परस्परंषष्ठाष्टमराशित्वेसतिमृत्कर्त्तेयः एवंनवात्मजेनवपंचमेऽपत्यानांहानिः एवंद्विर्द्वादशेनिर्धनत्वंदारिद्र्यंस्यात् अन्यत्रनृतीयैकादशेचतुर्थदशमेसमसप्तमेवासतिसौख्यकृत्प्राणिपीडनंस्यात् ३१ अथास्यदुष्टभकूटस्यपरिहारंशार्दूलविक्रीडितेनाह प्रोक्तेऽति स्त्रीपुरुषराश्योर्द्वयोरेकाधिपत्येसतिएकस्वामिकत्वेसतिप्रोक्तेदुष्टभकूटेषडष्टकादावपिविवाहः शुभोगदितः यथा मेषवृश्चिकयोः तुलावृषभयोर्वा नवपंचमेत्वेकाधि

मृत्कःषडष्टकेज्ञेयोऽपत्यहानिर्नवात्मजे द्विर्द्वादशेनिर्धनत्वंद्वयोरन्यत्रसौख्यकृत् ३१ प्रोक्तेदुष्टभकूटकेपरिणयस्त्वेकाधिपत्येशुभोर्थोराशीश्वरसौहृदेपिगदितोनाड्यृक्षशुद्धिर्यदि

पत्याभावः द्विर्द्वादशेमकरकुंभयोः अथवाराशीश्वरयोराशिस्वामिनोः सौहृदेमैत्रेपियदिनाडीनक्षत्रयोः शुद्धिर्वेधोनभवेत्तदापिदुष्टभकूटकेविवाहःशुभः यथाषट्काष्टकेमीनसिंहराश्योर्नवपंचमेमेषधनुषोर्द्विर्द्वादशेमीनमेषयोरित्यादि तथात्रवसिष्ठः द्विर्द्वादशेत्रानवपंचमेवाषड्वाष्टकेराक्षसयोषितावा एकाधिपत्येभवनेशमैत्रेशुभायपाणिग्रहणंविधेयमित्यादि अन्यच्च विषमात्कन्यकाराशेः षष्ठंषष्ठाष्टकंनसत् समात्सप्तंशुभंज्ञेयंविपरीतंनशोभनम् अन्यर्क्षेशपयोरिति अन्यर्क्षेप्रीतिषड्वाष्टकादिभ्योऽन्यराशौराशिस्वामिनोः परस्परशत्रुत्वेवासतिअंशपयोस्तद्राशिनवांशस्वामिनो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्बलित्वसहितेस्यातांबलित्वंचसहितान्वयमाह्विवचनांतंपदम् बलित्वेउच्चादिस्थानस्थितत्वेनसबल त्वंसहितापरस्परमैत्रीतेउभेचेद्भवत तथानाड्यर्क्षशुद्धौनाडीनक्षत्रयोर्वेधाभावेसतितथानाराशुद्धि वशेचसति राशिवशाताभावेचराशिवशत्वेचसतिदुष्टभकूटकेपिविवाहः शुभोनिरुक्तः उक्तंजगन्मोह नेवसिष्ठेन राशिनाथेविरुद्धेपिसबलावंशकाधिपौ तन्मैत्रेपिचकर्त्तव्यं दंपत्योःसुखमिच्छतेति अन्यच्च तस्मिन्नेवप्रकरणेवसिष्ठवाक्यम् राशिनाथेविरुद्धेपिमित्रत्वेचांशनाथयोः विवाहंकारयेद्धीमान्दंपत्योःसौ ख्यवर्धनमिति अन्यच्चतस्मिन्नेवप्रकरणेवसिष्ठवाक्येषु अन्यतरवाक्यानर्थक्यापत्तेरुपसंहारन्यायेनप वर्तते तेनाक्यंवाक्यद्वयस्याभिन्नार्थत्वंवाच्यम् तत्रकस्यकोर्थइतिसंदेहेन्यूनार्थद्वितीयंवचनंकेवलयह

अन्यर्क्षेशपयोर्बलित्वसहितेनाड्यर्क्षशुद्धौतथातारा शुद्धिवशेनराशिव शाताभावेनिरुक्तोबुधैः ३२

वैरापवादकंतुल्यबलत्वात् अंशनाथसबलत्वाभिधायकंप थमवचनम् उभयविरोधस्यग्रहवैररूपस्यापवादकम् तेनराशिनाथेविरुद्धेत्यत्रराशीत्यनाथौच एतेषांसमाहारोराशिनाथंतस्मिन्राशिनाथे तथाचायमर्थः राशौविरुद्धेषट्काष्टकादिना नाथौविरुद्धौक योरित्याकांक्षायाम् ययोःषट्काष्टकादिविचारस्तयोरेवसन्निहितत्वान्ग्रहणंतयोःसशुचितेसतिविवाहः शुभःनन्वस्मिन्वाक्येक्लिष्टव्याख्यानेकिंमानम् उच्यते अंशनाथसबलत्वस्याधिकरणमेवंचयुगप दुत्पन्नस्यदोषद्वैविध्यस्यराशिविरोधग्रहविरोधरूपस्यपरिहारकरूपमित्यवगम्यते अस्मिन्नपिपक्षेना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

डीसुद्विस्तारासुद्धिः राशिवशतात्वापेक्षिनाइति ॥ अथदुष्टनांगणकूटमकूटमंपरिहारंशांतिन्याह मैत्र्यामित्रस्त्रीपुरुषयोः राशिस्वामिनोर्मैत्र्यांसत्यांतथाराशिनवांशनाथयोर्दूंदूस्यापिमैत्र्यांसत्यांदुष्टगुणानांदोषोनस्यात् असन्मित्रः राशीशयोः रूक्ष्द्वावेमित्रखेचांशनाथयोर्गणादिदोष्येप्युद्वाहः पुत्रपौत्रप्रवर्धन अथसङ्कूटंतृतीयैकादशादिकंखेटारिखंग्रहवैरकृतंदोषंनाशयेत् स्वमेवखेटप्रीतिग्रहमैत्रीत्वापिदुष्टंभकूटंषडष्टादिकंनाशयेत् असङ्कूटेगुणाभावेभकूटदोषापवादेचत्वारोगुणाइति ॥

मैत्र्यांराशिस्वामिनोरंशनाथदूंदूस्यापिस्याद्गुणानांनदोषःखेटारिखंनाशयेत्सङ्कूटंखेटप्रीतिश्चापिदुष्टंभकूटम् ॥ ज्येष्ठारौद्रार्यमांभः पतिभयुगयुगंदास्रभंचैकनाडीसुष्येदुत्वाष्ट्रमित्रांतकवसुजलभंयोनिबुध्येचमध्या

अथनाडीकूटंसप्तधरभान्ज्येष्ठारौद्रेतिज्येष्ठारौद्रमार्द्रार्यमोत्तराफाल्गुनीअंभःपतिर्वरुणशततारकाएभ्योनक्षत्रेभ्योयुगयुगंद्वयम् ज्येष्ठामूलम् उत्तराहस्तआर्द्रापुनर्वसुशततारापूर्वाभाद्रपदादास्रभमश्विनीचैतन्नक्षत्रनवकंपरस्परमेकनाडीस्थंत्यजेत् पुष्यमृगचित्रानुराधाभरणीधनिष्ठापूर्वाषाढापूर्वाफाल्गुनीउत्तराभाद्रपदाएतन्नक्षत्रनवकंमध्यानाडीस्थंत्यजेत् अथवाग्निव्यालविश्वोडुयुगयुगम् वायुस्वातीतद्युगंद्वयंस्वातीविशाखा अग्निः कृत्तिकारोहिणी व्यालः आश्लेषामघा विश्वोडुयुगं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विश्वेउत्तराषादाश्रवणश्च पौष्णभरेवती एतन्नक्षत्रनवकं अपरात्रतृतीयैकनाडीत्यज्यते एतत्फलं भा
र्दंपत्योःस्त्रीपुंसयो एकनाड्यांपरिणयनमसत् दुष्टफलंस्यात् मध्यनाड्यांहिनिश्चयेनमृत्यर्दयो
रपिस्यात् नारदेनतुविशेषउक्तः चतुस्त्रिद्व्येकभात्स्थाया कन्याया क्रमशोश्विभात् वन्हिभादिंदुभा
न्नाडीत्रिचतुःपंचपर्वस्फ गणयेत्संख्ययाचैकनाड्यांमृत्यर्नसंशय एकनाडीविवाहश्चगुणैःसर्वैःसम
न्वित वर्जनीयःप्रयत्नेनदंपत्योर्निधनंयतइति अमुमर्थंस्पष्टमाहगर्गः चतुष्यात्कन्यकाऋक्षंगणयेदाश्वि
नादिकम् त्रिभंसंस्थापसव्येनभिन्नपर्वशुभावहम् कन्यकाभंत्रिपाचेत्स्याद्गणयेत्कृत्तिकादिकम् चतुर्भिः
पर्वभिस्तद्वदभिजित्तारकान्वितम् कन्यकर्क्षंद्विपाचेत्स्याद्गणयेत्सौम्यभादिकम् पंचभिस्त्ववरोहेतुपंच-
मांगुलिवर्जितम् आसन्नात्वेकनाडीस्यादासन्नमृतिदायिनी दूरस्थाचैकनाडीस्यात् दूरस्थानिष्टकारिणी
ति नाडीविचारेचंडेश्वरः पृष्ठमध्येशुभसमन्वित भोगः क्रोडेवनितावित्तवियोगमध्यरेखेभवतिविवाहे
उभयोर्मरणंवदतिमयम् अश्व्यादिनाडीवेधर्क्षक्रमात्षष्ठद्वितीयकम् याम्यादितुर्यतुर्यंचकृत्तिकादिद्वि
षष्ठकम् अन्यच्च अर्कोंदुज क्षोणितनूजजीवाः केतुः सितोराहुशशांकसौराजन्मादिनाडीत्रितयेशुभाः
स्युःशुभेः शुभंस्यादशुभंशुभंच तत्स्यात् अर्कः १ १० १९ बुधः २ ११ २० मंगलः ३ १२ २१ बृ-
हस्पतिः ४ १३ २२ केतुः ५ १४ २३ शुक्रः ६ १५ २४ राहुः ७ १६ २५ चंद्रः ८ १७ २६ श
निः ९ १८ २७ अशुभग्रहनाडीनक्षत्रेशुभकार्यंकुर्यान्नाशुभग्रहनाडीनक्षत्रेइत्यर्थः चतुर्नाडीत्वहत्वा
यांपंचालेपंचनाडिकाम्त्रिनाडीसर्वदेशेषुवर्जनीयाःप्रयत्नतइति मनुरुक्तं अहल्येतुचतुर्नाडीसयोगः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालमृत्युद एषयोगोन्यदेशेषु अपमृत्युफलप्रदः पंचनाडीसमायोगः पांचालेकालदंडदः इतरत्रसमा
योगोदुःखदारिद्र्यदोषकृत् त्रिनाड्यांतुसमायोगः सर्वत्रानिष्टकारकइति आवश्यकलेशुरुः दोषापनु
त्तयेनाड्यांमृत्युंजयजपादिकम् विधायब्राह्मणांश्चैवतर्पयेत्कांचनादिना हिरण्मयींदक्षिणांचदद्या
द्गुर्णादिकूटके गावोन्नवसनंहेमसर्वदोषापहारकमिति अन्यच्च षड्वाष्टकेगोमिथुनंप्रदद्याल्कांस्यंसरू
प्यंनवपंचमेपि वस्त्रंप्रदेयंकनकंचशक्त्याद्विर्द्वादशेब्राह्मणतर्पणंचेति २४ अथेंद्रवज्रयापूर्वमध्याग
रभागयोगानिभान्याह पौष्णेति पौष्णाद्रेवत्याःषट्भम् भानिजात्यभिप्रायमेकवचनम् पूर्वार्द्धयोगी

वाय्वग्निव्यालविष्ण्वंत्युगयुगमथोपौष्णभंचापरास्याद्भंपत्योरेकनाड्यांपरि
णयनमसन्मध्यनाड्यांहिमृत्युः २४ पौष्णेशशाङ्काद्रसस्सूर्यनंदापूर्वार्धमं
ध्यापरभागयुग्मम् भर्त्तापियः प्रागयुजिभेस्त्रियास्यान्मध्यद्वयोः प्रेमपरेपि
यास्त्री २५

निज्ञेयानि आर्द्रादिद्वादशमध्यभागयोगानिज्ञेयानि ज्येष्ठादीनिनवअपरभाग
योगानिज्ञेयानि फलमाह भर्त्तापियइति अयंभावः राज्ञामंतःपुरस्थस्त्रीसमागमेगणिकादिसमागमेवापूर्वा
र्द्धयुजिनक्षत्रेसतिस्त्रीणांभर्तापियः मध्यभागयुजिभेपरस्परंप्रीतिर्भवेत् परेपरभागयुजिभेस्त्रीनृणांप्रिया
भवेदितिएवंवधूवरयोर्नवसमागमेपिज्ञेयमितिरत्नमालाटीकायांमहादेवेनोक्तम् भागमपि २५ अथषान्यसं
मतंवर्गकूटमार्ययाह अकचटेति अवर्गेवर्गसंज्ञकः कुचुटुतुपुइतिपंचवर्गाः एकोयवर्गोन्यःशवर्गः एवमष्टौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्गाः तत्र अवर्ग-खगेशस्यगरुडस्य कवर्गोमार्जारस्य चवर्गः सिंहस्य टवर्गः श्वनः तवर्गः सर्पस्य पवर्ग आखोर्मूषकस्य यवर्गोमृगस्यशवर्गोः वेर्मेषस्य अत्रनिजात्स्वस्मात् पंचमावैरिणोयेषांतेतथोक्ता गरुडसर्पयोः मार्जारमूषकयोः सिंहमृगयोः श्वमेषयोः परस्परंमहावैरमित्यर्थः स्त्रीपुंसयोर्नक्षत्रंभक्षवर्गेचेत्तदाअशुभंयदालेकवर्गेतदाशुभम् एतच्चस्वामिसेवकयोरपिविचार्यम् ३५ इदानींनक्षत्रराश्यैक्येविशेषंशालिन्याह राश्यैक्येचेदिति द्वयोर्वधूवरयोः एकराशित्वेसतियदिभिन्नमृक्षंस्यात् तदानाडीदोषोगणानांचदोषोनस्यात् यथा शततारापूर्वाभाद्रपदापादत्रयंच तथैवनक्षत्रैक्येराशियुग्मंराशिद्वयंचेत्स्यात्तदा

अकचटतपयशवर्गाः खगेशमार्जारसिंहश्वनाम् सर्पारुमृगावीनांनिजपंचमवैरिणामष्टौ ३६ राश्यैक्येचेद्भिन्नमृक्षंद्वयोःस्यात्नक्षत्रैक्येराशियुग्मंतथैव नाडीदोषोनोगणानांचदोषोनक्षत्रैक्येपादभेदेशुभंस्यात् ३७

पिप्पलगुरुक्तोदोषोनस्यात्यथा पूर्वाभाद्रपदापादत्रयंचतुर्थचरणश्च अत्रापिविशेषमाहगर्गः एकराशौपृथक्धिष्ण्येपुंतारापथमाप्नुयात् अनीवशोभनाप्रोक्तास्त्रीतारानेत्यशोभना अथैकराशिनक्षत्रैक्येऽन्यादमाह नक्षत्रैक्येऽपि वधूवरयोः राश्यैक्येनक्षत्रैक्येनयदिचरणभेदस्तदापिशुभंस्यात् जन्मनक्षत्राज्ञाने उपायमाह वसिष्ठः अज्ञातजन्मनांनृणांनामभेपरिकल्पना तेनैवचिंतयेत्सर्वराशिकूटंद्विजन्मवत् जन्मभं जन्माधिष्ण्येननामभंनामधिष्ण्यतः व्यत्ययेनयदायोज्यंदंपत्योर्निधनप्रदमिति ३७ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेवकादिभस्यस्वाम्यादिभात् पूर्वत्रविशेषंवसंज्ञानिलकेनाह सेव्याधमर्णेतिस्पष्टार्थम् तथाचोक्तंडामर संग्रहे भामिनीजन्मनक्षत्राद्द्वितीयंपतिजन्मभम् नशभंभर्तृनाशायकथितंब्रह्मयामले प्रथमंसेव्यजन्मर्क्षंद्वितीयंसेवकस्यच नसेवास्थिरातस्यजलबुद्बुदवत्थिरे ऋणग्राहकजन्मर्क्षंप्रथमंऋणदस्यभात्द्वितीयंऋणसंबंधोनकर्तव्यः कदाचन कदाचिद्द्रव्यलोभेनक्रियतेनैवलभ्यते पार्वतीप्राणनाथेनमोक्तंडामर संग्रहे ग्रामभंप्रथमंयस्याद्वितीयंजन्मभंभवेत् नग्रात्सर्वथाग्रामोयतःप्राप्यार्थनाशदइति अथराशि

सेव्याधमर्णयुवतीनगरादिभंचेत्सूर्वंहिभृत्यधनिभर्तृपुरादिसद्मात् सेवाविनाशधननाशनभर्तृनाशग्रामादिसौख्यहतिदंक्रमशःप्रदिष्टम् कुजशुक्रसौम्यशशिसूर्यचंद्रजाककविभौमजीवशनिसौरयोगुरु इहराशिपाःक्रियमृगास्यतौलिकेंदुभतोनवांशविधिरुच्यतेबुधैः समगृहमध्येशशिरविहोरावियेभमध्येरविशशिनोःसा स्वामिनोमंकुजाविण्याह कुजशुक्रेतिस्पष्टार्थम् क्रियमृगास्येतिक्रियोमेषः मृगास्यंमकरः तौलिकस्तूलः इंदुभंकर्कः एष्योराशिष्योर्बुधैर्नवांशविधिरुच्यते मेषेमेषादेव वृषेमकरात् मिथुनेतुलातः कर्केकर्कादेव एवंसिंहेमेषात् एवंकन्यादिषुमकरादिष्वेवमेवधनुरादिष्वपिमेषादिष्वेव अथहोरांगायनीलंशेभेदेनशशिवदनाह तेनाह समगृहेति पंचदशभागमितैकैकाहोरात्रंसमराशिमध्येप्रथमाचंद्रस्यद्वितीयासूर्यस्य विषमराशिमध्येप्रथमारवेरपराचंद्रस्येत्यर्थः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथत्रिंशांशद्रेष्काणांश्चवसंज्ञतिलकेनाह शुक्रेति समराशिमध्येक्रमेणप्रथमतः पंचांशानांशुक्रः स्वामी त
तः शैलांशानांसप्तानांबुधस्ततोऽष्टानांगुरुस्ततः पंचानांशनिः ततः पंचानांभौमः विषमभेतुअस्मात्समरा
शेर्विपरीतंज्ञेयम् प्रथमतःपंचानांभौमः ततः पंचानांशनिः ततोऽष्टानांजीवः ततः सप्तांशानांबुधः ततः पंचां
शानांशुक्रः अयंत्रिंशांशकसंज्ञः द्रेष्काणकाइति अस्यप्रमाणंदशांशाः तत्रप्रथमदशांशाः प्रथमोद्रेष्काणः
सप्रथमस्यस्वाधीशस्यततोदशांशाः विंशतिभागपर्यंतंद्वितीयोद्रेष्काणः सःस्वराशितः पंचमराशीश्वरस्या
ततोविंशतिविभागानंतरंदशांशास्तृतीयोद्रेष्काणः सःस्वराशेर्नवमाधीश्वरस्ययथा मेषेप्रथमद्रेष्काणो

शुक्रज्ञजीवशनिभूतनयस्यबाणाःशैलाष्टपंचविशिखाःसमराशिमध्ये त्रिं
शांशकोविषमभेविपरीतमस्माद्रेष्काणकाःप्रथमपंचनवाधिपानाम् ४१ स्या
द्वादशांशाइहराशितएवगेहंहोराथदृक्कनवमांशकसूर्यभागाः

भौमस्य द्वितीयःसूर्यस्य तृतीयोगुरोरिति ४१ अथद्वादशांशांषड्वर्गोपसंहारंचसफलंवसंज्ञतिलके
नाह स्याद्वादशांशाइति इहषड्वर्गेद्वादशांशाःराशितः स्वराशेरेवसार्धभागद्वयात्मकोज्ञेयः मेषस्यमेषा
दिः वृषस्यवृषादिः इत्यर्थः गेहं होरा दृक्कनवमांशाः द्वादशांशाः त्रिंशांशाः इमेषड्वर्गाःकथिताःएतेवर्गाः
सौम्यग्रहाणांचेद्वंतिनदाशकम् पापानांचेदशकंभवेत्स्वेदधिकवर्गसदृशंफलम् अत्रनारदादिभिरे
कविंशतिर्महादोषाउक्ताः यथा पंचांगशुद्धिरहितोमेषस्तावद्यः प्रकीर्तितःउदयास्तशुद्धिरहितोद्वितीयःसू

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्यसंक्रमः तृतीयः पापषट्वर्गोभृगुः षष्ठः कुजोष्टमः गंडांतंकर्त्तरिरिष्फषडष्टेंदुश्वसग्रहः दंपत्योरष्टमलग्नम् राशिर्विषघटीतथा दुर्मुहूर्तोवारदोषःस्वार्जूरिकसमांघ्रिभम् ग्रहणोत्पातभंकूरविद्धर्क्षंकूरसंयुतम् कुनवांशोमहापातोवैधृतावेकविंशतिरिति अन्यैस्तदशदोषाउक्ताः वेधश्चलत्नाच्चतथाव्यतीपातःस्वार्जूरयोगंदशयोगचक्रम् पुनश्चजामित्रमृषग्रहाश्चबाणास्त्र्यक्त्रोदशचैवदोषाइति अथयंथकृल्लक्षणस्यपृथक्वक्तव्यत्वाद्दोषनामानिनोक्तानि तत्रपंचांगशुद्धिदुर्मुहूर्तवारदोषग्रहणोत्पातनक्षत्रदोषाआद्येशुभाशुभप्रकरणेनिरूपिताएवेतिपुनर्नोच्यंतेदुर्मुहूर्तवारदोषयोःपुनरभिधानप्रयोजनंतत्रैववक्ष्यामः तत्रपाप

त्रिंशांशकश्चषडिमेकथितास्तत्ववर्गाः सौम्यैः शुभंभवतिचाशुभमेवपापैः ४२
ज्येष्ठापौष्णभसार्पभांत्यघटिकायुग्मंचमूलाश्विनीपित्र्यादौघटिकाद्वयंनिगदितंतद्भस्यगंडांतकम्

षट्वर्गास्त्र्योदोषःकुजशुक्रेत्यादिभिश्चतुर्भिःश्लोकैर्निरूपितः ४२

अथगंडांतदोषंशार्दूलविक्रीडितेनाह ज्येष्ठापौष्णेति गंडांतंनामसंधिविशेषः सचानेकविधः नक्षत्रतिथिलग्नसंधिः तथायोगकरणवर्षायनर्तुमासपक्षदिनरात्रिमध्यान्हप्रातःसायंनिशायसंधिश्चेति तत्रनक्षत्रतिथिलग्नसंधिर्गंडांतसंज्ञाउच्यते ज्येष्ठापौष्णभरेवतीसार्पभमाश्लेषाएतेषामंत्यघटिकाद्वयंतथामूलाश्विनीमघानामादौघटिकाद्वयंतद्भस्यनक्षत्रस्यगंडांतंज्ञेयम् यथा रेवत्यश्विन्योराश्लेषामघयोर्ज्येष्ठामूलयोरंतरा १०३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लवर्तिघटीचतुष्टयंनक्षत्रगंडांतमशक्रभदमित्यर्थः अथलग्नगंडांतंकर्कतिकर्कः अलिर्वृश्चिकः अंडजोमीनः मानोवैसारिणोंऽजइत्यभिधानात्तूएषांलग्नानांअंततोर्धघटिकासमस्यर्थेतसिःअंतेर्धघटिका तथासिंहमेषोपसिन्द्रौ अश्वोधनुःएषांलग्नानांआदिगतार्धघटिकालग्नगंडांतम् यथाकर्कसिंह्योर्मीनमेषयोर्वृश्चिकधनुषोः चांतरालवर्तिन्येकाघटिकालग्नगंडांतंअशक्रभदमित्यर्थः पूर्णातादिति पूर्णाःपंचमीदशमीपंचदश्यस्तासामंतेघटिकैका तथानंदाःप्रतिपत्षष्ठ्येकादश्यः तासामादिगतैकाघटिकातिथिगंडांतंनाम यथा पंचमीषष्ठ्योः दशम्येकादश्योः पंचदशीप्रतिपदोः तिथ्योरंतरालवर्तिघटीद्वयंतिथिगंडांतमशुभमित्यर्थः एवंगंडांतसंज्ञः संधिस्तु अथान्येपिसंधयोवसिष्ठेनोक्ताः पक्षोब्दसंधिस्त्रिदिनंचमाससंधिस्त्रि

कर्कात्संडजभांतनोर्धघटिकासिंहाश्वमेषादिगापूर्णातात्घटिकात्मकंलशुभदंनंदातिथेश्चादिमम् ५३ नाड्यः खलुसंध्ययोश्च नाड्यश्चतस्रस्तिथिऋक्षयोगसंधिस्तदर्धकरणस्यसंधिः पक्षांतेपुत्रनाशःस्यान्मासांतेतुधनक्षयः वर्षांतेवर्गनाशःस्याद्ग्रहणात्सर्वनाशनमिति आवश्यकत्वेतु नक्षत्रंयोगतिथिसंधिषुनाडिकैकातिथ्यष्टविंशतिपलैःसहितोभयत्रकर्कालिमीननतनुसंधिषुदिक्पलानिवर्ज्यानिशेषविवरेषुचपंचपंचेति वासनासिद्धंकेशवार्कवाक्यमनुसर्तव्यम् गंडांतपरिहारमाहवसिष्ठः गंडांतदोषमखिलंसुहूर्ताभिजिदाहृय हंतियहून्मृगव्याधः पक्षिसंघमिवाखिलमिति ५४ अथकर्तरिदोषमनुष्ठुभाहलग्नात्पापाविति यदापापग्रहौऋजुनृजूलग्नाद्व्ययार्थस्थौद्वादशस्थः पाप-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रहोऽऋजुर्मार्गीद्वितीयस्थः पापोऽनृजुर्वक्रीस्यात्तदाकर्तरिनामदोषःस्यात्मृत्कदारिद्र्यशोकदाभवेत्क
र्तरीकारकौग्रहौउभावपिवक्रिणौशीघ्रगौवातदाकर्तरीनेत्याहकश्चिद्दः लग्नस्यपृष्ठायगयोरसाध्योः साक
र्तरीस्याद्दृजुवक्रगत्योः तावेवशीघ्रौयदिवक्रचारौनकर्तरीचेतिपितामहोक्तिरिति इंकर्तरीचंद्रस्यापिदृष्ट्वा
कश्यपः चंद्रस्यकर्तरीतद्दुःखभदृष्टानदोषदेति परंतुलग्नस्यचंद्रस्यवाक्रूरमध्यगतत्वदोषोस्त्येवकर्तरीतः
स्वल्पफलःकन्यानाशकरत्वात्क्रूरग्रहमध्यगतेलग्नेचंद्रेथवाक्रूरग्रहपंक्तेयमसदनाभिमुखंगमनंचेच्छंति
कन्यायादृतिवसिष्ठोक्तेः कर्तरीदोषापवादमग्रेपिस्वयंवक्ष्यति ५५ अथसग्रहदोषमनुष्टुभाह चंद्रेति सू

लग्नात्पापावृज्वनृजूव्ययार्थस्थौयदातदाकर्तरीनामसाज्ञेयासृत्कदारिद्र्यशोकदा
५६ चंद्रेसूर्यादिसंयुक्तेदारिद्र्यंमरणंशुभम् सौम्यंसापत्यवैराग्यंपापद्वयसु
तेमृतिः ५७ र्ययुक्तेचंद्रेदारिद्र्यंस्यात् एवंभौमादिषुमरणादिफलंक्रमेणस्यादित्यर्थः पापद्वय
योगेचंद्रस्यमृतिःस्यात्कुजारदाभिर्बुधगुरुसाहित्यफलमशुभमुक्तम् अत्रतुर्थीपनिवाक्यानुरोधाद्व्य
त्यिश्चेनचकेचिन्मन्यंतेशुभलोक्तेश्चशुभमुक्तम् श्रीपतिः शुभंचदंभोलिभृद्दीज्यविद्यामिति वसिष्ठः दारिद्र्यं
रविणाकुजेनमरणंसौम्येननस्युःसजदौर्भाग्यंगुरुणासितेनसहितेचंद्रेससापत्यकम् सज्ञार्कसूनेनस
ङ्गहयुजोवांछंतिकेचिच्छुभंह्याद्यैर्मृत्युरसङ्गहैःशशियुतैर्दीर्घःप्रवासःशुभैरिति एतत्परिहारोनारदेनोक्तः
स्वक्षेत्रगेस्वोच्चगेवामित्रक्षेत्रगतेयदिद्युतिदोषायनभवेद्दंपत्योःश्रेयसेतदेति ५८ ५९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथाष्टमलग्नदोषभंगापवादमनुष्टुभाह जन्मलग्नभयोरिति जन्मलग्नजन्मराशिसंबंधिनोर्मृत्युराशौअष्टमराशौविवाहलग्नेकरग्रहोनेष्टः अत्रजन्मलग्नेजन्मराशौविवाहलग्नेष्टः जन्मराश्युद्भवमेनैवजन्मलग्नोदयःशुभग्रहयोरुपचयस्थानंयदिलग्नगतंशुभम् अष्टमलग्नापवादमाह एकेशेति जन्मराशिजन्मलग्नयोरन्यतरस्यविवाहलग्नस्यस्वाम्यैक्येसति यथा मेषवृश्चिकयोर्नथातयोराशीश्वरयोर्मैत्रेसति यथा सिंहमीनयोः एतादृशेविषये अष्टमलग्नदोषोनस्यात् अथोक्तार्थोक्तमेवार्थंस्पष्टमुपजातिकयाह मीनोक्षेति उक्षोवृषः स्त्रीकन्याएतेराशयोयद्यष्टमलग्नेस्युस्तदाष्टमलग्नंदोषकृन्नभवेत् यथा सिंहान्मीनइत्या

जन्मलग्नभयोर्मृत्युराशौनेष्टःकरग्रहः एकाधिपत्येराशीशेमैत्रेवानैवदोषकृत् ॥ मीनोक्षकर्कालिमृगस्त्रियोष्टमंलग्नंयदानाष्टमगेहदोषकृत् अन्योन्यमित्रत्ववशेनसावधूर्भवेत्सुतायुर्गृहसौख्यभागिनी ॥ मृतिभवनांशोयदिचविलग्नेतदधिपतिर्वानशुभकरःस्यात् इतिकृतइत्याह अन्योन्येति परिहारांतरमाह गुरुः लग्नादष्टमराशीशः केंद्रगःशुभवीक्षितः यद्यथाष्टमलग्नोत्थदोषमाशुव्यपोहति रंध्रेशश्चशुभांशस्थस्तुंगस्वक्षेत्रमित्रगः अष्टमस्थानदोषोहिविनश्यतिनसंशयइति ॥ अथाष्टदृषिविचित्राछंदसाह मृतीति अष्टमभवननवांशोयदिलग्नेस्यादथवाष्टमभवनस्वामीविलग्नेस्यात्तदाशुभकरोनस्यात् अथव्ययभवनंजन्मलग्नजन्मराशिभ्यांद्वादशभवनम् अथवाव्ययभवनांशः अथवास्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मीयदिलग्नेस्यात् तदाकलहकृत्स्यात् कश्यपः दंपत्योरष्टमेलग्नेराशौवापितदंशके तदीशेवालग्नग
तेतयोर्मृत्युर्नसंशयइति तथैवद्वादशेलग्नेतदंशेवातदीश्वरेविवाहलग्नगेनैक्यंनित्यःस्यात्कलहोद्वयो
रिति ५८ अथविषघटीदोषंवंशस्थाभिर्विदंशयाचार्ह स्वरामेति मनोरिति मूलेइतिरेवतीपुनर्वसू
हस्तिकामघानक्षत्रेषुस्वरामतः त्रिंशान् घटिकोत्तरं हताश्चतस्रोघटिकाः विषनाडिकासुभकार्येवर्ज्यास्युरि
तितृतीयश्लोकेनान्वयः एवंसर्वत्रव्याख्येयम् केरोहिण्याम् अजभेपूर्वाभाद्रपदायाम् तदेवषष्टिघटिका
त्मके नक्षत्रभोगेध्रुवकाउक्ताः न्यूनाधिकत्वेस्पष्टीकरणमाह अथोस्तेति विषनाडिकाध्रुवाः स्वरामतइत्थे

व्ययभवनंवाभवतितदंशस्तदधिपतिर्वाकलहकरःस्यात् ५८ स्वरामतो ३० त्या
दितिवक्ष्यिपित्र्यभेस्ववेदतः ४० केरदत ३२ श्वसार्पभेस्वबाणतो ५० श्वेधृतितो
१८ र्यमांबुपेहृते २० भगत्वाष्ट्रभविश्वजीवभे ४९ मनोर्दितिदैवानिलसौम्यशाक्र
भेकुपक्षतः २१ शैवकरेष्टि १६ तोजभे

वमादय इष्टनक्षत्रभोगेननिघ्नाः स्वतर्काः षष्टिभाजि
ताः संतः विषनाडिकाः अपिभभोगेननिघ्नाः षष्ट्याभाज्यालब्धाः स्पष्टाभवेयुरित्यर्थः परिहारमाहगुरुः चं
द्रोविषघटीदोषंहंतिकेंद्रत्रिकोणगः लग्नंविनाशुभैर्दृष्टः केंद्रेवालग्नपस्तथेति विषनाड्युत्थितंदोषंहंतिसो
म्यर्क्षगःशशी मित्रदृष्टेऽथवास्वीयवर्गस्थोलग्नपोपिवेति दैवज्ञमनोहरेतिथिवारविषघटिकाउक्ताः ति-
थीषुनागाद्रिगिरीषुवारिधिर्गजाद्रिदिक्पावकदिग्विभास्कराः नुनीभसंख्यःक्रमतस्तिथेःक्रमात्तद्विषंस्यात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घटिकाचतुष्टयम् १५ ५ ८ ७ ७ ५ ४ ८ ७ १० ३ १० १२ ७ ८ नखाद्ययंद्वादशदिक्कचशै लाबाणाश्चतत्वानियथाक्रमेण सूर्यादिवारेषुपरंचतस्रोनाड्योविषंस्यात्स्वलुवर्जनीयम् २० ३ १२ १० ७ ५ २५ ॥ ४९ ५० ५१ ॥ अथदुर्मुहूर्तदोषंविवक्षुरादौदिवामुहूर्तान्मालिनीछंदसाह गिरि शेति अथबाणचंद्राइत्यत्रोक्तेर्मुहूर्तस्यापार्थक्येनलक्षणंनोक्तम् इंद्रानलौइंद्राग्नी एतेवासरेपंचदशमुहू र्ताःस्युः ५२ रात्रिमुहूर्तानानुष्टुभाह शिवइति अथममुहूर्तस्वामीशिवएव ततोऽजपादादृष्टौभेशाःनक्षत्रस्वामि

ग्रहेक्षिनयुतेनयुतेवीक्षितेपरैरिति पापैरिति पापग्रहैः तृतीयषष्ठैकादशस्थानस्थितैःशुभग्रहैः
प्रथमचतुर्थसप्तमदशमनवमपंचमैकादशहितीयतृतीयस्थानस्थितैराजाभिषेकःशुभः २ अथवि
षंशेसापवादमिंद्रवंशयाह पापैरिति तनौलग्नस्थितैः पापग्रहैःरुक्रोगःस्यात् राज्ञइतिशेषःनिध
नेऽष्टमेपापग्रहैःमृतिःस्यात् सप्तेपंचमेपापग्रहैःपुत्रार्तिःपुत्रपीडास्यात् अर्थव्ययगैःहितीयद्वाद

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शगैः पापैर्दरिद्रतास्यात् स्वेदशमेपापैरलसोनिरुद्योगःस्यात् द्युनांबुगैः सप्तमचतुर्थस्थानस्थैः पापग्रहैः भ्रष्टपदोभ्रष्टैश्वर्यःस्यात् अथापवादमाह सर्वेशुभमिति केंद्रगतैःशुभग्रहैःसर्वंशुभमुक्तं दुष्टफलंशुभंशुभोदर्कंस्यात् ३ अथविशेषंभृजंगप्रयातेनाह गुरुर्लग्नकोणइति लग्नेगुरुश्चेत्स्या दथवाकोणेनवपंचमेगुरुःस्यात् कुजोभौमोऽरौशत्रुगृहेषष्ठःस्यात् स्वेदशमेसितःशुक्रःस्यात् एता दृशेभिषेकयोगेयोराजाभिषिच्यतेसदासर्वकालंराजलक्ष्म्यामोदते अयमेकोयोगः सौरिसूर्योतृतीयाय गौस्याताम् यथासंख्यंशनिस्तृतीयेरविरेकादशेगुरुःस्वबंध्वोः स्वेदशमेबंधौचतुर्थेवाचेद्गुरुःस्यादेवं

स्यात्स्वेलसोभ्रष्टपदोद्युनांबुगैः सर्वंशुभंकेंद्रगतैःशुभग्रहैः ३ गुरुर्लग्नको णेकुजोरौसितःस्वेसराजासदामोदतेराजलक्ष्म्या तृतीयायगौसौरिसूर्योरव बंध्वोर्गुरुश्चेद्धरित्रीस्थिरास्यान्नृपस्य ४ इतिमुहूर्तचिंतामणौराजाभि षेकप्रकरणंदशमंसमाप्तम् १० ७ अथयात्राप्रकरणप्रारंभः यात्राया मविदितजन्मनांनृपाणांदातव्यंदिवसमबुद्धजन्मनांच विधयोगेभिषिक्तस्यनृपस्य धरित्रीपृथ्वीस्थिरासदाहस्तगतास्यात् ४ इतिराजाभिषेकप्रकरणंसमाप्तम् अथयात्राप्रक रणंव्याख्यायते तत्रकिंचित्कार्यमुद्दिश्यदेशांतरगमनंयात्रेति साद्विविधा परविषयेविजयार्थंगंतुं समरविजयास्या निखिलापरयात्रायासामान्यासाप्यवेद्विविधा कथिततिथिवासरर्क्षेष्वभिमत्तफलदा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवेच्चसामान्यात्समराद्ध्यात्रायोगविलग्नक्षितीशयोगेधिति तत्रयात्राधिकारिणःप्रहर्षिण्याह यात्रायामिति प्रविदितछायाघटिकादिनाज्ञातजन्मलक्षणयातत्कालीनलग्नकुंडलिकास्थशुभाशुभग्रहसूचितशुभाशुभफलोदर्कज्ञानंयेषांतेषांनृपाणांयात्रायांदिवसंदातव्यंयात्रादिनंदेयमित्यर्थः यदाहुश्चक्रः विदितेहोराराशौस्थानादिबलंग्रहाणांच आयुषिचपरिज्ञातेशुभमशुभंयातुरिहभाव्यमिति ननुयस्यजन्मकालोनज्ञातस्तस्यकथंयात्रास्यादित्यत आह अबुद्धमज्ञातंजन्मकालोयेषांतेषामपिप्रश्नाद्यैः पृष्टोयःश्रुत्यादिभिरशुभशुभेविज्ञातेसतिबुधोयात्रादिवसंप्रदद्यात् कीदृशैः प्रश्नाद्यैः

यस्माद्यैरुदयनिमित्तमूलभूतैर्विज्ञातेत्यशुभशुभेबुधःप्रदद्यात् ॥ जननराशितनूयदिलग्नगेतदधिपौयदिवाततएववा त्रिरिपुस्वायगृहंयदिवोदयेविजयएवभवेद्वसुधापतेः ॥ उदयोलग्नंनिमित्तंशकुनादि एतदादीनिमूलभूतानिनिन्द्यादानकरणानि येषांतैः प्रश्नोदयनिमित्ताद्यैस्तेषामपिफलोदयइतिनारदोक्तेः ॥ अथप्रश्नादेवफलंदुर्लभविलंबितेनाह जननेति अत्रयद्यपिजन्मलग्नजन्मराशिज्ञानंवर्ततेतथापिजातकोक्तशुभफलदग्रहदशानवगमादज्ञातजन्मत्वंज्ञेयम् अतएवराशिलग्नानामभावेयदिपृच्छतिप्रश्नंवक्ष्यतिजननंजन्मतत्संबंधिनीराशिलग्नेयदिप्रश्नलग्नगतेस्याताम् जन्मराशिजन्मलग्नंवायदिप्रश्नलग्नेस्यात्तदावसुधापतेराज्ञोविजयएव ॥ अथवातदधिपौलग्नगेस्याताम् जन्मराशिपतिर्जन्मलग्नपतिर्वायदिप्रश्न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लग्नेस्यात्तथापिराज्ञोविजयएव अथवाततएवताभ्यामेवजन्मलग्नजन्मराशिभ्यामेवत्रिरिपुस्थाय गृहंतृतीयषष्ठदशमैकादशानामन्यतमंगृहंयद्युदयेलग्नंस्यात्तदापिविजयएवस्यादित्यर्थः २ अथान्यंप्रश्नमंजुभाषिण्याह रिपुजन्मलग्नभमिति रिपोः शत्रोः जन्मलग्नभंजन्मलग्नंजन्मराशिश्चतत्स्था द्विबुकेचतुर्थेद्युनेसप्तमेवास्यात्तदाराज्ञोजयोभवेत् अथवाततयोः शत्रुजन्मलग्नराश्योरधिपौस्वामिनौप्रश्नलग्नाद्विबुकेद्यूनेवास्यातांतदापिविजयएव अथवाततएवताभ्यांशत्रोर्जन्मलग्नजन्मराशिभ्यामेवोपचयगृहम् ३ ६ १० ११ प्रश्नलग्नाद्विबुकेद्यूनेवास्यातदापिजयएव अथवातनौप्रश्न

रिपुजन्मलग्नभमथाधिपौतयोस्तनएववोपचयसप्तमचेद्वेत् हिबुकेद्यूनेथ शुभवर्गकस्तनौयदिमस्तकोदयगृहंतदाजयः ३ यदिपृच्छितनौवसुधारुचिराशुभवस्तुयदिश्रुतिदर्शनगम् यदिपृच्छतिचादरतश्चशुभग्रहदृष्टयुतचरलग्नमपि ४ लग्नेशुभवर्गकः शुभग्रहाणांषट्वर्गकश्चेत्स्यातदापिजयएव अथवायदिमस्तकोदयाःशीर्षोदयराशयःप्रश्नलग्नगताश्चेत्स्युस्तदापिजयएव वराहः उदयमुदयपंवाजन्मभंजन्मपंवातदुपचयगृहंवावीक्ष्यलग्नेयियासोः विनिहतमरिपक्षंविद्विशत्रोरिदंवाद्विबुकगृहसमेतंपृच्छतोऽस्तस्थितंचेति ३ अथान्यंप्रश्नंत्रोटकेनाह्यदीति अत्रवस्तुधापतेर्जयइत्यनुवर्तते यदिपृच्छितनौप्रश्नलग्नेवस्तुधाभूमीरुचिरास्यात् अथवायदिशुभवस्तुमंगलवस्तुमंगलवस्त्राभरणादिश्रुतिदर्शनगंच

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वणगोचरम् दर्शनमत्रचाक्षुषम् अथवाप्रश्नआदरनोदैवज्ञंपृच्छतितदापिवस्फुधापतेर्जयः स्यादिति सर्वत्रव्याख्येयम् अथवाचरलग्नंमेषकर्कतुलामकरास्त्र्यंयदिप्रश्नलग्नंशुभग्रहैर्दृष्टंयुतंवातदापिजयएव ४ अथाशुभफलदंप्रश्नमालिन्याह विधुकुजेति चंद्रमंगलयुक्तेलग्नेसौरिणाशनिनादृष्टेतदाप्रश्नकर्तुर्भंगः पराजयोनाशोवास्यात् अथचंद्रेमृतिषमदनसंस्थेचंद्रेअष्टमेसप्तमेवालग्नेसूर्येसतिएवंविधेयोगेप्रष्टुरपदिभंगःस्यात् अथाव्ययानामनेकार्थत्वात् अपिशब्दोविपर्ययार्थेनथाहि भास्करेमृतिषमदनसंस्थेचंद्रेलग्नगेचसतिएवंविधेयोगेपिप्रष्टुर्भंगःस्यात् उक्तंचवराहेण चंद्रेसरुधिरेलग्नेभंगः

विधुकुजयुतलग्नेसौरिदृष्टेथचंद्रेमृतिषमदनसंस्थेलग्नगेभास्करेपि हि
बुकनिधनहोराद्यूनगेवापिपापेसपदिप्रभवतिभंगःप्रश्नकर्तुस्तदानीम् ५
त्रिकोणेकुजात्सौरिशुक्रज्ञजीवायदेकोपिवानोगमोर्कोच्छशीवा बली-
यांस्तुकस्मध्येतयोर्योग्रहःस्यात्स्वकीयादिशंप्रत्युतासौनयेच्च ६

सूर्यात्मजेक्षितेद्यूनेनैधनगेचंद्रेलग्नेयातेदिवाकरे विपर्ययेवायातस्ययात्राभंगवधागमाइति वाऽथवापापग्रहेचतुर्थाष्टमलग्नसप्तमानामन्यतमन्यतमस्थेसतिप्रष्टुर्भंगःस्यात् ७ अथप्रश्नलग्नेविशेषाद्भंगप्रकाशनेनाह त्रिकोणेकुजादिति कुजान्मंगलात्त्रिकोणेनवपंचमेसौरिशुक्रज्ञजीवावेत्स्युः अथवाएकोपिवासौरिशुक्रज्ञजीवानामन्यतमश्चेत्त्रिकोणेस्यात्तदाप्युद्दिष्टगमनंनस्यादेव वाऽथवाऽर्कोच्छशीत्रिकोणेचेत्स्यात्तदा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्युद्दिष्टदिग्गमनंनस्यादेवनर्हिकस्यांदिशिगमनंस्यादित्यतआह्- बलीयानिति तयोरधुनोक्तोद्दिष्टदि
क्प्रतिबंधकारकयोर्ग्रहयोर्मध्येयोग्रहोबलवांस्यात्सः स्वकीयांदिशंप्रत्यतसांप्रतंनयेत् । अथयो
गांतरमदलेरवयाह् प्रश्नेति गम्यादिगीशान्गंतुंइष्टायादिक्तस्यार्ईश स्वामीप्रश्नलग्नेयत्रस्थानेस्या
त्तत पंचमेस्थानेयोग्रहोबोभूयाद्वेत् तदासोग्रहस्वामाशांदिशंनयतेप्रापयति अथयात्राका
लंकजंगमयातेनाह धनुर्मेषेति धनुर्मेषसिंहस्थेरवौयात्रामशस्ताशक्रमफलदा शनिज्ञोशनोराशिगे
मध्यामकरकुंभमिथुनकन्यावृषतुलागतेरवौयात्रामध्यास्यात् कर्कमीनालिसंस्थेरवौदीर्घाबहुकाल

प्रश्नेगम्यादिगीशात्स्वेटः पंचमगोयद्बोभूयाद्बलयुक्तःस्वामाशांनयतेसौ
७ धनुर्मेषसिंहेषुयात्रामशस्ताशनिज्ञोशनोराशिगेचैवमध्या

साध्यायात्रानसफलेत्यर्कः वराहः यात्राजसिंहतुरगोपगतेवरिष्ठामध्याशनैश्चरबुधोशनसांगृहेषु
भानौकुलीरवृषवृश्चिकगेतिदीर्घाशस्तश्चदेवलमतेध्वनिपृष्ठगोर्कः इति देवलमतेऽध्वनिमार्गेसूर्यःपृ
ष्ठगतः शस्तः पृष्ठगतत्वंतुवसंतराजोक्तभ्रमणवशेनेतिकेचित् यथा दग्धादिगेशोज्वलितादिगेंदीधू
मान्वितावानलदिक्प्रभाते इत्येवमेवग्रहराष्टकेनभक्तेदिशांताइति अनेनभ्रमणप्रकारेणयस्मिन्ग्रह
रेभ्रमणसमयः सादिक्सूर्यसंमुखोच्यते तत्पंचमादिक्सूर्यपृष्ठगतेत्यच्यतेइत्याहुः वस्तुतस्तद्दादश

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राशिभ्रमवशेनयस्यांदिश्यर्कस्थितः नांपृष्ठतः कृत्वायायादित्यर्थः यथा लग्नस्थेऽर्केपश्चिमांदिशंग
च्छेत् चतुर्थेदक्षिणां सप्तमेपूर्वाम् दशमउत्तरामित्यर्थः यदाहदेवलः लग्नस्थेवरुणाशांहिबुकस्थे
दक्षिणांरवौयायात् सप्तमगेपूर्वाशांमेषुरणसंस्थितेसौम्यामिति एवंविदिक्ष्वपिज्ञेयम् यथा द्वितीय-
तृतीयस्थितेर्केनैर्ऋतीम् पंचमेषष्ठेआग्नेयीम् अष्टमेनवमेऐशानीम् एकादशेद्वादशेकेवायव्यांगच्छे
दिति अथतारानिषेधमाह जन्मर्क्षेति स्वजन्मनक्षत्राद्दिननक्षत्रंयत्संख्यंस्यात् तस्मिन्नवभक्तेऽवशि
शाः प्रथमसप्तमपंचमतृतीयास्तारास्वेत्स्युस्तदानेष्टानिषिद्धाः अथतिथ्यादिशुद्धिमाहजंगमघा

रवौकर्कमानालिसंस्थेतिदीर्घाजन्वृःपंचसप्तत्रितारानचेष्टाः नषष्ठीनचद्वा
दशीनाष्टमीनोसिताद्यातिथिःपूर्णिमाःमानरिक्ता

तेनाह नषष्ठीति सिताद्यातिथिः शुक्लपक्षप्रतिपत् आसप्तितिथिषुयात्रानप्रशस्तेत्यर्थः नारदः षष्ठ्ष्ट
मीद्वादशीचरिक्तामावर्जितासप्तचयात्राशुक्लप्रतिपदिनिधनायाधनायचेति हयोश्विनी आदित्यंपुन
र्वसुः मित्रोनुराधा इंदुर्मृगः जीवःपुष्यः अर्यमरेवती हस्तश्रवणधनिष्ठाः एतैर्नवभिर्नक्षत्रैर्यात्राप्रश-
स्तोत्तमा मध्यानिनिषिद्धानिचभानिवसिष्ठआह तिस्रोत्तरावारुणनैर्ऋतेंद्रपूर्वात्रयब्रह्मभयुग्दशैवम्
मध्यान्यनिष्टान्यनलानिलेशाद्दिदेवचित्राहिमघांतकानीति तिस्रोत्तराइत्यार्षः संधिः ननुवसिष्ठेनवाराउ
क्ताः सूरेज्यदैत्येज्यशशींदुजानांवाराश्चवर्गाःशुभदाःप्रयाणे आदित्यभूसूनुशनैश्चराणांवाराश्चवर्गा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नशुभपदास्युरिति अत्रकुतोनोक्ताइतिचेत् नारदादिभिरनुक्तत्वात् वसिष्ठादिभिरुक्तपापग्रहवार शूलनिषेधवैय्यर्थ्याच्च दोषाधिक्येसूचनार्थंतदितिचेन्नभिन्नकर्तृकेषुमुनिग्रंथेषुमुनिवचनानांवैय्यर्थ्यानर्हत्वादेवंविधागतिरुचितानत्वेककर्तृकेग्रंथे तत्रहिपूर्वापरविरोधे अथोत्तरंवाक्यम् ग्रंथांतरेण सहैकवाक्यतावाकार्या तत्रायंवसिष्ठवाक्यस्वरसः तुहिनकरमंदवारेइतिवाक्यात् पापग्रहवारनिषेधो गौणइत्यनुमीयते तस्यगतिस्त्वेवंयदास्वजन्मराशेरुपचयेयोग्रहः शुभोवाःशुभोवाभवतुससर्वदिक्ष हितः परंतुशूलदिशोविहाय यदात्वनुपचयस्थः सतुकुत्रापिनहितः यदाहराजमार्तंडः उपचयकरग्रह

हयादित्यमैत्रेंदुजीवांत्यहस्तश्रवोवासवैरेवयात्राप्रशस्ता ॥ नपूर्वदिशिशक्र भेनविधुसौरिवारेतथानत्वजपदभेगुरोर्यमदिशीनशुक्रार्कयोः

दिनेशक्षितिः क्रूरेपिपापिनांभवति सौम्येप्यनुपचयस्थेनभवतियात्राशुभायातुरिति तस्मान्नार्थोवा रोक्तइत्युक्तम् ॥ अथवारशूलंनक्षत्रशूलंचपृथक्छंदसाह नपूर्वदिशीति शक्रभेज्येष्ठायांपूर्वदिशि नव्रजेत् तथाविधुसौरिवारेसोमशनिवारेपिपूर्वदिशिनव्रजेत् अजपदभेपूर्वाभाद्रपदायांतथागुरु वारेपियमदिशिनव्रजेत् रविशुक्रयोर्वारेतथाधातृभेरोहिण्यांपाशिदिशिपा शीवरुणः तद्दिशिपश्चि मदिशिनव्रजेत् कुजबुधवारेतथार्यमर्क्षेउत्तराफाल्गुन्यांसौम्यकुकुभिउत्तरदिशिनव्रजेत् कःस्वजय जीवितार्थीबुधःस्वधनंजयः शत्रुपराजयपूर्वकःस्वोत्कर्षःजीवितमायुष्यम् एतानिअर्थयते असौनव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जेत् वारशूलपरिहारमाह गुरुः सूर्यवारे घृतं प्राश्य सोमवारे पयस्तथा गुडमंगारकेवारे बुधवारे तिला
नपि गुरुवारे दधि प्राश्य शुक्रवारे यवानपि भाषान् शनैश्चरवारे गच्छन् शूलेन दोषभाक् तांबूलं चंदनं
मृच्च पुष्पं दधि घृतं तिला वारशूल हराण्यर्कास्मरणादपि वा निशि ॥ अथ कालशूलशार्दूलविक्रीडिते
नाह पूर्वाण्हे इति ध्रुवाख्यैर्मिश्राख्यैश्च भैः पूर्वाण्हे यात्रा न शुभा स्यात् तीक्ष्णाख्यैर्भैर्मध्यान्हे न स्यात्
अपराण्हे लघुनक्षत्रैः पूर्वरात्रे मैत्राख्यैः मध्यरात्रिसमये उग्रनक्षत्रैः तथा रात्र्यंते रात्रितृतीयभागे चरनक्ष
त्रैर्यात्रा न स्यात् तत्र विशेषः हरिहस्तपुष्यशशिभिः श्रवणहस्तपुष्यमृगैः सर्वस्मिन्नपि काले यात्रा शुभा-

नपाशिदिशिधातृभेकुजबुधैर्यमर्क्षेतथा नसौम्यककुभित्रजेत्स्वजयजीवितार्थीबु
धः ॥ पूर्वाण्हे ध्रुवमिश्रभैर्ननृपतेर्यात्रा नमध्याह्नकेतीक्ष्णाख्यैरपराण्हकेनलघुभै
र्नोपूर्वरात्रेतथा मित्राख्यैर्नचमध्यरात्रिसमयेचोग्रैस्तथानोचरैरात्र्यंते हरिहस्तपुष्य
शशिभिः स्यात्सर्वकालेशुभा ॥ पूर्वाग्निपित्र्यांतकतारकाणांभूपप्रकृत्यश्वतुरंगमाः
स्युः स्वातीविशाखेंद्रभुजंगमानांनाड्योनिषिद्धामनुसंमिताश्च ॥ स्यात् ॥ अथतत्रापि
कालविशेषमध्यमानांनिषिद्धानांचकियतांप्रमाणांचवर्ज्यघटिकाइंद्रवज्रयाह पूर्वेति पूर्वात्रयेप्रथमाः षोडश
नाड्योनिषिद्धाः कृत्तिकायामेकविंशतिः मघायामेकादश भरण्यांसप्तघटिकाः स्याज्याइत्यर्थः स्वातीविशाखा
श्लेषाज्येष्ठानांआद्याश्चतुर्दशघटिकास्त्याज्याः चतुर्भजः भरण्यांसप्तघटिकावह्निभेचैकविंशति एकादश

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घटीपित्र्येत्रिपूर्वासत्रयोदशस्वातीसर्पविशाखार्द्राज्येष्ठासत्रयंचतुर्दशवर्जयेदेनाघटिकायात्रायांशुभदा मताइति ॥ अथमतांतरेणवर्ज्यत्वमिंद्रवज्रयाह पूर्वार्द्धमितिस्पष्टार्थम् १२ अथभानांजीवपक्षादिकाः संज्ञाभिर्जंगमयातेनाह तमोभक्तेति तमोराहुर्वक्रीग्रहस्तेनभक्तामुक्ताएवंविधाविश्वसंख्यास्त्रयोदशसं ख्यास्तारानक्षत्राणिजीवपक्षःसजीवपक्षसंज्ञानिशुभकराणि भोग्याःराहुणाक्रांतनक्षत्रान् भोग्यानि गम्यानित्रयोदशभानिमृतोमृतपक्षसंज्ञानि तदाक्रांतभंतेनराहुणाक्रांतभंतेनराहुकर्त्तरीस्थैवनामकंस्या

पूर्वार्द्धमाग्नेयमघानिलानांत्यजेद्धित्राहियमोत्तरार्द्धम् नृपःसमस्तांगमनेजयार्थीस्वातीमघांचोशनसामतेन ॥ तमोभक्ततारास्मृताविश्वसंख्याःशुभोजीवपक्षोमृतश्चापिभोग्याः तदाक्रांतभंकर्तरीसंज्ञमुक्तंततोक्षींदुसख्यंभवेद्भस्तनाम १५ मार्तंडेमृतपक्षगेहिमकरश्चेज्जीवपक्षेशुभायात्रास्याद्विपरीतगेक्षयकरीद्वौजीवपक्षेशुभा

न् यथा राहुर्हस्तनक्षत्रंतेनभक्तानिचित्रास्वातीप्रमुखानिपूर्वाभाद्रपदांतानिच योदशजीवपक्षः तदाक्रांतभाद्धस्तासंचदशमुत्तराभाद्रपदाख्यंग्रस्तसंज्ञम् तेनराहुणाभोग्यानिउत्तराफाल्गुनीपूर्वाफाल्गुनीमघाश्लेषापुष्यपुनर्वसुआर्द्रामृगरोहिणीकृत्तिकाभरणीअश्विनीरेवत्यास्त्यानिमृतपक्षः हस्तस्तकर्तरीग्रस्तमितिच १५ अथजीवपक्षादीनांफलंशार्दूलविक्रीडितेनाह मार्तंडइति मृतपक्षेमार्तंडेसूर्येसतिचंद्रश्चेज्जीवपक्षेस्यात्तदायात्राशुभास्यात् विपरीतगेमार्तंडेजीवपक्षगेसतिचंद्रश्चेन्मृ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तपक्षगःतदायात्राक्रियमाणायानुःक्षयकरीस्यात् द्वौसूर्याचंद्रमसौचेज्जीवपक्षेस्यातांतदाशुभाशुभ-
तरेत्यर्थः अर्थादुभौमृतपक्षेस्यातांतदायात्रातिक्षयकरीस्यात् अथास्यापवादमाह ग्रस्तर्क्षमिति मृतप
क्षतः मृतपक्षनक्षत्रात् ग्रस्तर्क्षंराहुणाक्रांतभात्पंचदशसंख्यंशुभंशुभकरंस्यात् यथाशत्रान्भियमाणो
देहीप्रबलस्तस्माद्राहुभनःपंचदशसंख्याकात्कर्तरीराड्राक्रांतंशुभंशुभकरंस्यात् यायीति योराजावै
रिणमुद्दिश्यजिगमिषुःसयायी तत्स्वामीचंद्रःपश्चस्वदेशेदुर्गेकृत्वातिष्ठतिसस्थायी रविःस्थितिमान्
स्थायीराज्ञःस्वामी तौद्वौसूर्याचंद्रमसौजीवगौजीवपक्षगतौ तयोःराज्ञोःस्थायियायिराज्ञोजयकरोरवि

ग्रस्तर्क्षमृतपक्षतःशुभकरंग्रस्तात्तथाकर्तरीयायींदुस्थितिमान्नविर्जयकरौ
तौद्वौतयोर्जीवगौ १५ स्वात्यंतकाहिवसुपौष्णकरानुराधादित्यध्रुवाणिवि
षमास्तिथयोऽकुलाःस्युः श्वेज्जीवपक्षगःतदास्थायिनोजयःचंद्रश्चेज्जीवगस्तदाया-
यिनोजयः उभौचेज्जीवगौतदासंधिकरौ अर्थाद्वावपिचेन्मृतपक्षगौउभयोःपराजयकरौ अत्रबहुवि-
चारःस्वरोदयादवगंतव्यः १५ अथाकुलकुलाकुलकुलगणंवसंततिलकाशार्दूलविक्रीडिताभ्यामाह
स्वात्यंतकाहीति पूर्वाश्चीतिस्वातीअंतकंभरणीआश्लेषाधनिष्ठारेवतीहस्तअनुराधापुनर्वसुध्रुवा
णिउत्तरात्रयरोहिण्यःएतानिद्वादशभानिविषमास्तिथयःप्रतिपत्तृतीयापंचमीसप्तमीनवम्येकादशी
त्रयोदशीपंचदश्यइत्यष्टौतिथयः शनिचंद्रसूर्यबृहस्पतिवाराश्चत्वारःएतेप्रत्येकमकुलसंज्ञाःअथशौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बुधवारः मूलंअंबुपंशततारका ईशआर्द्रा विधिभमभिजित्चत्वारिभानि दशषट्द्वितिथ्यः दशमी षष्ठाद्वितीयास्तिस्रस्तिथयः तेप्रत्येकं कुलाकुलसंज्ञाःस्फः अथपूर्वास्तिस्रः अश्विनीपुष्यमघाइंदुर्मृगः कर्णश्रवणः दहनः कृत्तिका ईशंविशारवा न्येष्ठाचित्राएतानिद्वादशभानिशुक्रसोमवारौ अर्कार्किद्वेदैर्मिता द्वादशषष्ठीचतुर्दशीचतुर्थीसंज्ञाश्चतस्रस्तिथयः प्रत्येकंकुलसंज्ञकाःस्युःफलमाह यायाति अकुलसंज्ञकेतिथिवारनक्षत्रेवारगणे समरेयुद्धारंभेसतियायीराजाजयीस्यात् यदिकुल संज्ञकेतिथिनक्षत्रेवारगणेसतिस्थायीराजातद्भज्जयीस्यात् कुलाकुलेसंज्ञकेतिथिवारनक्षत्रगणेषु

सूर्यैर्दुमंदगुरवश्चकुलाकुलज्ञोमूलांबुपेशविधिभंदशषट्द्वितिथ्यः १६
पूर्वाश्चीज्यमघेंदुकर्णदहनहीशेंद्रचित्रास्तथासुक्रारोकुलसंज्ञकाश्चतिथयो
र्कार्किद्वेदैर्मिताःस्थायीस्यादकुलेजयीचसमरेस्थायीचतद्भकुलेसंधिःस्याद्यु
धयोःकुलाकुलगणेभूमीशयोर्युध्यतोः १७ स्युर्धर्मेदस्रपुष्यारगवसूजलप
हीशमैत्राण्यथार्थेयाम्याजांघ्रीद्रकर्णादितिपितृपवनोडुन्यथोभानिकामे

ध्यतोर्युद्धंकुर्वतोःभूमीशयोराज्ञोः परस्परंसंधिःस्यात् १६ १७ अथपथिराहुश्चक्रंस्निग्धरयाह स्युर्धर्मेइ ति अश्विनीपुष्याश्लेषाधनिष्ठाशततारकाविशारवानुराधारव्यानिभानिधर्मेधर्मस्थानेलेरव्यानि अथ भरणीपूर्वाभाद्रपदाज्येष्ठाश्रवणपुनर्वसूमघास्वात्यारव्यानिभानि अर्थेस्फः अथकृत्तिकार्द्रोत्तराभाद्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदात्रित्रामूलाभिजित्पूर्वाफाल्गुनीनक्षत्राणिकामेस्युः अथरोहिणी आप्यंपूर्वाषाढाभृगोंत्यंरेवतीविश्व
मुत्तराषाढाअर्यमभंउत्तराफाल्गुनीहस्तास्त्र्यानिभानिमोक्षेस्युः पथिशब्दआदिर्यस्यतादृशेराहौपथिरा
हावित्यर्थः चक्रेइतिविशेषमध्याहार्यम् १८ अथस्त्रग्विण्यातत्फलमाह धर्मगेभास्करइतिधर्ममार्गस्थि
तेभास्करेसतिचेद्वित्तमोक्षेशशीअर्थमार्गेमोक्षमार्गेवाशशीस्यात्तदाशोभनः अथवित्तगेअर्थगेभास्क
रेसतिधर्ममार्गगःमोक्षमार्गेवाशशीशोभनः अथकामगेभास्करेसतिधर्मार्थमोक्षमार्गगः शशीशोभनः

धन्त्याद्रार्बुभ्यश्चित्रानिर्ऋतिविधिभगाख्यानिमोक्षेथरोहिण्याप्येंद्रंत्यर्क्षविश्वा
र्यमभादिनकरर्क्षाणिपंथादिराहौ १८ धर्मगेभास्करेवित्तमोक्षेशशीवित्तगेधर्म
मोक्षस्थितिःशस्यते कामगेधर्ममोक्षार्थगः शोभनोमोक्षगेकेवलंधर्मगःप्रोच्यते
१९ पौषेपक्षस्यादिकाद्वादशैवतिथ्योमाघादौद्वितीयादिकास्ताः

अथमोक्षमार्गेभास्करेसतिधर्मगः शशीशोभनः अर्थाद्विपरीतावस्थितयोर्द्वयोः सूर्याचंद्रमसोरशुभ
त्वंस्यात् १९ अथतिथिचक्रंशालिन्याह पौषेइति अत्रपौषादितःप्रतिमासेद्वादशकोष्ठकालेख्याः एवं
कृतेचतुश्चत्वारिंशदधिकंशतंकोष्ठकाजायंतेतत्रचक्राकृतिर्यथान्यासः प्राग्लिखितः तत्रपक्षस्यशुक्ल
स्यकृष्णस्यवापक्षतिः पक्षमूलंप्रतिपत्तदादिकाः प्रथमंपौषमासेप्रतिपदादिकाः द्वादशतिथयोऽधोधो
लेख्याः माघादौमाघादिमासेषुद्वितीयादिकास्तिथयोलेख्याः यथा माघेद्वितीयादिकाः फाल्गुनेतृतीया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पौ	मा	फा	चै	वै	ज्ये	आ	श्रा	भा	आ	का	मा	पूर्व	दक्षिण	पश्चिम	उत्तर
१	२	३	४	५	६	७	८	९	१०	११	१२	सौख्यं	क्लेशः	भीतिः	अर्थाग
२	३	४	५	६	७	८	९	१०	११	१२	१	शून्यं	नैस्वं·	निस्व·	मिश्रता
३	४	५	६	७	८	९	१०	११	१२	१	२	द्रव्यक्षे·	दुःखं	इष्टाप्तिः	अर्थः
४	५	६	७	८	९	१०	११	१२	१	२	३	लाभः	सौख्यं	मंगलम्	वित्तला·
५	६	७	८	९	१०	११	१२	१	२	३	४	लाभः	द्रव्याप्ति	धनं	सौख्यं
६	७	८	९	१०	११	१२	१	२	३	४	५	भीतिः	लाभः	मृत्युः	अर्थाग
७	८	९	१०	११	१२	१	२	३	४	५	६	लाभः	कष्टं	द्रव्यला·	सुखम्
८	९	१०	११	१२	१	२	३	४	५	६	७	कष्टं	सौख्यं	क्लेशला·	सुखम्
९	१०	११	१२	१	२	३	४	५	६	७	८	सौख्यं	लाभः	कार्यसि·	करम्
१०	११	१२	१	२	३	४	५	६	७	८	९	क्लेशः	कष्टासि·	अर्थः	धनम्
११	१२	१	२	३	४	५	६	७	८	९	१०	मृत्युः	लाभः	द्रव्यलाभः	शून्यम्
१२	१	२	३	४	५	६	७	८	९	१०	११	शून्यं	सौख्यं	मृत्यु	अत्यंत·
पौ	मा	फा	चै	वै	ज्ये	आ	श्रा	भा	आ	का	मा	पूर्व	दक्षिण	पश्चिम	उत्तर

दिका· चैत्रे चतुर्थ्यादिका· वैशाखे पंचम्यादिका· ज्येष्ठे षष्ठ्यादिका· आषाढे सप्तम्यादिका· श्रावणेऽष्टम्या
दिका· भाद्रपदे नवम्यादिका· आश्विने दशम्यादिका· कार्त्तिके एकादश्यादिका· मार्गशीर्षे द्वादश्यादिका·
सर्वास्तिथयो द्वादश्यंताले ख्याः अवशिष्टस्थानानि प्रतिपदादिभिः पूरणानि कामान्तिस्त्रइति कामात्रयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशीचतुर्दशीपंचदश्यस्तृतीयादिवस्तु त्रयोदशीतृतीयावत् चतुर्दशीचतुर्थीवत् पंचदशीपंचमीवत्स्तु
रित्यर्थः फलार्थमतिदेशोयम् तत्रप्रतिपदादौपूर्वदक्षिणापश्चिमोत्तराऽदिक्षुयानेचिकीर्षितेसतिफलं
शुभाशुभंसौख्यंकुशइत्यादिनावृत्तत्रयेणवक्ष्येकथयिष्यामि २० फलानिशालिनीत्रयेणाह सौख्यमिति
लाभइति सौख्यमितिच श्लोकत्रयंस्पष्टार्थमेव तत्रपौषेप्रतिपदिदिक्चतुष्टयेसौख्यं कुशोभीतिरर्थो

कामार्त्तिस्रःस्युस्तृतीयादिवच्चयानेप्राच्यादौफलंतत्रवक्ष्ये २० सौख्यंकुशो
भीतिरर्थागमश्चशून्यंनेस्वंनिस्वतामित्रतांच द्रव्यंकुशोदुःखमिष्टास्तिरर्थो
लाभःसौख्यंमंगलंवित्तलाभः २१ लाभोद्रव्यास्तिधनंसौख्यमुक्तंभीतिर्लाभो
मृत्यरर्थागमश्च लाभःकष्टद्रव्यलाभोसुखंचकष्टंसौख्यंकुशलाभोसुखंच
२२ सौख्यंलाभःकार्यसिद्धिश्चकष्टंकुशाःकष्टास्तिद्धिरर्थोधनंच मृत्युर्लाभो
द्रव्यलाभश्चशून्यंशून्यंसौख्यंमृत्युरत्यंतकष्टम् २३ तिथ्यर्क्षवारयुतिरद्रि
गजाग्निनष्टास्थानत्रयेत्रवियतिप्रथमेतिदुःखी

गमश्चेतिफलंचतुष्टयंक्रमेणज्ञेयम् एवंद्वितीयादिष्वपिश्लोकश्चतुर्थांशोक्तंफलंस्यात् २१ २२ २३
अथसर्वोकज्ञानंवसंततिलकयाह तिथ्यर्क्षेति तिथयोत्रसुकुंप्रतिपदादितोग्राह्याः तत्रतिथिनक्षत्र
वाराणांयुतिःस्थानत्रयेस्थाप्याक्रमेणसप्तभिरष्टभिस्त्रिभिश्चतशाभक्तावशिष्टासतिप्रथमस्थानेवि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतिशून्येसतिअतिदुःखीयात्राकर्त्तास्यात् मध्येद्वितीयस्थानेधननाशः चरमेतृतीयस्थानेशून्यंमृत्युः स्यात् स्थानत्रयेंकयुजिअंकयुतौसौख्यजयौभवेताम् २४ अथाऽऽभ्रमणेप्रमाणिकयाह रवेर्भनक्षत्रात् अब्जभस्यचंद्रभस्योन्मितिर्गणनाकार्यासानयैः सप्तभिरवशेषितासतीद्व्यगाः द्विशेषमितासप्तशेषमितावाभवेत्तदाभद्राऽऽलोदोषः स्यात्सनशास्यते प्रागुक्तप्रकारेणयदित्रिषण्मितात्रिशेषमितावाशेषमितावास्यात्तदाऽभ्रमोभ्रमणाख्योदोषःस्यात्सोपिनशास्यते एतन्निर्मूलम् तत्रभ्रमणेयात्रा

मध्येधनक्षतिरथोचरमेमृतिःस्यात्स्थानत्रयेंकयुजिसौख्यजयौनिरुक्तौ २४ रवेर्भनोऽब्जभोन्मितिर्नगावशेषिताद्व्यगाः महाऽऽलोनशास्यतेत्रिषण्मिताभ्रमोभवेत् २५ शशांकभंसूर्यभतोत्रगण्यंपक्षादिनिष्यादिनवासरेण युतंनवांसंनगशेषकंचेत्स्याद्धिवरंतद्भ्रमनेतिशस्तम् २६

मेवत्यजंति आऽऽलेबहूनिकार्याणित्यजंति उक्तंच यात्रायंत्रहलप्रवाहसमरेचौर्येचसंधौतथाकूपारामतडागबंधनविधौपापर्द्धिदुर्गग्रहे अग्नेभोष्ट्रस्थाधिरोहणविधौत्याज्यंसदैवाऽऽलंयल्लान्नात्रशुभेषुमंगलविधौदोषोनतस्यक्वचिदिति २५ अथहिंवराख्ययोगमुपजातिकयाह शशांकभमिति स्पष्टार्थम् य संगात्घबाऽऽमपि सूर्यभाद्गणयेच्चांद्रंत्रिगुणंतिथिसंयुतम् सप्तभिस्तद्धरेद्भागंत्रिशेषंस्याद्ध्वबाऽऽकम् ए तच्चहिंवरात्शुभंज्ञेयम् एतत्सर्वंदाक्षिणात्याविचारयंतीतिअत्रप्रसंगात्ग्रंथांतरस्थसंग्रहः सूर्यभाद्ग

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णयेच्चांद्रंतिथिवारंचमिश्रितम् सप्तभिस्तुहरेद्भागंपंचशेषंतुटेलकम् सूर्यभाद्गणयेच्चांद्रंतिथिवारंच मिश्रितम् अर्कसंख्यैर्हरेद्भागंनवशेषंतुगौरवम् प्रवेशेगौरवंदद्यान्निर्गमेह्रस्वंतथा तस्करेटेलकंदद्या न्मृघबाडंसर्वकर्मसु इतिज्योतिर्निबंधे २६ अथघातचंद्रंशालिन्यातत्परिहारंचानुष्टुप्द्वयेनाह भूपंचे ति आग्नेयेति रूपद्यग्नीति मेषादिराशीनांभूपंचांकेत्यादिकोघातास्त्र्यचंद्रोज्ञेयः यथा मेषस्यप्रथमो मेषएव वृषस्यपंचमः कन्यास्थः मिथुनस्यनवमः कर्केद्वितीयः सिंहेषष्ठः कन्यायादशमः तुलायास्तृती

भूपंचांकद्व्यंगदिग्वह्निसप्तवेदाष्टेशार्काश्चघातास्त्र्यचंद्रः मेषादीनांराजसे वाविवादेवर्ज्यायुद्वाद्येचनान्यत्रवर्ज्यः २७ आग्नेयस्त्वाष्ट्रजलपपित्र्यवास वरोद्रभे मूलब्राह्माजपादक्षेपित्र्यमूलाजभेक्रमात् २८×

यः वृश्चिकस्यसप्तमः धनुषश्चतुर्थः मकरस्याष्टमः कुंभस्यैकादशः मीनस्यद्वादशः घातचंद्रोराजसेवा यांविवादेप्रतिवादिनांसहकलहेयुद्वाद्येआदिशब्दान्मृगयादिषुवर्ज्यः अन्यत्रविवाहान्नप्राशनादिमंग लकृत्येनवर्ज्यः उक्तंच युद्वेचैवविवादेचकुमारीपूजनेतथा राजसेवावाहनादौघातचंद्रंविवर्जयेत् तीर्थयात्राविवाहान्नप्राशनोपनयादिषु मांगल्यसर्वकार्येषुघातचंद्रंनचिंतयेत् अत्रलाघवार्थंघ्रात्रुप्रेणगोविंदपद्याम् मेषकन्याघटहरिनक्रयुग्मधनुर्वृषा मीनसिंहधनुःकुंभाघातचंद्राअजादितइति घा तचंद्रेमेषादिराशिषु कृत्तिकादिभानांचरणाएतेवर्ज्याइतिकेचिद्वदंति २७ २८ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२८ घातनक्षत्रिथिमुपजातिकयाह गोस्त्रीति गौःस्त्रीकन्या झषोमीनः एतद्राशिमतिनरेपूर्णाः पंचमीदशमीपंचदशीचघातनक्षत्रिथिः कौर्पीरश्चिकः अजोमेषः एतयोर्नेदाश्वतिपत्सप्तम्येकादशीचतिथिः नक्रधटेमकरतुलयोरिक्ताचतुर्थीनवमीचतुर्दशीचघातनक्षत्रिथिः धनुःकुंभसिंहानांजयातृतीयाष्टमीत्रयोदशीचघातनक्षत्रिथयः भद्राद्वितीयासप्तमीद्वादशीमिथुनेकर्केचघातनक्षत्रिथयोयात्रादौनशस्ताः ३० घातवारानूशालिन्याह नक्रेभौमइति मकरराशिमतिपुरुषे भौमोघातनवारः वृषसिंहकन्यासुमंदः शनिर्घातनवारः द्वंद्वेमिथुनेचंद्रः अजेमेषेऽर्कः कर्केबुधः धनुर्मीनवृश्चिकेषुशुक्रवारः जूकरुलाकुंभतुलयोर्जीवोगुरुर्घातनवा

रूपद्यग्न्यग्निभूरामद्यभ्यब्ध्यिंयुगाग्नयः घातनक्षत्रिथयः पादामेषाद्यैर्मनीषिभिः ३१ गोस्त्रीझषेघातनक्षत्रिथिस्तुपूर्णाभद्रानृयुक्कर्कटकेथनंदा कौर्प्याजयोर्नक्रधटेचरिक्ताजयाधनुःकुंभहरौनशस्ताः ३० नक्रेभौमोगोहरिस्त्रीषुमंदश्चद्वंद्वेऽर्कोजमेजश्चकर्के शुक्रःकोदंडालिमीनेषुकुंभजूकेजीवोघातवारानशस्ताः ३१ मघाकरस्वातिमैत्रमूलश्रुत्यंबुपाख्यभम् याम्यब्राह्मेशसार्पंचमेषादेर्घातभंनसत् ३२ स्पष्टार्थः घातवाराऽपियात्रादौनशस्ताः ३१ अथघातनक्षत्राण्यनुष्टुभाह मघेति स्पष्टार्थम् एतदपियात्रादौनशस्तम् ३२ अथघातलग्नान्याह भूद्यग्नीति स्पष्टार्थंतदपियात्रायांवर्ज्यम् ३३ अथयोगिनीजीर्णास्तास्तिथयनादोषमाह नवभूम्यइति एतास्तिथयः पूर्वतः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वदिशमारभ्यअष्टदिक्कज्ञेयाः यथा पूर्वस्यांनवभूम्यः नवमीप्रतिपच्च आग्नेयांशिववक्त्रयः एकादशी तृतीयाच्च एवमग्रेपि एतास्तिथयोयोगिन्यइतिजीर्णोक्तास्तिथयः संमुखवामगानशस्ताः यथा प्राच्यांगंतुः प्रतिपत्संमुखी दक्षिणांगंतुर्वामगा प्रतीच्यांगंतुः पृष्ठगा उदीच्यांगंतुर्दक्षिणा एवंसर्वास्वदिक्कास्तिथयोविचार्यास्तत्र संमुखवामगाश्चतिथयोनशुभाः अर्थाद्दक्षिणापृष्ठगाश्चशुभाः उक्तंच पृष्ठतोद

भूमिद्यब्ध्यद्रिदिक्सूर्योगाष्टांकेशाग्निसायकाः १ २ ४ ७ १० १२ ६ ८ ९ ११ ३ ५ मेषादिघातलग्नानियात्रायांवर्जयेत्सुधीः ३३ नवभूम्यःशिववक्त्रयोक्षविश्वेऽर्क कृताःशक्ररसास्तुरंगतिथ्यः द्विदिशोभावसवश्वपूर्वतःस्युस्तिथयःसंमुखवाम गानशस्ताः ९ १ ११ ३ ५ १३ १२ ४ १४ ६ ७ १५ २ १० ३० ८ ॥३४॥ कौबेरी तोवैपरीत्येनकालोवारेऽर्कद्येसंमुखेतस्यपाशः रात्रावेतौवैपरीत्येनगण्योयात्रा युद्धेसंमुखेवर्जनीयौ ३५ क्षिणेचापियोगिनीगमनेहिता वामसंमुखयोर्नेष्टावायुमेवंविचिंत येदिति ३६ अथकालपाशयोगंशालिन्याह कौबेरीत्यादि कौबेरीउत्तरादिकृतस्याः विपरीतदिक्कअर्कद्येवारेकालःस्यात् तद्यथा रवावुत्तरदिशिकालः दक्षिणेपाशइत्यर्थः चंद्रेवायव्यांकालः आग्नेय्यांपाशः एवंभौमादिष्वपि रात्रौकालदिशिपाशइतिवैपरीत्यंज्ञेयम् एतौयात्रायुद्धादिषुसंमुखेवर्ज्यौ उक्तंचस्वरोदये वामोत्थः पूर्वदिग्भागेततः सव्येनमंदगः यत्रस्थस्तत्रकालः स्यात्पाशस्तस्यतुसंमुखः दक्षिणस्थः शुभः का

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लः पाशोवामदिगाश्रयः यात्रायांसमरेश्रेष्ठस्तनोन्यत्रनशोभनइति मसंगादर्धयामाराहुरपिस्वरोदयस्थो लिख्यते इंद्रवायुयमरुद्रनोयाग्निशशिमारुते यामार्धमुदितोराहुर्भमत्येवंदिगष्टकेइति ३५ अथपरि घदंडारव्यंदोषमनुष्टुभाह पूर्वादिक्षिति अनलर्क्षतः कृत्तिकातः सप्तभानिपूर्वस्याम् मघातः सप्तयाम्यायां अनुराधातःसप्तपश्चिमायाम् धनिष्ठातः सप्तभान्युत्तरस्यांरेखाइतिसर्वत्रवाक्यशेषः तत्रवायव्याग्नेयदि गुपनिबद्धरेखापरिघोदंडःस्यात् ससर्वथानोल्लंघयेत् तत्रयवनेश्वरः प्राचीमुदग्द्वारिभिरत्रयायात्या ग्द्वारिकैश्चोडुभिरप्युदीचीम् तथैवयाम्यामपराश्रितैर्भैर्याम्याश्रयैश्चाप्यपरांप्रयायादिति ३६ अथवि

पूर्वादिक्षुचतुर्दिक्षसप्तसप्तानलर्क्षतः वायव्याग्नेयादिकृसंस्थंपारिघंनैव लंघयेत् ३६ अग्नेर्दिशंनृपइयात्पुरुहूतदिगभैरेवंप्रदक्षिणगताविदिशो थकृत्ये आवश्यकेपिपरिघप्रविलंघ्यगच्छेच्छूलंविहाययदिदिक्कृतनुशुद्धि रस्ति ३७ दिक्षुगमेनक्षत्राणिदेशंआवश्यकृत्येनिंद्यदंडापवादंचवसंततिलकयाह अग्नेर्दिशा मिति नृपः पुरुहूतदिक्प्राचीतस्थैः कृत्तिकादिसप्तनक्षत्रैः अग्नेर्दिशमाग्नेयीमियात्गच्छेत् एवमनेन प्रकारेणप्रदक्षिणगताः सृष्टिमार्गेणस्थिताविदिशोनैर्ऋत्यादीर्गच्छेत् यथा मघादिसप्तभिः नैर्ऋत्याम् अनुराधादिसप्तभैर्वायव्याम् धनिष्ठादिसप्तभैरैशानींगच्छेदित्यर्थः अथेति आवश्यकेकृत्येकर्त्तव्येप रिघदंडमपिलंघयित्वानृपोगच्छेत् परंतुशूलंनक्षत्रशूलंविहायत्यक्त्वा यदिदिक्कृतनुशुद्धिरस्ति पूर्वादि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिक्कमेषादयस्त्रिराशयादिग्राशयस्त्रयः स्युः क्रमशोमेषाद्यएवतस्यांदिशिदिग्लग्नशब्देनव्यवह्रियंते तेषांशक्रेशुभफलदानेग्रहानुकूलसाहित्यंस्यात् दिग्राशीनाहनारदः दिग्राशायः स्युः क्रमशोमेषाद्या श्चपुनःपुनरिति ३७ अथदशभिरिंद्रवज्रयाह मैत्रार्केति अनुराधाहस्तपुष्याश्विनीनक्षत्रैः सर्वासुदिशा सूचतुर्दिक्षुतज्ज्ञैः ज्योतिषिकैर्यात्राशुभानिगदिता यत्तुबालिकाविवेकादौप्रागादिषु श्रवणाश्विपुष्यह स्तानांत्यागउक्तः सनिर्मूलत्वादुपेक्ष्यः क्वचिद्दृष्टौसर्वदिग्द्वारकाण्युक्तानि गुरुः पुष्याश्विहस्तमैत्राणि पौष्णवैष्णवसौम्यधनम् वासवंसर्वदिक्ष्वाशुयात्रायांशोभनानिहीति वराहः सर्वद्वारिकसंज्ञितानि

मैत्रार्कपुष्याश्विनिभैर्निरुक्तायात्राशुभासर्वदिशासुतज्ज्ञैः वक्रीग्रहःकेंद्र गतोस्यवर्गोलग्नेदिनंचास्यगमेनिषिद्धम् ३८ सौम्यायनेसूर्यविधूतदोत्तरं प्राचीव्रजेत्तोयदिदक्षिणायने गुरुमंहस्ताश्विमैत्राणिचश्रेष्ठान्येंदवपौष्णाविष्णुवसुभा न्याद्यैःसहाष्टौसदेति वक्रीग्रहइति-वक्रीग्रहोयदिकेंद्रगःस्यात्सगमेयात्रायांनिषिद्धः अथवाऽस्यव क्रीग्रहस्यलग्नेवर्गः षट्वर्गश्चेत्स्यात्सोपिगमनेनिषिद्धः वाऽस्यवक्रीग्रहस्यदिनंवारोपिगमनेनिषिद्धम् ३८ अथायनशूलमिंद्रवज्रयाह सौम्यायनेति यदिसूर्यचंद्रौसौम्यायनेउत्तरायणेगतौस्यातांतदाउ त्तरांप्राचींवाव्रजेत् तद्दिग्भुवायात्राशुभेत्यर्थः यदितुरविचंद्रौदक्षिणायनगतौस्यातांतदाप्रतीचींद क्षिणांवाव्रजेत् अथतयोर्भिन्नायनस्थेअयनभेदेसतिदिवानिशंव्रजेत् यथा सूर्योयस्मिन्नयनेतांदिशं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिवाव्रजेत् चंद्रोयस्मिन्नयनेतांदिशंरात्रौयायात् अत्रोत्तरस्यांपूर्वस्या अंतर्भावः दक्षिणस्यांपश्चिमाया
इति रत्नकोशे दिनकरकरप्रतप्तांमकरादावुत्तरांचपूर्वांच यायाच्चकर्कटादौयाम्यामाशांप्रतीचींचेति अतो
न्यथाचेत्कुर्यात्तदावधोमरणंभवेत् भिन्नायनत्वेसतिसूर्योयस्मिन्नयनेतांदिशायदिरात्रौगच्छेत् चंद्रो
यस्मिन्नयनेतांदिवागच्छेत्तदायातुर्वधोभवेदित्यर्थः ३१ अथसंमुखशुक्रदोषमुपजात्याह उदेतीति
शुक्रोयस्यांदिशिप्राच्यांप्रतीच्यांवाकालवशेनोदयंकरोतितत्रगंतुः पुंसः शुक्रः संमुखः अयमेकःप्रकारः
अथवागोलभ्रमवशेनयत्रयस्यांदिशिउत्तरस्यांदक्षिणस्यांवायदिगच्छेत्तत्रगंतुः पुंसः संमुखशुक्रःस्या

यत्प्रत्यगाशांचतयोर्दिवानिशंभिन्नायनत्वेयवधोन्यथाभवेत् ३१ उदेति यस्यांदिशियत्रयातिगोलभ्रमाद्यथककुभ्भसंघे

त् अयंद्वितीयप्रकारः अथयत्रककुप्भसंघेप्राच्यादिदिशिकृत्तिकादिन्यासवशेनयद्दृङ्नक्षत्रेचरतित
त्रदिशिगंतुः संमुखशुक्रस्यादित्ययंतृतीयःप्रकारःस्यात् अत्रिः यद्दिगतः समुदयेद्दिक्चरेद्यत्रगोलके य
द्वारभेषुविचरेत्त्रिविधंप्रतिभार्गवमिति यत्रोदितइति यस्यांदिश्युदितः शुक्रोदृश्यतेतांदिशमेवनगच्छेत्
अन्यदिश्यपियथासंभवंनेयात् मूढेशुक्रेकार्यहानिः प्रतिशुक्रंपराजयइतिनारदोक्तेः अवश्यकर्त्तव्येगम
नेशांतिमाहवसिष्ठः भृगुलग्नेभृगोर्वारेभृगुवर्गेभृगूदये उपोष्यभृगुवारेणियावच्छुक्रोदयंप्रति रजतेनै
वशक्रेनकारयेत्प्रतिमांभृगोः लिखेदष्टदलंपद्मंकांस्यपात्रेचतंडुलैः शुक्रसूक्ष्मांबरैर्वेष्टयप्रतिमांतत्र पूज

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येत् शुक्लपुष्पाक्षतैर्गंधैर्मुक्ताहारैर्विचित्रितैः उपचाराणिकार्याणिशुक्रतेअन्यदित्यृचा तन्मंत्रेणजपं कुर्यात्सम्यगष्टोत्तरंशतम् कर्मांतेतेनमंत्रेणभक्त्याचार्घ्यंप्रदापयेत् श्वेतगंधाक्षतैःपुष्पैः क्षीरमिश्रेणवारिणा दैत्यमंत्रादिवादशीचोशनाभार्गवःकवि श्वेतोथमंडलीकाव्योविधिस्थोभृगवेनमः दत्वेत्यर्घ्यंप्रयत्नेनप्रार्थयेदेवभक्तितः अनेनैवतुमंत्रेणप्रांजलिःप्रणतःस्थितः त्वत्प्रसूतयानयाशुक्रसंसुखसमुद्भवम् दोषंविनाशयक्षिप्रंरक्षमांतेजसांनिधे इतिप्रार्थ्यप्रयत्नेनप्रतिमाभूषणान्विता दैवज्ञायैवदातव्याश्वेतावस्त्रसहितैवसा शिष्टेभ्योदक्षिणांदद्याद्यथावित्तानुसारतः ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः

त्रिधोच्यतेसंमुखएवशुक्रोयत्रोदितस्तांतुदिशंनयायात् ४० वक्रास्तनी चोपगतेभृगोःसुतेराजाव्रजन्यातिवशंहिविद्विषाम् बुधोनुकूलोयदित त्रसंचलन्रिपून्जयेन्नैवजयःप्रतीदुजे ४१

इतरेषांग्रहाणांचपूजांकुर्यात्प्रयत्नतः तत्तत्संमुखजोदोषस्तत्क्षणादेवनश्यति दीपिकायांतुदानमेवोक्तम् सितमश्वंसितंछत्रंहेममौक्तिकसंयुतम् ततोहिजातयेदद्यात्प्रतिशुक्रप्रशांतयइति ४० अथवक्रास्तादिदोषंसापवादमुपजात्याह वक्रास्तेति भृगोःसुतेशुक्रेवक्रोपगतेअस्तोपगतेनीचोपगतेचउपलक्षणत्वाद्वृद्धयुद्धपराजितेवर्णरहितेवासति राजापरराष्ट्रंव्रजन्सन्नहिनिश्चयेनविद्विषांशत्रूणांवशंयाति वन्द्योभवतीत्यर्थः भरद्वाजः विवर्णोविजितेनीचेवक्रितेवासितेस्तगे शत्रुक्षेत्रगतेवापितदंशेतन्निरीक्ष

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षिते भौमांशे भौमसंयुक्ते मंदांशे मंदसंयुते यात्रानैवप्रकुर्वीतलक्ष्म्यायुर्बलहानिदेति बुधइति न
त्रशुक्रास्तेयदिबुधोनुकूलः पृष्ठदिक्संस्थोभवेत्तदासंचलन्सन्राजारिपून्शत्रून्जयेत् नैवेति मतौ
दुजेबुधेसंमुखेसतिगंतूराज्ञोनैवजयः किंतुपराजयः अयंतुप्रतिशुक्रविचारोनृणांप्रथमगमनेराज्ञांतुस
मरयात्रायामाहुरेभ्यः प्रतिशुक्रादिदोषोयंनूतनेगमनेनृणाम् राज्ञांविजययात्रायांनान्यथादोषमर्हतीति
४१ अथविशेषंशास्त्रिन्याह यावच्चंद्रइति चंद्रोयदापूषभाद्रेवतीनक्षत्रादारभ्यकृत्तिकाद्येपादेरेवत्य
श्विनीभरणीकृत्तिकाप्रथमचरणेचयात्तिष्ठेतितावच्छुक्रोधोज्ञेयः दृष्टोपिशुक्रोदर्शनकार्यनकरोतीत्य

**यावच्चंद्रः पूषभात्कृत्तिकाद्येपादेशुक्रोधोनदुष्टोयदक्षे मध्येमार्गेभार्गवा
स्तेपिराजात्तावत्तिष्ठेत्संमुखस्थेपितस्य ४२**

र्थः यः तदेवाहनदुष्टइति अंधोयदाअग्रेसंमुखेदक्षेदक्षिणभागेचदुष्टोनस्यात् मध्येमार्गमिति सप्तमु
हूर्त्तप्रस्थितोपिराजामध्यमार्गेमार्गमध्येयदिशुक्रास्तोभवेतावत्कालंतस्मिन्नेवप्रयाणेतिष्ठेत् यावच्छुक्रो
दयोभवेत् यदिगच्छतोराज्ञोदैवात्संमुखः शुक्रश्चेत्तावदस्यशुक्रस्यसंमुखस्थेपितस्मिन्नेवप्रयाणेतिष्ठेत्
उपलक्षणत्वादुरावप्येवंविधेद्रष्टव्यम् पराशरःजीवः शशांकः शुक्रोवामार्गमध्येस्तगोयदि तत्रैवनिवसे
द्राजायावदभ्युदितोभवेदितिमार्गमध्येबुधास्तेनदोषः यदातुमार्गमध्येबुधोदयोभवेत्सचपुनः संमुखोभा
वेत्तदातुपुनर्दोषएव वसिष्ठः संमुखश्चंद्रजोयत्रमार्गमध्योदितोयदि यावदस्तंगतेतस्मिंस्तावतत्रैवसंव
सेदिति ४२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथनिषिद्धलग्नमनुष्टुभाह कुंभकुंभांशकेतिस्पष्टार्थः ४३ अथान्यन्मंजुभाषिण्याह अथमीनलग्न इति मीनलग्नेलग्नांतरेवामीनांशकेचलितराज्ञोवर्त्मपंकंस्यात् जनीति जनिर्जन्मकालीनंलग्नंजन्मभंजन्मराशिस्तयोर्जन्मलग्नराश्योःपतीस्वामिनौशुभग्रहौसौम्यग्रहौचेदुदयलग्नेभवनस्तदागमोगमनं शुभंस्यात् जन्मलग्नंजन्मराशिश्चयात्रालग्नगंशुभमितिपागेवाभिहितम् जननराशितनूर्यदिलग्नगइति अर्थाज्जन्मलग्नजन्मराशिस्वामिनोपापग्रहौयदियात्रालग्नेस्यातांतदाताद्दशेलग्नेगमनमशुभफलमित्यर्थः वसिष्ठः जन्मराशौलग्नगतेतद्दशेवाविलग्नगे अभीष्टफलदायात्राराशीराश्चेच्छुभग्रहः स्मृता

कुंभकुंभांशकेत्याज्यौसर्वथायत्नतोबुधैः तत्रप्रयातुर्नृपतेरर्थनाशःपदेपदे ४३ अथमीनलग्नउतवातदशकेचलितस्यवर्त्मभिहवर्त्मजायते जनिर्लग्नजन्मभपतीशुभग्रहौभवनस्तदातदुदयेशुभोगमः ४४ जन्मराशितनुतोष्टमेथवास्वारिभाच्चरिपुभेतनुस्थिते रदेन जन्मराश्युद्गमेनैवजन्मलग्नोदयःशुभः तयोरुपचयस्थानंयदिलग्नगतंशुभमिति जन्मराशिर्यात्रालग्नेनिषिद्धउक्तः सजन्मराशेः पापग्रहस्वामिलेज्ञेयः शुभस्वामिलेपागुक्तवसिष्ठवाक्यंस्वरसंस्यात् एवंजन्मलग्नोदयः शुभइत्यत्रापिजन्मलग्नस्थशुभस्वामिलेशुभफलतापापस्वामिलेइतिव्याख्येयम् ४४ अथान्यद्यथोद्दनयाह जन्मराशितनुतइति स्वजन्मराशेर्जन्मलग्नाच्चवाऽष्टमेराशौलग्नस्थितेसतितथारिभात्जिगमिषितशत्रोर्भाद्राशेर्ल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्नात् रिपुभेषष्ठराशौलग्नस्थितेसति अथवातेषांस्वराशिलग्नाभ्यांअष्टमभवनेस्वशत्रुराशेर्जन्मराशिल
ग्नाभ्यांषष्ठभवनेएषांस्वामिनोयात्रालग्नगताःस्युर्यदातदाराज्ञोमृत्युप्रदाः ४५ अथान्यच्चुभलग्नंशालि
न्याह लग्नेचंद्रइति मीनकुंभवर्जितेकस्मिंश्चिल्लग्नेवर्गोत्तमनवांशस्थेअथवाचंद्रेवर्गोत्तमस्थेसतियात्रा
वांछितार्थस्यमनोभीष्टार्थस्यैकाअद्वितीयादात्री अंभोराशाविति जलराशौलग्नगतेसतिअथवालग्नांत
रेतदंशेजलराश्यंशेसतिनौकायानंसर्वसिद्धिप्रदायिस्यात् ४६ अथान्यदिंद्रवज्रयाह दिग्द्वारभेइति पू

लग्नगास्तदधिपायदाथवास्युर्गतंहिनृपतेर्मृत्युप्रदम् ४५ लग्नेचंद्रेवापिव
र्गोत्तमस्थेयात्रोक्तावांछितार्थैकदात्री अंभोराशौवातदंशेप्रशस्तंनौका
यानंसर्वसिद्धिप्रदायि ४६ दिग्द्वारभेलग्नगतेप्रशस्तायात्रार्थदात्रीजयकारि
णीच हानिंविनाशंरिपुतोभयंचकुर्यात्तथादिक्प्रतिलोमलग्ने ४७

र्वादिदिक्षुमेषाद्याः क्रमाद्दिग्द्वारराशयइति दिग्राशिषुगंतव्यदिगवस्थितेषुसमुत्थायुत्रात्रप्रशस्ता अश
स्तत्वमाह अर्थदात्रीजयकारिणीनेति यथा मेषः पूर्वस्याम् वृषोदक्षिणस्याम् मिथुनः पश्चिमाया
म् कर्कउत्तरस्याम् एवंसिंहादयोधनुरादयश्चपूर्वादिषुज्ञेयाः हानिमिति दिक्प्रतिलोमलग्नेविप
रीतदिगवस्थितेलग्ने यथा पश्चिमायांमेषः उत्तरस्यांवृषः पूर्वस्यांमिथुनः दक्षिणस्यांकर्कः एवंपुनःप

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्विमादिषु सिंहादयोधनुरादयश्चज्ञेयाः तादृशेलग्नेगंतुः यात्राहानिंद्रव्यादिनाशंशत्रुतोभयंचकुर्यात् दिग्द्वारभेलग्नगतेयात्रार्थेविजयप्रदा लग्नेदिक्प्रतिलोमेसाहानिदाशत्रुभीतिदेतिवराहोक्तेः ४७ अथशुभलग्नानिवसंततिलकयाह राशिरिति गंतुःपुंसः स्वजन्मसमयेयोराशिः शुभग्रहैश्चंद्रबुधगुरु शुक्रैः संयुतोस्तिसराशिर्यात्रालग्नोपगःशुभः अथवास्वारिभात्स्वशत्रुजन्मराशिजन्मलग्नादृष्टमोयो-राशिः सचेद्यात्रालग्नोपगतःशुभःस्यात् अथयोराशिर्वेशिसंज्ञःजन्मसमयेसूर्यक्रांतराशेर्द्वितीयोरा-शिर्वेशिसंज्ञः सचेद्यात्रालग्नोपगःस्यात् तदागमनेजयदःस्यात् अथवाभूपयोगैर्जातकोक्तैराजयोगैर्या

राशिःस्वजन्मसमयेशुभसंयुतोयोयःस्वारिभान्निधनगोपिचवेशिसंज्ञः
लग्नोपगःसगमनेजयदोथभूपयोगैर्गर्गोविजयदोमुनिभिःप्रदिष्टः ४८
सूर्यःसितोभूमिसुतोथराहुःशनिःशशीज्ञश्चबृहस्पतिश्च प्राच्यादितो
दिक्षुविदिक्षुचापिदिशामधीशाःक्रमतःप्रदिष्टाः ४९ केंद्रेदिगधीशोगछे
द्वनीशःलालादिनितस्मिन्नेयादरिसेनाम् ५०

त्रालग्नस्थितैर्गर्गोमुनिभिर्विजय
दःप्रोक्तःजातकेराजयोगाद्दृष्ट्वाः ५१ अथदिक्स्वामिनउपजातिकयाह सूर्यःसितइतिस्पष्टार्थम् ४९ अथदिगीशप्रयोजनंमध्याछंदसाह केंद्रेइति तस्मिन्दिगीशेलालादिनिसतिअरिसेनांनेयात्नग च्छेत् ५० अथलालादियोगान्शार्दूलविक्रीडितेनाह प्राच्याद्याविति प्राच्याद्यष्टदिक्षुक्रमेणविलग्नस

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दनात् एतेषुभावेषुसूर्यादिग्रहस्थितालाल्लाटिकाःस्फरितिवाक्यार्थः यथा तनौलग्नस्थः तरणिः सूर्यः प्राच्यांगंतुर्लीलाटिकः एवंभृगुसूतोलाभव्ययेआग्नेय्याम् कर्मस्थोभूसूतोदक्षिणस्याम् तमोनवाष्टमगृहेनैर्ऋत्याम् सौरिःसप्तमेपश्चिमायाम् चंद्रःशत्रुगृहात्मजेवायव्याम् बुधःपातालगउत्तरस्याम् गीष्पतिर्वित्तभ्रातृगृहेईशान्यांगंतुर्लीलाटिकइत्यर्थः कश्यपेनतुसूर्यराशिवशेनलाल्लाटिकाउक्तास्तेयथा दिनेशाधिष्ठितोराशिर्यदालग्नगतस्तदा यातुर्मृत्यप्रदः प्राच्यांदिशिसूर्योललाटगः सूर्यस्यराशितस्तस्माद्दशोलग्नगेगृहे एकादशेवाआग्नेय्यांदिशिशुक्रोललाटगः ललाटगःकुजो

प्राच्यादौतरणिस्तनौभृगुसुतोलाभव्ययेभूसुतः कर्मस्थोथतमोनवाष्टमगृहेसौरिस्तथासप्तमे चंद्रःशत्रुगृहात्मजेपिचबुधः पातालगोगीष्पतिर्वित्तभ्रातृगृहेविलग्नसदनाल्लालाटिकाः कीर्तिताः ५१

याम्येदशमेलग्नगेगृहे लग्नगेनवमेराशावष्टमेवापिनैर्ऋते ललाटगःसैंहिकेयोयातुर्दाक्निधनप्रदः लग्नगेसप्तमेराशौशनिःमत्यक्ललाटगः षष्ठराशौलग्नगतेपंचमेवापिचंद्रमाः ललाटगोवायुदिशियातुर्मृत्यप्रदस्तदा चतुर्थराशौलग्नस्थेबुधः सौम्येललाटगः राशौतृतीयेलग्नस्थेद्वितीयेचंद्रपूजितः ललाटगश्चंद्रमौलेर्दिशियातुर्विनाशदइति अत्रललाटव्यतिरिक्तेकंटकस्थानेयदिदिगधीशस्तिष्ठतितदायात्राशक्याःन्यथाह्यशोभनेतितत्त्वम् ५१ छ छ छ छ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथपर्युषितयात्रायोगचतुष्टयमनुष्टुभेंद्रवज्रयाचाह मृगेति प्रस्थायेति गृहेस्वगृहाद्यातव्यदिगभि
मुखंकस्यचिदिष्टस्यगृहेगत्वाप्रस्थायआर्द्रायांतस्मिन्नेवगृहेस्थित्वोषित्वादितोपुनर्वसौगच्छन्तद्गृहंत्य
क्त्वाग्रामाद्बहिरेवगच्छन्नरिपून्शत्रून्जयेत् अयमेकोयोगः एवमेवानुराधायांप्रस्थायशाक्रेज्येष्ठायां-
स्थित्वामूलेव्रजन् तथाजयेदित्यर्थः अयंद्वितीयोयोगः ५२ तथाहस्तेप्रस्थायानिलतक्षधिष्ण्येस्वातीवि
त्रेस्थित्वाहिदैवेविशाखायांजयार्थीभूपादिःप्रवसेद्देशांतरंगच्छेत् अयंतृतीयः वस्वंत्यपुष्येषुनिजसीम्नि

मृगेगत्वाशिवेस्थित्वादितोगच्छन्जयेद्रिपून् मैत्रेप्रस्थायशाक्रेहिस्थित्वा
मूलेव्रजंस्तथा ५२ प्रस्थायहस्तेनिलतक्षधिष्ण्येस्थित्वाजयार्थीप्रवसेद्दिदै
वे वस्वंत्यपुष्येनिजसीम्निचैकरात्रोषितःक्ष्मांलभतेवनीशः ५३ उषःकालो
विनापूर्वागोधूलिःपश्चिमांविना विनोत्तरांनिशीथःसन्यानेयाम्यांविनाभि-
जित् ५४

स्वनगरप्रांतेप्रस्थितःसन्यद्येकरात्रोषितःस्यातदाऽवनीशोराजाक्ष्मांभूमिंशत्रो
रितिशेषः लभतेजयेनप्राप्नोतीत्यर्थः अयंचतुर्थोयोगः ५३ अथसमयबलमनुष्टुभाह उषःकालइ
ति सन्शब्दश्चरणचतुष्टयेपिसंबंध्यतेउषःकालः पूर्वांविनायानेयात्रायांसन् एवंसर्वत्र वराहेणतुदि
ग्विशेषः समयविशेषेप्रशस्तोभिहितः यथा पूर्वाण्हेतूत्तरांगच्छेन्मध्यान्हेपूर्वतोव्रजेत् अपराण्हेव्र
जेद्याम्यामर्धरात्रेतुपश्चिमामिति ५४ ७ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथलग्नादिभावानांसंज्ञाअनुष्टुभाह लग्नान्भावाइति हन्मनःस्यांतंहन्मानसंमनइत्यभिधानात् आगमःप्राप्तिः अन्यत्स्पष्टम् एवंविधसंज्ञाकथनप्रयोजनंतु क्रूरसाहित्येतत्तद्भावानांपीडा शुभग्रहसाहित्येतत्तद्भावानांशुभमित्यर्थः ५५ अथशालिन्याविशेषफलमाह केंद्रेकोणइति शुभग्रहाः यदिकेंद्रेकोणे १ ४ ७ १० ९ ५ स्युस्तदायानेशुभफलदाःस्युः पापारिव्ययषट्स्वेषु ३ ११ ६ १२ शुभफलदाःस्युः चंद्रोलग्नांत्यारिरंध्रे १ १२ ६ ८ नेष्टः अशुभफलदःशनिःस्वेदशमेनेष्टः शुक्रोस्तेसप्तमेनेष्टः लग्ने

लग्नाद्भावाःक्रमाद्देह १ कोश २ धानुष्क ३ वाहनं ४ ॥ मंत्रो ५ रि ६ र्मार्ग ७ आयुश्च ८ हृत् ९ व्यापारा १० गम ११ व्ययाः १२ ॥५५॥ केंद्रेकोणेसौम्यस्वेदाः शुभाः स्युर्यानेपापारिव्ययषट्स्वेषुचंद्रः नेष्टोलग्नांत्यारिरंध्रेशनिस्वेऽस्तेशुक्रोलग्नेंदुनगांत्यारिरंध्रे ५६ योगास्सिद्धिर्धरणिपतीनामृक्षगुणैरपिभूदेवानाम् इति लग्नेंदुयात्रालग्नस्वामीनगांत्यारिरंध्रेसप्तमद्वादशषष्ठमेषु चेत्तदानेष्टः अशुभफलदइत्यर्थः गुरुःलग्नपोमृत्युदोयानेरंध्रास्तारिव्ययोपगः केप्याहुर्भयदोधर्मे शेषस्थानेशुभावहइति ५६ अथयोगयात्राव्याख्यायते तदारंभप्रयोजनंपादाकुलकेनाह योगादि ति धरणिपतीनांराज्ञांयोगाद्वक्ष्यमाणयोगयात्रालग्नवशाद्दृष्टेपिनिष्प्रत्यूहोसिद्धिर्वांछितकार्यनिष्पत्तिः स्यात् भूदेवानांब्राह्मणानांऋक्षगुणैर्नक्षत्रगुणैश्चंद्रबलतारबलविहितनक्षत्रादिभिःसिद्धिर्भवति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपिशब्दात्पंचांगशुद्ध्यादिधनावश्यकता चौराणांवक्ष्यमाणैःशुभसूचकशकुनैःसिद्धिर्भवति एतद्वि
ज्ञानांमनुजानांमुहूर्तात् गिरिशभुजगमित्राद्इतिविहितनक्षत्रस्वामिकमुहूर्त्तात्सिद्धिर्भवति ५७ अथ-
योगयात्रालग्नंमंजुभाषिण्याह सहजेरविरिति रविःसहजेतृतीयेस्यात् शशीचंद्रोदशमभेदशमस्थाने
शनिमंगलौरिपुगृहेषष्ठस्थानेस्यातांसितःसप्तमेबुधोहिबुकेचतुर्थे गुरुरपिलग्नगश्चेत्स्यात् एवंवि
धेयोगेराजाप्रचलितः अचिरात्स्वल्पकालेनैवारीन्जयतिवशीकरोतीत्यर्थः ५८ अथयोगांतरंगाथयाह

चौराणामपिशकुनैरुक्ताभवतिमुहूर्तादपिमनुजानाम् ५७ सहजेरविर्द
शमभेशशीतथाशनिमंगलोरिपुगृहेसितःसप्तमेहिबुकेबुधोगुरुरपीहलु
ग्नगःसजयत्यरीन्प्रचलितोऽचिरान्नृपः ५८ भ्रातरिसौरिभूमिसुतोवै
रिणिलग्नेदेवगुरुः आयगतेर्केशत्रुजयश्चेदनुकूलोदैत्यगुरुः ५९ तनो
जीवइंदुर्मृतौवैरिगोऽर्कः प्रयातोमहीद्रोजयत्येवशत्रून् ६०

भ्रातरिसौरिरिति भ्रातरितृतीयेशनिः वैरिणिषष्ठेभूमिसुतोमंगलः अर्केआयगतेएकादशेएवं-
विधेयोगेराजाशत्रुजयीभवेत् चेद्दैत्यगुरुः शुक्रोऽनुकूलःयातव्यदिक्पृष्ठवर्तीभवति ५९ अन्यद्यो
गांतरंगाथयाह तनोजीवइति स्पष्टार्थः तथाचनारदः जीवार्कचंद्रालग्नारिरंध्रगायदिगच्छतः तस्या
ग्रेस्वलमैत्रीचनस्थिरारिपुवाहिनीति ६० ७ ७ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथान्ययोगंपंक्त्याह लग्नगतइतिलग्नेगुरुःस्यात् अन्येग्रहालाभधनस्थाः एकादशद्वितीयस्थाश्चे
देवंविधेयोगेराज्ञोविजयः ६१ अन्ययोगमन्तयाह द्यूनेइति-चंद्रेससप्तमस्थेसतिभर्केससुदयगेऽस्त
गेसति जीवेशुक्रेविदिबुधेएतेषुत्रिषुधनुसंस्थेषुसत्सुएवंविधेयोगेनरेशश्चेत् चलतितदाशत्रून्जेता
जेष्यति कःकानिवगरुडोहीन्सर्पान्यथाजयति ६२ अथान्ययोगंचित्रपदयाह चित्तगतइति बुधोद्वि
तीये वासरनाथः सूर्यस्तृतीये शुक्रेलग्नेएवंविधेयोगेचेद्राजाचलतितदाशत्रवोराजानः शलभाइव-

लग्नगतःस्याद्देवपुरोधाः लाभधनस्थैः शेषनभोगैः ६१ द्यूनेचंद्रेससुदय
गेर्केजीवेशुक्रेविदिधनसंस्थे ईदृग्योगेचलतिनरेशोजेताशत्रून्गरुडइवा
हीन् ६२ चित्तगतःशशिपुत्रोभ्रातरिवासरनाथः लग्नगतेभृगुपुत्रे स्युःश
लभाइवसर्वे ६३ उदयेरविर्यदिसौरिररिगःशशीदशमेपि वसुधापतिर्यदि
यातिरिपुवाहिनीवशमेति ६४ स्युः यथा शलभाअग्नौस्वयमेवगत्वापतंति तथाशत्र
वोपिगंतृराजप्रतापानलेपतिष्यंतीत्यर्थः ६३ अथान्ययोगंगाथयाह उदयेरविरिति उदयेरविः शनिः
षष्ठःचंद्रोदशमःस्यात् एवंविधेयोगेवसुधापतीराजायदियातितदारिपुवाहिनीशत्रुसेनावशमेति
६४ अथान्यद्योगद्वयंजलोद्भूतगत्याह तनौशनिकुजाविति इतआरभ्यवसुधापतिर्यदियातिरिपुवा
हिनावशमेनीत्यन्तरार्द्धंसहजेकुजेइत्येतत्पर्यंतमनुवर्त्तते तेनयत्रनिर्देशोनास्तितत्राजिगमिषोराज्ञोवि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जयःस्यादितिवाक्यार्थोज्ञेयः तनौलग्नस्थौशनिमंगलौस्याताम् रविर्दशमे बुधोलाभदशमेस्यात् भृगुसूनुतोबालाभेदशमेवास्यात् एवंविधेयोगेप्रचलितस्यराज्ञोयमेकोयोगः अथद्वितीयः त्रिलाभरिपुभेषु ३ ११ ६ एषान्यतमस्थानस्थितौभृसूनुशनीस्याताम् यस्मिन्कस्मिंश्चित्स्थानेगुरुज्ञभृगुजाबलयुताःस्युस्तदा एवंविधेयोगेतथाराज्ञोविजयइत्यर्थः ६५ अथान्ययोगंस्वरितगतिश्चन्नजनगौरित्यनेनछंदसाह समुदयगेइति समुदयगेलग्नस्थे बृहस्पतौसति हिमकिरणेचंद्रे मदनगतेसप्तमस्थेसति चतुर्थस्थौबुधशुक्रौस्याताम् खलखचराः पापग्रहाःसहजगताःतृतीयगाःस्युःएवं-

तनौशनिकुजौरविर्दशमभेबुधोभृगुसूनुतोपिलाभदशमे त्रिलाभरिपुभे षुभृसूनुशनीगुरुज्ञभृगुजास्तथाबलयुताः ६५ समुदयगेविबुधगुरौमदनगतेहिमकिरणे हिबुकगतौबुधभृगुजौसहजगताःखलखचराः ६६ त्रिदशगुरुस्तनुगोमदनेहिमकिरणोरविरायगतः सितशशिजावपिकर्मगतौरविसूनुभूमिसूनुतौसहजे ६७ विधेयोगेवसूधापतिर्यदियातिरिपुवाहिनीवशमेति ६८

अथान्ययोगंसंसुख्यानजलजगैर्गहितासूरवातिलक्षणलक्षितयाह त्रिदशगुरुरिति बृहस्पतिर्लग्ने चंद्रःसप्तमे शुक्रबुधौदशमे सूर्यएकादशेशनिमंगलौसहजगतौतृतीये एवंविधेयोगेगंतूराज्ञोविजयएव ६७ अथान्ययोगंस्यादनुकूलाभतनगगश्चेतिलक्षणलक्षितयानुकूलयाह देवगुरावितिगु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रौचंद्रेवालग्नेसति सूर्येषष्ठे बुधःपंचमस्थाने शनिर्दशमेशुक्रश्चतुर्थेस्यात् एवंविधेयोगेजिगमिषो राज्ञोविजयएव ॥ अथान्ययोगंननररघटितानुमंदाकिनीतिलक्षणलक्षितयामंदाकिन्याह हिम किरणरति बुधोबलीचेतनौलग्नेस्यात् प्रीतिनिश्चयेनबृहस्पतिश्चेत्केंद्रगतःयदिनिर्बलोनीचाद्यशु भाधिकारप्राप्तोबलरहितःसन्द्वादशतृतीयषष्ठनवमानामन्यतमस्थानस्थश्चंद्रस्तथैवंविधेयोगेगंतू राज्ञोविजयएव ॥ अथान्ययोगंअभिनवतामरसंनजजायरतिलक्षणलक्षितेनाभिनवतामरसछंद

देवगुरौवाशशिनितनुस्थेवासरनाथेरिपुभवनस्थे पंचमगेहेहिमकरपुत्रः
कर्मणिसोरिःसुहृदिसितश्च ॥ हिमकिरणसुतोबलीचेत्तनौत्रिदशपति
गुरुर्हिकेंद्रस्थितःव्ययगृहसहजाराधर्मस्थितोयदिभवतिनिर्बलश्चंद्रमाः
॥ अशुभखगैरनवाष्टमदस्थैर्हिबुकसहोदरलाभगृहस्थःकविरिहकेंद्र
गगीष्यतिदृष्टोवसुचयलाभकरःखलुयोगः ॥ रिपुलग्नकर्महिबुकेशशिजे
परिवीक्षितेशुभनभोगमनैः

सार अशुभखगैरिति अशुभग्रहैःअनवाष्टमदनस्थैःनवमाष्टम
सप्तमस्थानव्यतिरिक्तस्थानस्थैःकविश्चक्रःचतुर्थतृतीयैकादशस्थानस्थःकेंद्रगतोगीष्पतिर्गुरुस्तेनदृष्टः १४०
एवंविधेयोगेवसुचयोद्रव्यसमूहस्तस्यलाभकरःस्यात् ॥ अथान्ययोगंयाभालग्नंप्रमिताक्षरासजसैर्युदि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेतिलक्षणलक्षितयाप्रमिताक्षराछंदसाह रिपुलग्नेति षष्ठलग्नदशमचतुर्थानामन्यतमस्थानस्थेषु
धेशुभनभोगमनैःकभग्रहैः परिवीक्षितेदृष्टेसतिद्वादशलग्नसप्तमस्थानव्यतिरिक्तस्थानस्थितैरशुभ
नामधरैःपापग्रहैरुपलक्षितेसतिएवंविधयोगेजिगमिषोराज्ञोविजयएव ७७ अथान्ययोगद्वयंसोत्यो
मणिमालाछिन्नागुहवल्लोरितिलक्षणलक्षितयाह लग्नेइति लग्नेगुरुःपापग्रहायदिलाभेएकादशेक
र्मण्यपिदशमेपिचेत्स्यः एवंविधयोगेप्रचलितस्यराज्ञोराज्याधिगमःराज्यप्राप्तिःस्यात् अथवाद्यूनेसप्त

व्ययलग्नमन्मथगृहेषुजयःपरिवर्जितेषशुभनामधरैः ७८ लग्नेयदिजी
वःपापायदिलाभेकर्मण्यपिचेद्राज्याधिगमःस्यात् द्यूनेबुधशुक्रोचंद्रोहि
बुकेवातद्वत्फलमुक्तंसर्वैर्मुनिवर्यैः ७९ रिपुतनुनिधनेशक्रजीवेंदवोत्य
थबुधभृगुजौतुर्यगेहस्थितौ मदनभवनगश्चंद्रमावाबुगःशशिसुतभृ
गुजातर्गतःश्चंद्रमाः ८०

मेबुधशुक्रौस्यातांचंद्रोहिबुकेचतुर्थेस्यादेवंविधयोगेसर्वैर्मुनिवर्यै
रद्वत्फलमुक्तंराज्याधिगमःस्यात् ८१ अथान्ययोगत्रयंननतनुरुभिश्चंद्रिकाश्चतुर्भिरितिलक्षण
लक्षितेनचंद्रिकाछंदसाह रिपुरिति अत्रस्थानांग्रहाणांचसाम्याद्यथासंख्यमन्वयःयथारिपौषष्ठेशुक्रः
लग्नेजीवः अष्टमेचंद्र एवंविधयोगेगंतूराज्ञोविजयएव अयमेकोयोगः अथद्वितीयः बुधभृगुजौतुर्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गेहस्थितौचतुर्थस्थानस्थौस्याताम् चंद्रसामदनभवनगःसप्तमस्थानस्थश्चेदेवंविधेयोगेगंतूराज्ञोविजयएव अथतृतीयोयोगः वाचंद्रमाअंबुगः चतुर्थगः शशिसूतभृगुजयोरंतर्गतत्वंएकराशावेवज्ञेयं अन्यथाचतुर्थस्थानस्थचंद्रस्यबुधशुक्रकृतदुरधरायोगमेवावक्षत् ७३ अथान्यद्योगद्वयंसजससगौ चकथितःकलहंसइतिलक्षणलक्षितेनकलहंसछंदसाह सितेति लग्नेशुक्रः सप्तमेजीवः षष्ठेभौमः चतुर्थेबुधः तृतीयेशनिः एवंविधेयोगेगंतूराज्ञोविजयएव एकोयोगः अथान्यः गुरुदिनेबृहस्पतिवारे अखिलखेटैः समस्तग्रहैः सूर्यादिभिः क्रमतोरिसोदरेत्यादिस्थानस्थितैर्यथा षष्ठेर्कः तृतीयेचंद्रः द

सितजीवभौमबुधभानुतनूजास्तनुमन्मथारिहिबुकत्रिगृहेचेत् क्रमतोरि
सोदररवशात्रवहोराहिबुकायगैर्गुरुदिनेखिलखेटैः ७४ सहजेकुजोनि
धनगश्चभार्गवोमदनेबुधोरविरशौतनोर्गुरुः अथचेत्स्फराज्यसितभानवोज
लत्रिगताहिसौरिरुधिरौरिपुस्थितौ ७५ शमेभौमः षष्ठेबुधःलग्नेगुरुः चतुर्थेशुक्रः ए
कादशेशनिः एवंविधेयोगेपिगंतूराज्ञोविजयएव ७४ अथान्यद्योगद्वयंसजसजगौचकथिताप्रबो
धिकेतिलक्षणलक्षितप्रबोधिकाछंदसाह सहजेइति तृतीयेभौमःअष्टमेशुक्रःसप्तमेबुधःषष्ठेसूर्यः
लग्नेगुरुःएवंविधेयोगेगंतूराज्ञोविजयएव अयमेकोयोगः अथान्यः अथेतिईज्यसितभानवोगुरुशुक्र
सूर्याजलत्रिगताः चतुर्थतृतीयस्थानस्थाः सौरिरुधिरौशनिमंगलौषष्ठस्थितौएवंविधेयोगेहिनिश्चितं
राज्ञोजयःस्यात् ७५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथनामविशेषपुरस्कारेणयोगत्रयंसफलंशार्दूलविक्रीडितेनाह एकइति ज्ञेज्यसितेषुबुधगुरुशुक्रेषुएकोपिबुधोवागुरुर्वाशुक्रोवाचेत्पंचमतपः केंद्रेषुतदायोगाख्योयोगः तथातेषुज्ञेज्यसितेषु द्वौचेत् बुधगुरू बुधशुक्रौगुरुशुक्रौवाचेत्पंचमतपः केंद्राणामन्यतमस्थानेस्थानभेदेनस्थानैक्येनवास्थितौस्यातां तदाधियोगाख्योयोगः सकलाः ज्ञेज्यसिताः एषुपंचमतपः केंद्राणामन्यतमस्थानेषुस्थानभेदेनस्थानैक्येनवास्थितास्तदायोगाधियोगाख्योयोगः फलमाह योगइति योगेव्रजन्राजाक्षेमंकुशलंलभतेकुशलेनगतागतंकरोतीत्यर्थः अथाधियोगेव्रजन्राजाक्षेमंतथारिपूणांवधंचलभते अथयोगाधियोगेव्रजन्रा

एकोज्ञेज्यसितेषुपंचमतपः केंद्रेषुयोगस्तथाद्वौचेत्तेष्वधियोगएषुसकलायोगाधियोगः स्मृतः योगेक्षेममथाधियोगगमनेक्षेमंरिपूणांवधंचाथोक्षेमयशोवनीश्चलभतेयोगाधियोगेव्रजन् ७६

जाक्षेमयशोवनीश्वकाराच्छत्रुवधंचलभते अत्रवसिष्ठादिभिर्बहूनियात्रालग्नानिअभिहितानितानितत्तद्ग्रंथेभ्यएवावधार्याणि ७६ अथान्येपियात्रायोगाल्लिख्यंते कश्यपः पंचमेज्ञोरविः षष्ठेवर्त्ततेनवमेगुरुः भाग्ययोगाभिधेयोगेनिहंतावैरिणांसदा १ गुरुःकेंद्रेत्रिकोणेवारविर्लाभेचकर्मणि कल्याणयोगोभूपस्ययातुःकल्याणकृत्भवेत् २ दिगीशोदिग्बलीचेत्स्याल्लग्नेशस्यसुहृद्यदि विजयोनामयोगोयंयातारांजाजयीभवेत् ३ अत्रिः सहजस्थानगोभौमोभाग्यस्थश्चबृहस्पतिः चिंतामणिसमाख्योयंयातुःसंकल्पपूरकः ४ लग्नेशुक्रःशशीबंधौ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मस्थानेगुरुर्यदा मृगेंद्रयोगोविख्यातोयातुःसर्वार्थसाधकः ५ लग्नेभौमोगुरुश्चिद्रेषष्ठस्थानेचभा स्करःमृत्युंजयसमाख्योयंसर्वशत्रुनिवर्हणः ६ आपोक्लिभगतेचंद्रेकेंद्रस्थेसूरपूजिते योगःकेंद्रदतिरया तोयातुरिष्टार्थसिद्धिदः ७ चंद्रोदयेगुरुश्चास्तेलग्नेवासूरपूजिते योगःपारावतोयातुःशुक्रेवालग्नकेंद्रगे प्रबलेयदियोगोसौगमनेसर्वसिद्धिदः ८ १ रविःषष्ठेसितश्चिद्रेतृतीयेभूमिनंदनः पिनाकियोगोविख्या तोयातुर्विजयकारकः १० अन्योन्यक्षेत्रगावेकक्षेत्रेवाकविभास्करौ मृत्युयोगोयमाख्यातोयातुर्मृत्युप्र दायकः ११ उच्चक्षेत्रगतश्चंद्रोत्यक्षीणश्चरविर्गुरुः संजीवनसमाख्योयंमृत्युयोगापहारकः १२ एक-र्क्षगौजीवशुक्रौस्यातामन्योन्यसप्तगौ भयंकरास्ययोगोयंयातुर्भीतिप्रदःस्मृतः १३ उच्चमूलत्रिकोणे षुवर्त्ततेगुरुभार्गवौ अभयाभिधयोगोयंभयंकरविनाशनः १४ भार्यशोव्ययगोनीचःपुत्रस्थानेशनै श्चरः विदारिकसमाख्योयंयातुःपत्नीनिहंत्यसौ १५ मार्गेशःशनिसंयुक्तःसप्तमेस्तंगतोग्रहः विदा रिकमिमंमन्येयातुःपत्नीविनाशकम् १६ सप्तमेचंद्रमास्तस्मात्सप्तमेनीचखेचरः कुटुंबहारकोयोगोया तुःप्रियतमांहरेत् १७ दुर्बलोयदिमार्गेशोनिवसेत्पापमध्यगः पापकुंजरयोगोयंयातुःपत्नीनिहंत्यसौ १८ मार्गेशात्सप्तमेभानुःपंचमेक्रूरखेचरः विदारिकाख्यएवासौभार्यामरिवशंनयेत् १९ स्वोच्चमूल त्रिकोणस्थःसौम्यःपापविवर्जितः आनंदार्णवयोगोयंधर्मेणैवजयावहः २० रत्नावल्यां उदयारिनभ स्तलगेदिनकृद्यमशीतकरेनभवत्सरयोभिसुखाहरिणाइवकेसरिणः २१ दैवज्ञवल्लभे ज्ञेसितेनस हितेस्तगेविधौबंधुगेभवसतामहाफजा संगरेरिपुगणोविकार्यतेतूलराशिरिवमातरिश्वना २२ मूर्त्ति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वित्तसहजेषुसंस्थिताःशुक्रचंद्रसूततिग्मरश्मयः यस्ययानसमयेरणांगणेतस्ययांतिशलभाइवारयः २१
यात्राशिरोमणौ योयातिजीवेतनुगेमहीशः क्रूरस्थितैर्व्योम्नथ वायसंस्थैः तस्यायतःसंयतिवैरिसेना
भीतिर्नृपाणामिवनास्थिरास्यात् २२ राजमार्त्तंडः लाभारिदुश्चिक्यगतोयमारौबलान्विताभार्गवजी
वसौम्याः यस्यप्रयाणेविलयंप्रयांतितस्यद्विषःसर्वरसंयथाम्बु २३ फलप्रदीपे लाभविक्रमसुखस्व-
स्थितेकवौकंटकस्थगुरुणानिरीक्षिते द्यूनरंध्रभवर्जितैःखलैःस्याद्गतोभिमतसिद्धिभाकृपः २६
सौम्यग्रहैःकेंद्रतपःसुतस्थैः क्रूरैस्त्रिलाभारिगतैर्गतायेकोपानलःशांतिमुपैतितेषांविरोधिनारीनय
नांबुपातैः २७ वराहः एकोपिजीवार्ककुजार्कजानांस्वोच्चेविलग्नेस्वगृहेयदींदुः जातस्ययांत्यत्रपराःप्र
णाशंमहाकुलानीवकुटुंबभेदैः २८ चंद्रेस्तगेदेवगुरौविलग्नेज्ञशुक्रयोःकर्मणिलाभगेर्के सौरारयो
र्भ्रातृगयोश्चयातोनृपःस्वभृत्यानिवशास्तिशत्रून् २९ नारदः स्वोच्चस्थेलग्नगेजीवेचंद्रेचायगतेयदि
गतोराजारिपून्हंतिपिनाकीत्रिपुरंयथा ३० शुक्रेत्रिकोणेकेंद्रस्थेलग्नेचंद्रेथवारवौ शत्रून्हंतिगतोरा
जाब्रह्महेषःकुलंयथा ३१ पापास्तृतीयेहिबुकेसितज्ञौजीवोविलग्नेमृगलांछनोस्ते यस्योद्गतस्यापि
बलंरिपूणांकृतंकृतघ्नेष्विवयातिनाशम् ३२ यस्योदयास्तास्त्रिचतुस्त्रिसंस्थाः शुक्रोंगिरांगारकसौ-
म्यसौराद्विषद्बलंस्त्रीवदनानितस्यकूजंतानिकांतानविलोकयंति ३३ पूर्वोक्तयोगेधनगोबुधश्चे
च्छशांकसूर्योचदशायसंस्थौ अस्मिन्गतस्यालिकुलोपगीतानानावनस्थाद्विरदाभवंति ३४ व
राहः त्रिषष्णवांत्येषबलःशशांकोबुधोबलीयस्यगुरुश्चकेंद्रे तस्यारियोषाभरणैःप्रियाणिप्रियाप्रि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याणांजनयंतिसैन्ये ३५ चंद्रोबलः बुधोबलीउभौचत्रिषण्णवांत्येष्वेवभवतस्तदायोगः केंद्रोप
गतेनवीक्षितेगुरुणास्वायतुर्यगेसितेपापैरनवाष्टसप्तगैर्वस्कंतन्नयदामुयान्नृपः ३६ षष्ठाष्टगौ
शुक्रबुधौप्रयाणेस्करेशपूज्योगगमेयदिस्यात् रिपुःप्रणाशंविषयेषुसौख्यंप्राप्नोतिकीर्तिंविपुलांचभो
गम् ३७ दुश्चिक्यलाभारिगतेःर्कपुत्रेचतुर्थगेदैत्यगुरौप्रयाति यदापुमान्सद्विरदेंद्रयानंकीर्तियशः
सिद्धिसहस्रमेति ३८ केंद्रस्थानेस्करपतिगुरौकंटकस्थेःस्करेज्येछिद्रेसौम्येभवसंतिचयदात्वष्टमेंदु-
र्यदिस्यात् येषांक्रूरारिपुसहजगारहुकेतूत्तमूर्तावायुःकीर्तिद्विणमतुलंतेलभंतेयशश्च ३९ मूर्तौ
शुक्रेस्करपतिगुरौछिद्रगेवाश्रिकोणेकेंद्रस्थानेशनिरविकुजालाभगावायदिस्युः येभूपायांतिशत्रुवि
पुलधनमथोसैन्यनाशंरिपूणांकीर्तिंशुद्धंयशश्चभ्रमथितरिपवस्तेस्करवादाव्रजंति ४० होरासंस्थेस्क
रपतिगुरौभार्गवेकंटकस्थेषष्ठेचंद्रेव्रजतियदिवाकार्ययोगास्तिनीशः प्राप्नोत्यग्रंकनकतुरंगरूप्यर-
त्नादिकोशमायुःकीर्तिंजयंत्वितदामत्तमातंगयूथम् ४१ लग्नारिकर्महिबुकेषुशुक्रेक्षितेषुद्यूनांत्य
लग्नरहितेष्वशुभग्रहेषु आतुर्भयंनभवतिप्रतरेत्समुद्रंयद्यश्मनापिकिंसुतारिसमागमेषु ४२ एकां
तरर्क्षभृगुजालकुजाद्यासौम्येस्थितेसूर्यसुताद्गुरोर्वा यध्यस्यतेरिर्नचिराद्धनस्यवेषाधिकोभृत्यइवेश्व
रस्य ४३ शुक्राद्भौमाद्यासौराज्जीवाद्यबुधः एकांतरेतृतीयस्थानेयत्रकुत्रस्यात्तदायोगः निरंतरंयदि
भवनेषुपंचसग्रहाःस्थितादिवसकरेणवर्जिताः यियासतोयदिचभवंतिपृष्ठतस्तदापरान्बलभिद्विवा-
श्रुक्रंनंति ४४ प्राक्कपालस्थैर्ग्रहैःपश्चिमदिशिपृष्ठगत्वम् अपरकपालस्थैःप्राच्यांरवमध्यस्थैरुत्तरदि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शि अर्धरात्रस्थैर्दक्षिणादिशि बुधभार्गवमध्यगतेहिमगौहिबुकोपगतेचनृपः प्रवसेन्पुरुहूतदिशं
यदिवांतकृतःपुरुहूतयमंप्रति ५५ सितेंदुजौचतुर्थगौनिशाकरश्चसप्तमे यदातदागतोनृपः प्रशास्त्य
रीन्वितारणात् ५६ शुक्रवाक्पतिबुधैर्धनसंस्थैःसप्तमेशशिनिलग्नगतेऽर्के निर्गतोनृपतिरेतिकृता
र्थोवर्षांतेयदरीन्विनिहत्य ५७ सूर्यैंदूबलवर्जितौबलयुतौलग्नेशजन्मेश्वरौपानालेदशमेक्षिवाशशि
रुतोलग्नस्थितोवाक्पति षट्सप्ताष्टमवर्जितेषुभृगुजःस्थानेषुयस्यस्थितोयातुस्तस्यनविद्विषोरण
मुखेनिष्ठतियोषाइव ५८ सौरेभौमेलग्नगेर्केरवमध्येकर्मण्यायेभार्गवेचंद्रजेवा यायाद्भूपःशत्रुगेहं
निहंतुंदृप्तंशत्रुंकालवत्क्रूरचेष्टः ५९ गुरौविलग्नेयदिवाशशांकेषष्टेरवौकर्मगतेर्कपुत्रे सितज्ञयोर्बंधु
रुतस्थयोश्चयात्राजनित्रीवहितानिधत्ते ६० त्रिनिधनेतनुसप्तमारिसंस्थाः कुजसितजीवबुधारविश्च
यस्य स्वलजनजनितेवलोकपात्रानभवतितस्यचिरायशत्रुसेना ६१ कुजरविजयुतेरिभेगतानांजल
सहजायगतैःसितार्किजीवैः परबलमुपयातिनाशमाशुश्रुतमधनस्यकुटुंबचिंतयेव ६२ भृगुसुतमथ
हेंद्रगुरुगमनेसहितौयदिभंयुगपत्यजतः क्षगुरुयदिवांशकमेकगतौसमरेमररादिवभाति तदा ६३
क्षितितनयसुतान्नवांशजयदिशतमेभृगुजोथवागुरुः शतगुणमपिहंत्यरेर्बलं विषमिवकायमसृक्क
पथोपगम् ६४ स्तोच्चोपगैर्जीवकुजार्कैरेभिस्त्रिभिर्वाकथितैरेकलग्ने राज्ञःप्रणाशंससुपैतिशत्रुः
सौख्यंहिभार्यस्ययथाधनस्य ६५ शतांशकादूर्ध्वमवस्थितेबुधेयमारयोस्तत्रगतस्यभूभृतः प्रया
तिनाशंसमरेद्विषद्बलंयथार्थिभावोपगतस्यगौरवम् ५६ सोमाधिष्ठितनवांशाद्यदिबुधोनवांशक

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शतादूर्ध्वंस्थिष्ठति एवंशनेरपि सिंहाजतौलिमिथुनामृगकर्कटौच्चस्वेशान्विताभवतियस्यशनिश्च
लग्नेनृसैनिकाःपरबलंक्षपयंतियातुर्मूर्खस्यशक्तिमिवचारणचट्टमंक्षाः ५७ चट्टाधूर्ताःमंक्षाअ
लीकवादिनः अथसमरयात्रा गुरौवीर्येकेंद्रसुतेबुधेवाभृगुनंदनेविजयोनामयोगोयंयातुर्विजयदःस
दा ५८ स्वराशिगेबुधेलग्नेमितेवासरवंदिते नद्यावर्त्ताङ्कयोयोगोयातुरिष्टार्थसिद्धिदः ५९ स्वांशसं
स्थेबुधेलग्नेशुक्रेवादेवपूजिते शंखसंज्ञाङ्कयोयोगोयातुःकीर्त्तिप्रदःसदा ६० स्वराशौस्वांशगेसौम्ये
लग्नस्थेवाभृगोःसुते जीवेवाव्रजयोगोयंयातुःशत्रुविनाशकृत् ६१ अधिमित्रांशगेसौम्येसितेवाथ-
सुरार्चिते लग्नगेमातृयोगोयंशत्रूणांसंधिकृत्सदा ६२ यत्रैकादशगश्चंद्रोभानुर्वापबलःशुभः अ
भयोनामयोगोयंअरिभूतिविनाशकृत् ६३ त्रिकोणगेशुभेखेटेसबलेवाद्वितीयगे कल्याणसंज्ञो
योगोयंयायिनांमंगलप्रदः ६४ यत्रस्वोच्चगतश्चंद्रोलग्नादेकादशेस्थितः जयंतोनामयोगोयंशत्रु-
पक्षविनाशकृत् ६५ वर्गोत्तमगतेलग्नेशुभेवाथबलान्विते शुभग्रहयुतैःकेंद्रैर्योगोयंसिद्धिदायक ६६
मितेसूर्येनामगेहरसंज्ञगः योगोमहारणेशत्रुपक्षक्षयकरःसदा ६७ उच्चस्थेलाभगेशुक्रेत्रिषष्ठेदेवपूजिते सुदर्शनोमहायोगःशत्रुध्वंसकरोरणे ६८ लग्नान्यकेंद्रगेचंद्रेलग्नस्थे
देवपूजिते महाशंखाङ्कयोयोगःप्रतिपक्षाच्चमानदः ६९ भूसुतेस्वोच्चगेलाभेमृगकुंभगतेयमे न-
द्यावर्त्ताङ्कयोयोगोरणेशत्रुतृणानलः ७० मेषगेभास्करेषष्ठेलाभगेस्वोच्चगेयमे नक्षत्रपदयोगोयं
शत्रुमेघानिलोरणे ७१ भौमेस्वराशिगेलग्नेसौम्येकेंद्रत्रिकोणगे सुष्ठयोगोरिविपिनकुठारःसंग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रांगणे ७२ एकांतरेगतेलग्नाच्छुभस्येटेथवाःशुभे वापीयोगस्खरिश्रांततिमिरोघदिवाकरः आव श्यकेतथायानेसौम्योस्तेनिधनेपिवा ७३ नेदर्कोदयेस्तेवामध्यान्हेवाप्यशंकितः ७४ प्रभ्रष्टद्युतितार कास्फुटतटीप्राचीभवेन्निर्मलात्वीषद्रक्तविलोहितानधवलादेवैःसदावांछिता नोवारंनतिथिंन चापिकरणंलग्नंचनापेक्षतेहृत्सादोषसहस्रकंचयमुखानूनंकरोत्यन्वितम् ७५ मध्यंव्योमपयाते स्फुरदनलनिभेकेसरैरार्कबिंबेछायासाध्वीचकांताप्रचलतिपुरुषेयत्रतत्पादलग्ना तावत्सौरिर्नविष्टिःकुजहुतमशुभंनैवऋक्षंनयोगः संमानारोग्यसंपत्क्षितिमथयुवतिंतत्रगंतालभेत ७६ यावत्

इषमासिसितादशमीविजयाशुभकर्मसुसिद्धकरीकथिता श्रवणर्क्षयुतास्फुतरांशुभदानृपतेस्तुगमेजयसंधिकरी ७७

सिंदूरवर्णेगगनतलगतंभानुबिंबंचनास्तंयावन्नोदिक्षुशांतिंव्रजतिखुरपुटैरुद्धतोरेणुसंघः तावन्नैवास्तिदोषःप्रभवतिनचसाक्रूरदृष्टिर्ग्रहाणांयात्रायांवाविवाहेसकलशुभकरीसर्वकार्येषुसिद्धिः ७७ इत्यलंग्रंथविस्तरेण इतिषोडशलग्नेशजन्मयोगाः अथविजयादशमीसंज्ञकंसिद्धिमुहूर्ततोटकेनसगणचतुष्टयेनाह इषमासीति स्पष्टार्थः कश्यपः मासीषेशुक्लदशमीसर्वदाविजयाभिधा विजयस्तत्रयात्तृणांसंधिर्वानपराजयइति ७७ अथान्यद्दर्शनतिलकयाह चेतोनिमित्तेति चेतोंतःकरणम् निमित्तमंगस्फुरणादिश

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुनानिवक्ष्यमाणानि एतैःसप्रशस्तैःसद्भिःखलुनिश्चयेनलग्नबलंज्ञात्वा उर्व्यधिपोराजाप्रयाति न दासर्वासिद्धिर्वांछितसिद्धिर्भवति यदातुलग्नादिबलेसत्यपिनिंद्यानिशकुनानिस्युस्तदायात्रानिवि- र्दैव वसिष्ठः अशुभानिनिमित्तानिउत्पातशकुनानिच यात्राकालेनृणांतेषांनिधनायाधनायचेतिथ दातुदैवात्शकुनलग्नादीन्यनिंद्यानिचेतोविशुद्धिश्चनास्त्येवात्रकस्यप्राबल्यमित्याह अथेनिशकुना दितोपिसकाशात्चेतोविशुद्धिरधिकातांचेतोविशुद्धिंविनानेयात्नगच्छेत् कश्यपः निमित्तशकु नादिभ्यःप्रधानंहिमनोजयः तस्माद्धियासतांनृणांप्रधानंहिमनोजयइति ७८ अथयात्रायामव

चेतोनिमित्तशकुनैरतिसप्रशस्तैर्ज्ञात्वाविलग्नबलमुर्व्यधिपः प्रयाति
सिद्धिर्भवेदथपुनःशकुनादितोपिचेतोविशुद्धिरधिकानचतांविनेयात्
७८ व्रतबंधनदेवताप्रतिष्ठाकरपीडोत्सवसूतकासमाप्तौ नकदापिचले
दकालविद्युत्घनवर्षातुहिनेपिसप्तरात्रम् ७९ थनिषिद्धनिमित्तानिवसंतमालि

कालंदसाह तल्लक्षणंविषमेससजगौ समेचेत्सप्तरयश्चवसंतमालिका साविषमसमचरणे व्रतबं धनेति व्रतबंधनंयज्ञोपवीतम् देवप्रतिष्ठाप्रसिद्धा करपीडाविवाहः उत्सवो होलिकादिसूतकंमर- णसूतकंच एषांशास्त्रोक्तयावद्दिनसमाप्यानामसमाप्तौसमाप्तिम् विनाकदापिनैवचलेत्नगच्छेत् नारदः उत्सवोपनयोद्वाहप्रतिष्ठाशौचसूतके आसमाप्तेनकुर्वंतियात्रांतत्रजिनोविधुरिति अकाले

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिविद्युत्प्रसिद्धा घनोमेघगर्जितम् वर्षावृष्टिः तुहिननीहारः एषुपदार्थेषु कालेषुसप्तरात्रं दिनसप्तकंनचलेत् नारदः अकालजेषुनृपतिर्विद्युद्गर्जितवृष्टिषु उत्पातेषुत्रिविधेषुसप्तरात्रंन तुव्रजेदिति ७९ अथैकदिनसाध्येगमनप्रवेशेविशेषवंशस्थविरेणाह महीपतेरिति स्पष्टार्थः यथावाराणसीस्थानाच्चरणादिनगरेप्रवेशः तत्रैतान्दोषान्पंडितोनैवविचारयेत् ८० अथैकदिनमध्येनिर्गमप्रवेशाख्यरूपेकार्येविचिकार्षितेकिंविचार्यमित्यार्ययाह यद्येकस्मिन्निति स्पष्टार्थम् ८१

महीपतेरेकदिनेपुरात्पुरं यदाभवेतांगमनप्रवेशकौ भवारशूलप्रतिशुक्रयोगिनीर्विचारयेन्नैवकदापिपंडितः ८० यद्येकस्मिन्दिवसेमहीपतेर्निगमप्रवेशौस्तः तर्हिकिंविचार्यः सुधियाप्रवेशकालोनयात्रिकस्तत्र ८१ प्रवेशान्निर्गमंतस्मात्प्रवेशंनवमेतिथौ नक्षत्रेचतथावारेनैवकुर्यात्कदाचन ८२ अथभयाणेनवमीदोषमनुष्टुभाह प्रवेशादिति गृहप्रवेशतिथितोनवमेतिथौनिर्गमंनकुर्यात् पुनश्चगमनदिवसात् नवमेतिथौगृहप्रवेशंनकुर्यात् एवंनक्षत्रेचगमननक्षत्रान्नवमेनक्षत्रेगृहप्रवेशम् तथागृहप्रवेशनक्षत्रान्नवमनक्षत्रेगमनंचनकुर्यात् वारेचगमनवारान्नवमवारेगृहप्रवेशम् गृहप्रवेशवासरान्नवमवारेगमनंनचकुर्यात् गर्गः प्रवेशान्निर्गमश्चैवनिर्गमाच्चप्रवेशनम् नवमेयातुनोकुर्याद्विष्वेवारेतिथावपीति ८२ छ छ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथयात्रादिनीयंविधिंशान्तिन्याह अग्निंहुत्वेतिस्पष्टार्थम् ॥ अथनक्षत्रदोहदान् शार्दूलविक्री डितेनाह कुल्माषानिति अत्रचतुर्थचरणेप्रियंग्वपूपेत्यत्रछंदोभंगोस्ति सगणप्रक्षेपाकरणात् स· संप्रेद्धेवेतिपिंगलसूत्रेणपकारेरफसंयोगेचप्राग्वर्णस्यलघुत्वाभिधानात् सगणधक्षापएव तथाचका लिदासः गृहीतपत्यङ्गमनीयवस्त्रेति हयादृक्षेअश्विन्यादिसप्तविंशतिभेषुकुल्माषादिकंनक्षत्रदोह दम् इदंभक्ष्याभक्ष्यंवर्णभेदेनदेशभेदेनविचार्यम् भक्ष्यसंभवेभक्षयेत् अभक्ष्यसंभवेआलोक येत् पश्येत्स्पृशेद्वेतिध्येयम् यथा अश्विन्यांकुल्माषानक्षतस्निग्धमाषान् भरण्यांतिलमिश्रतंडु

अग्निंहुत्वादेवतांपूजयित्वानत्वाविप्रानर्चयित्वादिगीशम् दत्वादानंब्रा ह्मणेभ्योदिगीशंध्यात्वाचित्तेभूमिपालोधिगच्छेत् ॥ कुल्माषांस्तिल तंडुलानपितथामाषाश्चगव्यंदधित्वाज्यंदुग्धमथेणमांसमपरंतस्यैवरक्तं तथा नहूत्पायसमेवचाषपललंमार्गेचशोणंतथाषष्टिक्यंचप्रियंग्वपूप मथवाचित्राऽजान्सत्फलम् ॥ लान् कृत्तिकायांमाषान्रोहिण्यांगव्यम् गोरसंच दधिमृगेगव्यमाज्यंघृतम् आर्द्रायांदुग्धम् गव्यमेव पुनर्वसावेणमांसंहरिणमांसम् पुष्येमृगस्यर क्तम् आश्लेषायांपायसम् मघायाम् चाषस्यपललंमांसम् पूर्वाफल्गुन्यांमृगस्येदंमार्गमांसम् उ त्तराफल्गुन्यांशशस्येदंशाशंमांसम् हस्तेषाष्टिक्यंषष्टिकान्नम् चित्रायांप्रियंगुः फलनीएकेस्ता १४६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मपूपम् विशाखायांचित्रान्नानावर्णानंडजानीक्षणम् अनुराधायांसत्फलम् उत्तमफलमन्नादि
कम् ८४ ज्येष्ठादिदोहदंशार्दूलचिह्नितेनाह कौर्मामिति ज्येष्ठायांकूर्मस्यकच्छपस्येदंकौर्मंमांसम्
मूलेसारिकायाः पक्षिण्याइदंसारिकंमांसं पूर्वाषाढायांगोधायाःइदंगौधिकंमांसम् उत्तराषाढायां-
शल्यपक्षिणइदंशाल्यंमांसम् श्राविष्ठशल्यंइत्यमरः अभिजितिहविष्यंमुद्गादि श्रवणेकृसरा-
न्नंखिचडिका धनिष्ठायांसुद्गान्नंमुद्गौदनम् शतभेषजानांयवपिष्टम् पूर्वाभाद्रपदायांमत्स्यान्नं
मत्स्यमिश्रितमोदनम् उत्तराभाद्रपदायांचित्रान्नवर्णमोदनम् रेवत्यांदध्यन्नंदधिभक्तमिति नारदः

कौर्मंसारिकगौधिकंचपललंशाल्यंहविष्यंहयादृक्षेस्यात्कृसरान्नमु
द्गमपिवापिष्टंयवानांतथा मत्स्यान्नंखलुचित्रितान्नमथवादध्यान्नमे
वंक्रमाद्भक्ष्याभक्ष्यमिदंविचार्यमतिमान्भक्ष्येत्तथालोकयेत् ८५

कुल्माषांश्चतिलान्माषान्दधिगव्यंघृतंपयः मृगमांसंचयत्सारंपायसंचाषकंमृगम् वाशमांसंच
षाष्टिक्यंप्रियंगुकमपूपकम् चित्रांडजान्फलंकूर्मसारींगोधांचशल्यकम् हविष्यंकृसरान्नंचमुद्गा
न्नंयवपिष्टकम् मत्स्यान्नंचित्रितान्नंचदध्यन्नंदध्नाभक्ष्यमित्यमुक्तं अलभ्यालभ्यभक्ष्यावा-
स्मृत्वास्पृष्ट्वाथतान्त्यजेत् गत्वासिद्धिमवाप्नोतिदुष्टभादिषुभूपतिः दोहदेषुयंथांतरेभेदस्तत्रवि-
कल्पोज्ञेयः ८५ अथदिग्दोहदमनुष्टुभाह आज्यमिति आज्यंघृतंपूर्वस्याम् तिलमिश्रमोदनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणस्याम् मत्स्यंपश्चिमायाम् पयोदुग्धमुत्तरस्याम् दिशिभवंदिश्यंएनद्दोहदंभक्षयेत् ततः पूर्वाद्यामाशांव्रजेत् ८६ वारदोहदमनुष्टुभाह रसालामिति रसालाशर्करादधिमरीचकर्पूरैलासंस्पृष्टालोकेशिखरिणीतिप्रसिद्धातांरविवारे पायसंसोमे कांजीमसिद्धातांभौमे श्रितंपक्वंदुग्धंबुधे दधिगुरौ आश्रितंअपक्वंदुग्धंशुक्रे तिलमिश्रमोदनंशनिवारे एतद्वारदोहदंरविवारादौक्रमेणभक्षयेत् स्याद्रसालानुमार्ज्जितेत्यमरः ८७ अथतिथिदोहदंवसंततिलकेनाह पक्षादितइति पक्षादितः प्रतिपदमारभ्यपंचदशतिथिषुक्रमेणतिथिदोहदंभक्षयेत् यथा प्रतिपदि अर्कस्यप्रसिद्ध

आज्यंतिलोदनंमत्स्यंपयश्चापियथाक्रमम् भक्षयेद्दोहदंदिश्यमाशांपूर्वादिकांव्रजेत् ८६ रसालांपायसंकांजीं घृतंदुग्धंतथादधि पयोश्रितंतिलान्नंचभक्षयेद्वारदोहदम् ८७ पक्षादितोर्कदलंतंडुलवारिसर्पिःश्राणाहविष्यमपिहेमजलंक्षपूपम्

स्यदलानिपर्णानि द्वितीयायांतंडुलवारिप्रक्षालिततंडुलजलम् तृतीयायांसर्पिर्घृतम् चतुर्थ्यांश्राणायवागू पंचम्यांहविष्यंमुद्गादि षष्ठ्यांहेमजलंप्रक्षालितसुवर्णजलम् सप्तम्यांअपूपम् अष्टम्यांरुचकंबीजपूरफलम् रुचकोबीजपूरइत्यमरः नवम्यामंबुजलंदशम्यांधेनुमूत्रम् एकादश्यांयवान्नंयवविकारम् द्वादश्यांपायसम् त्रयोदश्यांगुडमिक्षुविकारम् चतुर्दश्यामसृक्कुरुधिरम् पंचदश्यामन्नमुद्गान् अन्नमिश्रितमुद्गान् गुरुः अर्कपत्रंभवेद्यातुःप्रथमा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यांतुभक्षणम् द्वितीयायांभवेद्यातुर्भक्ष्यंसक्तंडुलोदकम् तृतीयायांतथासर्पिर्यवागूस्यात्ततःपरम्
पंचम्यांतद्दधिस्यात्सष्ठ्यांवाकांचनोदकम् अपूपफक्किःसप्तम्यामष्टम्यांबीजपूरकम् नवम्यांतोयपा
नंस्याद्धोमूत्रंतुततःपरम् एकादश्यांयवान्नाद्वादश्यांपायसंभवेत् त्रयोदश्यांगुडलेह्यंरुधिरंस्याच्चतु
र्दशे भुङ्गोदनंभवेद्भोज्यंपंचदश्यांघियासतः पक्षयोरुभयोरेवंयात्रायोगेविधिस्मृतइति अत्रदुष्ट
भादिषुदोहदभक्षणेनदोषापाकरणंयुक्तंविधिकरणंतुव्यर्थमितिचेन्न आवश्यकगमनेमहादोषा
णामपिपरिघदंडविरुद्धतारात्रूरसाहित्यादीनांदोषवारणायदोहदोक्तेःसार्थक्यात् एवंविहितमि-

भक्तान्नाज्यदुग्धकमंबुचषेनुमूत्रंयावान्नपायसगुडान्नसृगन्नमुद्गान्
८८ उद्धृत्यप्रथमतएवदक्षिणांघ्रिंहात्रिंशत्पदमभिगत्यादिश्ययानम्
आरोहे त्तिलघृतहेमताम्रपात्रंदत्वादीगणकवरायचप्रगच्छेत् ८९

तिदोहदाभिधानंयोगिन्यादिदोषनाशार्थम् वारदोहदोक्तिरपिक्रियहवासरवारशूलादिदोष
हान्यासार्थका ८८ अथगमनसमयेविधिप्रहर्षिण्याह उद्धृत्येति राजागमनसमयएवप्रथमतोद
क्षिणांघ्रिंदक्षिणचरणमुद्धृत्यपश्चात्त्रिंशत्पदपरिमितांभूमिंगत्वादिश्ययानंवक्ष्यमाणंहस्यादि
यानमारोहेत् तिलेति आरोहणसमयेएवचतिलघृतहेमसहितंताम्रपात्रमादीगणकवरायज्यो
तिर्विच्छ्रेष्ठायचकारादन्येभ्योपिब्राह्मणेभ्योयथाशक्तिदानंदत्वाप्रगच्छेत् ८९ ७ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथदिग्यायानमनुक्रमाह प्राच्यामिति नरैर्नरवाद्यैः स्वस्वासनादिभिः अन्यत्स्पष्टार्थम् ९० अथनिर्गमस्थानानिपादाकुलकलंदसाह देवगृहादिति देवगृहाद्देवपूजागृहात् गुरोरध्यापकस्यगृहात् कुलगुरोर्वा स्वगृहात्स्वशयनगृहात् बहुस्त्रीत्वसंभवेसुस्थकलत्रगृहं पट्टराज्ञीतद्गृहाद्वा हविष्यंप्राश्यभक्षियित्वाविप्रैर्ब्राह्मणैरनुमतःमंगलद्रव्यंमनोभीष्टंपश्यन्शृण्वन्सन्नेयात्गच्छेत९१ अथप्रस्थानवस्तूनिवर्णक्रमात्साम्विण्याह कार्यार्थैरिति किंचिदावश्यकार्यंनाभूदितिचेद्गमनस्य

प्राच्यांगच्छेद्गजेनैवदक्षिणस्यांरथेनहि ॥ दिशिप्रतीच्यामश्वेनतथोदीच्यां नरेनृपः ९० देवगृहाद्गुरुसदनाद्वास्वगृहान्सुस्थकलत्रगृहाद्वा प्राश्य हविष्यंविप्रानुमतःपश्यन्शृण्वन्मंगलमेयात् ९१ कार्यार्थैरिहगमनस्यचेद्विलंबोभूदेवादिभिरुपवीतंमायुधंच क्षौद्रंचामलफलमाशुचालनीयं सर्वेषांभवतियदेवदृश्यंयद्वा ९२

विलंबःस्यात्तदाविधारितयात्रालग्नेब्राह्मणादिभिरेतानिवस्तूनि आशुचालनीयानि यथा ब्राह्मणेनोपवीतंयज्ञोपवीतंक्षत्रियेणायुधंवैश्येनमधुशूद्रेणामलफलंनारिकेलादि राजमार्तंडः प्रस्थानेब्राह्मणादीनांयज्ञसूत्रमथायुधम् मध्यामलफलंचैवप्रशस्तंवृद्धिकारणमिति वा॰ अथवासर्वेषांवर्णानांयदेवदृश्यंमनोभीष्टंतदेवप्रस्थापनीयम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वसिष्ठः श्वेतातपत्रध्वजचामरांश्चविभूषणोष्णीषगजांबराणि आंदोलिकारत्नरथाश्वचारानश्
यासनाद्यंमनसस्त्वमीष्टमिति ९२ अथप्राच्यमतेनप्रस्थानपरिमाणंमंदाक्रांतयाह गेहादिति
स्वगृहात्परगृहमतिसमीपवर्त्यपितत्रापिचेद्गमंस्यात्तर्हियात्राजातेतिगर्गः कथयते अथवास्वसी
मामुल्लंघ्यसीमांतरंसीमांप्राप्यवसेदितिभृगुः कथयते अथवामहतायोद्धास्वबलेनक्षिप्यमाणः
शरोयावद्दूरंगच्छतितावन्मात्रंप्रस्थानंस्यादितिभरद्वाजः कथयते अथवापुरात्नगरात् बहिःयात्रा
कार्येतिवसिष्ठः कथयते ९३ अथसुनिमतेनप्रस्थानपरिमाणंवसंततिलकयाह प्रस्थानमत्रेति

गेहाङ्गेहांतरमपिगमस्तर्हियात्रेतिगर्गः सीम्नः सीमांतरमपिभृगुर्बा
णविक्षेपमात्रम् प्रस्थानंस्यादितिकथयतेसोभरद्वाजएवंयात्राका-
र्यावहिरिहपुरात्स्याद्वसिष्ठोब्रवीति ९३ प्रस्थानमत्रधनुषांहिशता
निपंचकेचिच्छतद्वयमुशंतिदशैवचान्ये

धनुःप्रमाणंचतुःकराः तादृशानांधनुषांपंचशतानिहस्तसहस्रद्वयमितियावत् स्वगृहात्तावद्दू
रात्तावधिप्रस्थानंस्यादितिकेचिदूचुः अन्येतुतादृशानांधनुषांशतद्वयंअष्टौशतानिहस्तास्तावत्प्र
स्थानमित्याहुः अपरेतुद्वयात्राकालेमंदिरतः स्वगृहाद्दशैवधनूंषिचत्वारिंशत्हस्तास्तावत्
दूरेप्रस्थितःप्रयातःएवंज्ञेयमित्याहुः प्रस्थानंधनुषांपंचशतान्यत्रशतद्वयम् स्वदेवसदनाद्वापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशाभिःप्रस्थितोद्युतइतिवक्ष्यमाणोक्तेः गंतव्यदिक्षितिनदपिप्रस्थानंप्रयतेनसावधानेनराज्ञागंतव्य दिक्षयस्यांदिशिगमनंचिकीर्षितंतद्दिगभिमुखंकार्यम् गंतव्यदेशाभिमुखेप्रदेशेप्रस्थानमाहुः शुभदंनराणामितिराजमार्तंडोक्तेः ९४ अथान्यदपिस्वग्धरयाह प्रस्थानेभूमिपालइति भूमिपालोराजाप्रस्थानेदशादिवसमभिव्याप्यदशाहोरात्राणिनवसेत् सामंतोमांडलिकश्चतुर्हारिकः एकत्रप्रस्थानेसप्तरात्रंनवसेत् तदितरमनुजोब्राह्मणादिस्तथैवएकत्रप्रस्थानेपंचरात्रंनवसेत् यदिदैवाद्वसेत् तदाकिंकुर्यादित्यतआह ऊर्ध्वमिति अवधिदिवसातिक्रमानंतरंपुनर्गृहमागत्यशुभाहेपूर्वोक्त

संप्रस्थितोयइहमंदिरतःप्रयातोगंतव्यदिक्षुतदपिप्रयतेनकार्यम्
९४ प्रस्थानेभूमिपालोदशादिवसमभिव्याप्यनेकत्रतिष्ठेत्सामंतः
सप्तरात्रंतदितरमनुजःपंचरात्रंतथैव ऊर्ध्वंगच्छेच्छुभाहेप्यथागमन
दिनात्सप्तरात्राणिपूर्ववाशक्तोनहिनेसौरिपुविजयमनामैथुननेवकु
र्यात् ९५

प्रकारेणविचारितेशुभदिवसेगच्छेत् क्वचिद्दिग्विशेषेणप्रस्थानेदिवसनियमोभिहितःराजमार्तंडः प्राच्यामहानिसुनयःप्रवदंतिसप्तयाम्यामतीवशुभदानिदिनानिपंच प्रतीच्येवपश्चिमदिशिक्षितिनायकानांप्रस्थानकेषुदिवसहयमुत्तरस्यामिति अथप्रस्थानकर्तुर्नियममाह अथेति असौराजादिःरिपुविजयमनाःशत्रुजयेकृतांतःकरणोयात्रादिनात्पूर्वंसप्तरात्राणिमैथु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नंसंभोगंनैवकुर्यात् च्यवनः त्रिरात्रंवर्जयेत्क्षीरंपंचाहंक्षरकर्मच तदहश्चावशेषाणिसप्ताहंमैथुनं त्यजेत् वाभथवा अशक्तोसप्ताहमतिकामितयास्थातुमशक्तौतद्दिनेयात्रादिवसेमैथुनंनैवकुर्यात् गर्गः यात्राकालेतुसंप्राप्तेमैथुनंयोनिषेवते रोगार्त्तःक्षीणकेशश्चसनिवर्त्ततवानवेति यदातुप्रथम दिनेस्त्रीऋतुस्नाताभवतिगमनेचावश्यकतातत्रनिर्णयमाह च्यवनः आत्ययिककार्यपातेपुष्यस्नाता समागमंकृत्वा मुदितोगच्छन्लभतेमनोरथानचिरकालेनेति यदापुनर्गमनार्थंकालांतरमस्तितद्दि नेमैथुनंकृत्वाकालांतरेसलग्नेयायादित्यर्थसिद्धम् ९५ अन्यदपिशालिन्याह दुग्धमिति अस्मि

दुग्धंत्याज्यंपूर्वमेवत्रिरात्रंक्षौरंत्याज्यंपंचरात्रंचपूर्वम् क्षौद्रंतैलंवा
सरेस्मिन्वमिश्वत्याज्ययत्नाद्रुमिपालेननूनम् ९६ झल्लागच्छतिष
दिचेत्तैलगुडक्षारपक्कमांसानि

न्त्रासरेयात्रादिनेक्षौद्रंमधुभक्षत्वेनतैलंतैलला
पनंत्याज्यं वमिश्वदेवोद्भूतांशरीरशोधनार्थंबलात्कारकृतांवायात्रादिनेनिषिद्धा ९६ अन्यदपिगौ
याह झल्लेति यदितैलपक्कानिवटकादीन्यत्रानि गुडमिक्षविकारम् क्षारंसलवणम् पक्कमांसानि
योझल्लागच्छतिसराजानिरुग्णोरोगसहितोविनिवर्तते गर्गः कटुतैलगुडक्षारंपक्कमांसाशनंतथा
झल्लायोयात्यसौमोहान्व्याधितःसन्निवर्त्ततइति मांसदुग्धादिनिषधोदोहदव्यतिरिक्तविषयः स्त्री
द्विजमिति स्त्रीचद्विजश्चतयोःसमाहारःस्त्रीद्विजंअवमान्यधिक्शब्दताडनादिनामानभंगंकृत्वाग

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्छतःपुंसोमरणंस्यात् गर्गः यस्तुसंप्रस्थितोयात्रांभार्यांनैवाभिनंदति भार्यावानाभिनंदेतनसप्र
तिनिवर्त्तते परकीयांस्वकीयांवास्त्रियंपुरुषमेवच ताडयित्वातुयोमोहात्तदंतंतस्यजीवितम् यात्रा
यांप्रस्थितोयस्तुब्राह्मणानवमानयेत् सोप्रतिनिवर्त्ततेततदंतंतस्यजीवितम् केचिच्छुभाशुभश-
ब्दान्यात्राकालेशुभाशुभसूचकानाहुः उल्लुःशापयगच्छवर्जयनिर्गच्छव्रजसंसरेतिसिद्धिकराःस्व-
ल्पेनैवप्यधिकाप्रमोदजयजीवशब्दाश्च यागास्तिष्ठनिवर्त्तयकुगम्यतेमूढदुर्मतेमोहात् यात्रांनेच्छं-
तिबुधाः क्षुतकासितभीतशब्देश्चेति कासितंरोगार्त्तध्वनिर्हिक्कादादिः ९७ अथाकालवृष्ट्यास्त्यदो-

विनिवर्त्ततेसरुग्णःस्त्रीद्विजमवमान्यगच्छतोमरणम् ९७ यदिमाः सचतुर्षुपौषमासादिषुवृष्टिर्हिभवेदकालवृष्टिः

षंवसंततिलकयाह यदीति पौषमाघफाल्गुनचैत्रेषुचतुर्षुमासेषुयदिवृष्टिर्भवेत्साःकालवृष्टिः पौ
षादिचतुरोमासान्प्राप्तावृष्टिरकालजेतिवचनात् तत्राकालवृष्ट्यांजातायांयदिवसधापृथ्वीयावत्पश
वोगवादयःमर्त्यामनुष्यादयस्तेषांपदैश्चरणैरंकितानिचिह्नितानभवंतितावदकालवृष्टेर्दोषोनास्तियदि
पशुचरणांकितास्यात्तदादोषोस्त्येव अत्रप्राच्या अल्पवृष्टौकर्दमादिबाहुल्यात् अल्पवृष्टिर्दोषाय
नमहतीतिवदंति तत्रबहुवृष्ट्याकर्दमापाकरणात् तत्र सितादौमार्गशीर्षस्यप्रतिपद्दिवसेतथा पूर्वा
षादागतेचंद्रेगर्भाणांधारणंभवेदिति कश्यपोक्तेर्मार्गादिमासागर्भग्रहणकालस्तत्रवृष्टिरावश्यकी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदाहवसाहः पवनसलिलविद्युत्गर्जिताभ्रान्वितोयः संभवतिबहुतोयः पंचरूपस्तमेघइति ततश्चग
र्भग्रहणयोग्याअल्पावृष्टिर्नदोषदा महतीवृष्टिस्तुगर्भगलनम् यतोवाराहेणोक्तम् गर्भसमयेतिवृ
ष्टिर्गर्भाभावायनिमित्तकृतेति निमित्तंशक्रास्त्रादिकम् आविरुतिः विद्युतिउपधीयमानादोषमुपधु
नुयात् एतावतामहावृष्टेरेवदोषबलम् अतएवभृशंक्षरंतोजलदानशस्ताइतिबृहद्यात्रायामुक्त
म् तस्मादल्पल्पायामकालवृष्टौदोषाभावः अल्पायांत्वल्पदोषः महत्यांतुमहादोषइति सत्वभासरा
त्रिकइत्युक्तम् शाकुएकेनैकमहःप्रोक्तंद्वितीयेनत्रिरात्रकम् तृतीयेनतुपंचाहंदशरात्रमतःपरम्

पशुमर्त्यपदांकितानयावद्रुक्षुधास्यान्नहितावदेवदोषः ॥ अल्पा
यांवृष्टौदोषोल्पोभूयस्यांदोषोभूयान् जीमूतानांनिर्घोषेवृष्टौवाजाता
यांभूयः

पौषेतुत्रिदिनंवर्ज्यंमाघमासेदिनद्वयम् फाल्गुनेदिनमेकंतुचैत्रेतुघटिका
द्वयमितितु आवश्यककार्यविषयम् पूर्वोक्तमेवार्थंस्पष्टीकुर्वन्नावश्यकयात्रायांनच्छांतिकंदु-
ष्टशकुनशांतिकंचातिशक्र्यागाथाछंदसाह अल्पायामितिस्पष्टार्थः प्रथमचरणम् अतोयत्राच्याः
पठंति आवत्ययाणादिषुभूपतीनामकालवृष्टिः प्रकरोतिदोषम् यावद्वेलंचरतांजनानांतथापशू
नांचरणांकिताभूरितिततन्निर्मूलत्वादुपेक्ष्यम् स्वयंप्रस्थानेसतिमार्गमध्येनास्त्ययंदोषः आवश्यक
यात्रायांदानमाह जीमूतानामिति जीमूतानांमेघानांनिर्घोषशब्देअकालवृष्टौवाजातायांसूर्यैर्दो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्यथाशक्त्यासौवर्णनिर्मितेबिंबेकृत्वाब्राह्मणेभ्योदद्यात्ततःस्वेच्छयागच्छेत् असंगादुष्टशकुनानां
दानमाह दुःशाकुन्येइति शकुनस्याभावः शाकुन्यंदुष्टंचतच्छाकुन्यंचदुःशाकुन्यंतस्मिन्दुष्टेशकुने
प्रस्थानकालेसंभूतेसतिसाज्यंसघृतंस्वर्णंविप्रेभ्योदत्वास्वेच्छाभिर्गच्छेत् ॥ अथशुभसूचकशकु
नानूशार्दूलविक्रीडितेनाह विप्राश्चेति विप्राबहवोद्वौवानत्वेक॰ अश्वःप्रसिद्धः इभोहस्ती अनुन्म
त्तः फलान्नदुग्धदधीनिप्रसिद्धानि गोःधेनुः सिद्धार्थः सर्षपाः पद्मंकमलम् अंबरंवस्त्रंस्वच्छम्
वेश्यागणिका वाद्यंमर्दलादि मयूरचाषौपक्षिणौ नकुलःप्रसिद्धः बर्हैकपक्षः रज्वादिनाबद्धोद्र
षादिः आमिषंमांसम् सद्वाक्यंकार्यसिद्धिरस्तित्यादिकंकुसुमानिचंपकादीनि इक्षुःप्रसिद्धःसक

सूर्येद्वोर्बिंबेसौवर्णेकृत्वाविप्रेभ्योदद्यात् दुःशाकुन्येसाज्यंस्वर्णंदत्वाग
च्छेत्स्वेच्छाभिः ॥ विप्राश्वेभफलान्नदुग्धदधिगोसिद्धार्थपद्मांबरंवे
श्यावाद्यमयूरचाषनकुलाबर्हैकपक्षामिषम् सद्वाक्यकुसुमेक्षुपूर्ण
कलशाच्छत्राणिमृत्कन्यकारत्नोष्णीषसितोक्षमद्यससुतस्त्रीदासवैश्वा
नराः ॥

लः नतुखंडितजलपूर्णकलशःसंसुरक्तछत्रंप्रसिद्धम् मृत्तिकाकन्याकुमारी
रत्नंमाणिक्यादि उष्णीषंशिरोवेष्टनम् सितोक्षः श्वेतवृषः अयमबर्होपि मद्यंप्रसिद्धम् ससुतस्त्री
सपुत्रास्त्रीदासोजाज्वल्यमानोग्निरिति ॥ अन्यच्छार्दूलविक्रीडितेनाह आदर्शेति आदर्शो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्पणम् अंजननंकज्जलम् धौतवस्त्रउज्वलीकृतवस्त्रोरजकः वस्त्रनिर्णेक्ता मीनोमत्स्यः आज्यं घृतम् सिंहासनंदेवादेः शवमेवशावंमृतकंपृष्ठगामिलोकरोदनरहितम् ध्वजःपताका मधुक्षौद्रम् छागोमेषः असृक्धनुरादि गोरोचनंप्रसिद्धम् भारद्वाजः पक्षीक्षीनृयानंरथासनादि वेदनिनादोवेदध्वनिः मांगल्यंप्रसिद्धं गीतंगानम् अंकुशोहस्तिनिवारणार्थमस्त्रम् एतेपदार्थागंनुर्भूपतेः प्रयाणसमयेसंमुखंदृश्यमानाःसत्फलदाश्चभफलदाः तथारिक्तोजलरहितोघटःकुंभः स्वानुगः स्वस्यपश्चाद्गागामीसोपिशुभफलदः कथ्यपः कार्यसिद्धिर्भवेद्दृष्टेशवेरोदनवर्जिते प्र

आदर्शांजनधौतवस्त्ररजकोमीनाज्यसिंहासनंशावंरोदनवर्जितंध्व
जमधुच्छागासृग्गोरोचनम् भारद्वाजनृयानवेदनिनदामांगल्यगी
तांकुशादृष्टाःसत्फलदाःप्रयाणसमयेरिक्तोघटःस्वानुगः १०१

वेशेरोदनयुतःशवःस्यात्शिवप्रदः वसंतराजः आदायरिक्तंकलशंजयार्थीयदिव्रजेत्कोपिसहाध्वगेतम् पूर्णंसमादायनिवर्त्ततेसौयथाकृतार्थःपथिकस्तथैवेति अथकैश्चिल्लग्नवशेनशकुनाउक्ताः लग्नेवाक्पतिशुक्राणांब्राह्मणःसंमुखास्त्रियः बुधशुक्रौचकेंद्रस्थौसवत्सागौःप्रदृश्यते चंद्रः सूर्यश्चभवतिदशमस्थोयदाथवा दीपादर्शोक्षमनसोरजकोधौतवाससा सुतस्थानेयदासौम्ये वृषोवृद्धस्तसंमुखः चंद्रोगुरुश्चसहजेश्वानोवामांगभागतः सर्वेकर्मायनवमेभारद्वाजोथनाकुलः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाषस्यदर्शनंवास्याद्गामांगेयंतदुर्लभम् आदित्योराहुसोमश्चसहजस्योकुमारिका बौदानांसक्रमगानांवादर्शनंसर्वकामदम् षष्ठेतृतीयेकर्मायेसौमश्चेत्तत्फलंभवेत् दास्योवैश्याःसरामांसंलाभश्चैवसन्निश्चितःसप्ताष्टपंचमेयस्यजीवोज्ञोवात्रवर्तते आदर्शश्चलाभदःराहुसौमश्चमंदश्चलग्नाद्यदितृतीयगउड्डतंगोमयंपश्येच्छीघ्रंलाभंधनंदिशेत् इत्यादयःशकुनाःशकुनग्रंथेभ्योज्ञेयाविस्तरभयादिहनोक्ताः ११ अथापशकुनान्शार्दूलविक्रीडितेनाह वंध्येति वंध्याग्रसिद्धंचर्मग्रसिद्धम् तुषंधान्यादितुषम् अस्थिसर्पलवणानिप्रसिद्धानि अंगारोनिर्धूमोग्निपिंडःइंधनंपाकयोग्यम् ११

वंध्याचर्मतुषास्थिसर्पलवणांगारेंधनक्लीबविट्तैलोन्मत्तवसौषधारिज्
टिलप्रव्राट्तृणव्याधितानग्नाभ्यक्तविमुक्तकेशपतिताव्यंगक्षुधार्त्ता
असृक्स्त्रीपुंसरटःस्वगेहदहनंमार्जारयुद्वीक्षणम् १०२

बःषंढःविट्उड्डतविष्टा अस्त्रीविष्टाविमौसमावित्यमरः तैलंप्रसिद्धम् उन्मत्तोमद्यभूताद्यावेशवान् वसाशरीरांतर्धातुविशेषः औषधंप्रसिद्धम् अरिःशत्रुःजटिलोजटावान् प्रव्राट्सन्न्यासीतृणंप्रसिद्धम् व्याधितोःचिकित्स्यव्याधिमान् नग्नःअपरिहितवस्त्रःकुमारव्यतिरिक्तःअभ्यक्तःकृततैलाभ्यंगोस्नातःविमुक्तकेशःअसंयतकेशःपतितोमद्यपानाद्यभिशापवान् व्यंगश्छिन्ननासिकादिःक्षुधार्तःक्षुत्पीडितःअसृक्रुधिरम् स्त्रीणामृतुःसरटःकृकलासःस्वगेहदहनंस्वगेहेःग्नि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दाहः मार्जारसुद्रंप्रसिद्धम् क्षतंशिक्षा १०१ अन्यदपिशार्दूलविक्रीडितेनाह कषायीति कषायो रागविशेषस्तेनरक्तंवस्त्रंकाषायंतद्यान्गुडतक्रेप्रसिद्धे पंकःकर्दमोविधवाकुजोप्रसिद्धोकुटुंबेकलिर्युत्रादिभिःकलहःवस्त्रादेआदिशब्देनकमंडलुछत्रादेस्खलनंनिर्निमित्तंस्वहस्तात्पतनम् लुलायामहिषास्तेषांसमरंयुद्धम् कृष्णावर्णानिधान्यानिमाषादीनि कार्पासंतुलंवमनंवांतम् दक्षेदक्षिणभागेगर्दभशब्दःअतिरुन्क्रोधाधिक्यम् गर्भिणगर्भवतीमुंडोमुंडितशिरस्कःआर्द्रो

कषायीगुडतक्रपंकविधवाकुजाःकुटुंबेकलिर्वस्त्रादेःस्खलनंलुलायसमरंकृष्णानिधान्यानिच कार्पासंवमनंचगर्दभरवोदक्षेनिरुद्भिणीमुंडार्द्रोबरदुर्वचोधबधिरोदक्यानदृष्टाःशुभाः १०२

बरआर्द्रवस्त्रःदुर्वचःस्वमुखोत्थंपरमुखोत्थंवादुष्टवाक्यम् अंधबधिरौप्रसिद्धौदक्यारजस्वलास्त्री एतेपदार्थागंतुपुंसःयानसमयेदृष्टासंतोनशुभाःकिंतुअशुभफलाःसर्वे दिक्षुक्षुतंनेष्टंमोक्षुतंमरणप्रदम् अफलंतच्छ्रुतंवाक्यंवृद्धूपीनसकेतवोरिति औषधेयानमारोहेविषादेशयनेशने विद्यारंभेबीजवापेक्षुतंससशोभनमिति १०३ अथान्यच्छकुनंशार्दूलविक्रीडितेनाह गोधाजाहकेति गोधाप्राणिविशेषः गोहइतिभाषयाजाहकोगात्रसंको

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चीप्राणिविशेषः सूकरः प्रसिद्धः अहिः सर्पः शशकः प्रसिद्धः यानसमयेएषांगोधादीनांकीर्तनंस्यान्मुखेनान्यमुखेनवोच्चारणंशुभंच्च पुनरेतेषांगोधादीनांशब्दोरुतं अथवाविलोकनंदर्शनंनिषिद्धम् कपिऋक्षाणांकपीनांवानराणांऋक्षाणांभल्लूकादीनामतोगोधादिभ्योव्यत्ययोज्ञेयः यथा वानराणांभल्लूकानांकीर्तनंनिषिद्धंतेषामेवदर्शनंशब्दितंवाननिषिद्धंशुभमित्यर्थः नद्युत्तारइति नद्यागंगादेरुत्तारणेभयेभयसंबंधिनीकार्येपलायनादिकेप्रवेशोगृहप्रवेशेसमरेसंग्रामेनष्टार्थस्यनष्टद्रव्यस्यसंवीक्षणेगवेषेप्रागुक्ताः शकुनाःव्यत्यस्तावपरीताज्ञेयाः शुभशकुनाविप्राश्चेत्यादयोऽशुभाज्ञेयाः वंध्या-

गोधाजाहकसूकरादिशशकानांकीर्तनंशोभनंनोशब्दोनविलोकनंच
कपिऋक्षाणामतोव्यत्ययः नद्युत्तारभयप्रवेशसमरेनष्टार्थसंवीक्षणे
व्यत्यस्ताः शकुनानृपेक्षणविधौयात्रोदिताः शोभनाः १०४ वामांगेको-
किलापल्लीपोतकीसूकरीरला पिंगलाच्छुछुकाश्रेष्ठाशिवापुरुषसं
ज्ञिता १०५

चर्मेत्याद्यशुभशकुनाशुभफलदाज्ञेयाः नृपेति नृपदर्शनार्थंगमनेयात्रायामुदिताविप्राश्चेत्यादयः शुभाज्ञेयाः नृपावलोकनेशकुनव्यत्ययाणवदित्युक्तोराजदर्शनस्यभयस्थानत्वादपवादोयम् १०४ अथान्यदप्यनुशास्ति वामांगेइति कोकिलापल्योप्रसिद्धौ पोतकीदुर्गेति सूकरीजात्यवटिका रलापक्षिविशेषः पिंगलाभैरवी छुछुकाछुछुंदरी शिवासृगाली पुरुषसंज्ञितापुं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम्नः कपोतखंजनतित्तिरीहेसादयः एतेगच्छनांराजादीनांवामांगेवामभागेशस्ताःस्युः १०५ अन्य
दप्यनुष्टुभाह छिक्करइति छिक्करोमृगजाति पिक्कः पक्षिविशेषः भासःश्रीकंठः वानरः एतेप्रसि-
द्धाः रुरुर्मृगविशेषः स्त्रीसंज्ञकाः स्त्रीनाम्नांमृगपक्षिणः दक्षिणभागगाः शुभाः शेषाःयसिद्धाः १०६
अथोक्तव्यतिरिक्तानांमृगपक्षिणांसामान्यतः प्रदक्षिणेनशकुनमनुष्टुभाह प्रदक्षिणगताइति रुरु
व्यतिरिक्तामृगाः पक्षिणश्चयात्रायांप्रादक्षिण्येनगताश्चलिताः श्रेष्ठाः शुभफलदाःस्युः परंतु ओजामृ
गाविषमसंख्यास्त्रिपंचसप्तादयश्चेद्गंतोरुष्टास्तदातिधन्याःस्युः वामेइति स्ववामभागेस्वरस्वनोगर्दभ

छिक्करःपिक्कोभासःश्रीकंठोवानरोरुरुः स्त्रीसंज्ञकाःकाकऋक्षा
श्वानःस्युर्दक्षिणाःशुभाः १०६ प्रदक्षिणगताःश्रेष्ठायात्रायांमृगप
क्षिणः ओजामृगाव्रजंतोतिधन्यावामेस्वरस्वनः १०७

शब्दोतिधन्यः अथ-
शकुनानांक्रियतांकालविशेषेनैर्बल्यमाह वराहः नद्यामेरण्यगोग्राह्योनारण्येग्रामसंस्थितः दिवा
चरोनशर्वर्योनचनक्तंचरोदिवा दुंदुरोगार्दितस्तत्रकलहामिषकांक्षिणः आपगांतरितामत्तानद्याह्याः
शकुनाः क्वचित् रोहिताश्चाजवालेयकुरंगोष्ट्रमृगाःशशाः निष्फलाःशिशिरेज्ञेयावसंतेकाककोकिलौ
ननुभाद्रपदेद्याद्यासूकराश्वद्वकादयः शरद्याक्षादगोक्षौंचाःश्रावणेहस्तिचातकौ व्याघ्रर्क्षवानरद्वी
पिमहिषासबिलेशयाः हेमंतेनिष्फलाज्ञेयावाला सर्वेविमानुषाइति प्रभग्नशुष्कद्रुमकंटकीषुश्म

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शानभस्मास्थितुषाकुलेषु ओकारशून्यालयजर्जरासुसौम्योपिपापशकुनःअकल्यःदैवज्ञमनोहरे वरंश्वयेदुर्जनकालसर्पौवरंक्षिपेद्व्याघ्रमुखेस्वमंगमवरंतरेद्वाग्निनिधिंकजाभ्यांनोल्लंघयेद्दुःशकुनंकदापि ॥ अथावश्यककार्येविरुद्धशकुनेजातेपरिहारमनुशास्ति आद्यइति आवश्यककार्येविरुद्धशकुनेजातेएकादशप्राणान्स्थित्वाएकादशप्राणपरिच्छेद्यंकालंस्थित्वेत्यर्थः ततःसमीचीनेशकुनेव्रजेत् तत्रापिविरुद्धेशकुनेसंवृत्तोषोडशसंख्याकान्प्राणान्स्थित्वाशुभशकुनेव्रजेत् तत्रापिपुनस्तृतीयेविरुद्धेशकुनेसंवृत्तेक्वचिदपिनव्रजेत् किंतुपरिवृत्यगृहमागच्छेत् द्वादशपूर्वक्षरैःप्राणइतिकथ्यतेन

आद्येपशकुनेस्थित्वाप्राणानेकादशव्रजेत् द्वितीयेषोडशप्राणांस्तृतीयेनक्वचिद्व्रजेत् ॥ यात्रानिवृत्तौशुभप्रवेशनंमृदुध्रुवैःक्षिप्रचरैःपुनर्गमः

तुप्राणायामत्रयमेवप्रतीक्ष्यमित्यर्थः उक्तंच यायीविरुद्धंशकुनमादौदृष्ट्वाप्रयत्नतःप्राणायामत्रयंकुर्याद्द्वितीयेद्विगुणंचरेत् तृतीयेपुनरावृत्यशांत्यायायाद्विनांतरेइति ॥ अथयात्रानिवृत्तौगृहप्रवेशमुपजात्याह यात्रानिवृत्ताविति मृदूनिचित्रानुराधामृगरेवत्यश्वाश्विनीहिण्युत्तराश्चैतानिनक्षत्रैः राज्ञोयात्रानिवृत्तौप्रवेशनंशुभदम् क्षिप्रचरैर्नक्षत्रैः अश्विनीपुष्यहस्ताभिजिद्भिश्रवणधनिष्ठाशतनाराःपुनर्वसुस्वातीभिश्चप्रवेशनेपुनरपिगमोयात्रास्यात् तस्मादेतानिमध्यमानि द्वीशादिनक्षत्रेषुप्रवेशोक्तमात्रूल्यादीनांनाशः यथा विशाखायांप्रवेशेस्त्रियोराज्ञानाशः कृत्तिकायांप्रवेशेगृ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हनाशोगृहंदग्धंस्यात् दारुणमेमूलज्येष्ठार्द्राश्लेषासुप्रवेशेपुत्रस्यनाशउग्रमेपूर्वात्रयमरणीमघासुप्र
वेशेआत्मनश्चस्वैवराज्ञोनाशस्यादित्यर्थः अग्न्यादिकिंचारोगृहप्रवेशप्रकरणात्ज्ञेयः अत्रेदंविचार्यंयत्र
मासेयात्राकृतातन्मासान्नवमेमासियात्रादिनान्नवमेदिनेचप्रवेशोनविधेयः निर्गमान्नवमेमासिप्र
वेशोनैवशोभनःनवमेदिवसेचैवप्रवेशोनैवकारयेदिति अथविवाहप्रकरणोक्तदोषानतिदेशेनाह दो
दोषाश्चशिष्याणामविस्मरणार्थमनुभाषिष्याह अयनर्क्षेति एतेअयनशूलादयोदोषाविवाहप्रकरणो
क्तदोषाश्चयात्रायांनेष्टाःतत्रायनशूलंसोम्यायनेसूर्यविधूतदोनशमिति मासोद्भवःशूलोद्विविधः ग्रंथां

दोषोऽनलेदारुणमेतथोग्रमेस्त्रीगेहपुत्रात्मविनाशनंक्रमात् ॥९॥ अ
यनर्क्षमासतिथिकालवासरोद्भवशूलसंमुखसितज्ञदिक्कृपाः भृगुवक्र
तादिपरिहारव्यदंडकरणृतुजाद्यशौचमपिचोत्सवादिकम् ॥१०॥

तत्रोक्तः वृषादित्रित्रिराशिष्वर्केप्राच्यादिदिक्षुनगंतव्यमित्येवंकपाटकंटकादिभ्यहीनायस्रोदयेत्रा
यरूत्रयोवृषाद्याश्चपूर्वाशादिबुधैःक्रमात्राशयोद्वादशैवंतुमेषांताःसृष्टिमार्गतः यत्रपूर्वादिकाशायां
वृषराश्यादिगोरविःसादिशास्तमिताज्ञेयास्त्रिस्त्रःशेषाःसह्योहिताइतिकपाटकंटकादिर्यथाकपाटं
पूर्वनोज्ञेयंकार्तिकादित्रिकंतथाभास्यनोवास्तुमधोरेकेनकंटकइतिज्योतिषार्कवचनात्नक्षत्रशू
लंनपूर्वदिशिशक्रेणविधुसौरिवारेतथेतितिथिशूलंयोगिनीनवभूम्यइतिसंमुखसितज्ञदिक्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पः संमुखः शुक्रः संमुखोबुधः संमुखोदिक्स्वामीललाटी भृगुवक्रतादि आदिशब्दात् क्षीणत्वास्त
मितत्वपराजितत्वबाल्यादिकम् वक्रास्तनीचेत्यक्तम् परिघास्त्र्यदंडः पूर्वादिषुचतुर्दिक्षित्यक्तः स्त्री
तुजाद्यशौचम् स्वस्त्रीऋतुजं आर्तवंस्नानकालपर्यंतं आशौचंजननाशौचंमरणाशौचंच उत्सवोदीपो
त्सवः आदिशब्देनविवाहव्रतबंधादिरिति ११० अन्यदपिमंजुभाषिणीछंदसाह मृतपक्षेति मृतःप-
क्षः तमोऽक्तकतारास्मृताविश्वसंख्यादत्याद्युक्तः रिक्तरविनर्कसंख्यकाः चतुर्थीनवमीचतुर्दशीहादः-
शीषष्ठ्यस्तिथयः उपलक्षणत्वादष्टमीपूर्णिमामावास्याशुक्लप्रतिपदः सौरिभौमरविवाराः वामपृष्ठग

मृतपक्षरिक्तरविनर्कसंख्यकास्तिथयश्चसौरिरविभौमवासराः
अपिवामपृष्ठगविधुस्तथाऽडलोवसुपंचकाभिजिदथापिदक्षिणे
१११ लग्नेजन्मर्क्षतत्त्वार्तिगृहमहितर्क्षाच्चषष्ठतदीशावालग्ने
कुंभमीनर्क्षनवलवतनूचापिपृष्ठोदयंच

विधुः अजवृषभमिथुनकुलीरादि
त्यादिजातकोक्त्यावामपृष्ठराशिगतः आडलोरवेर्भन्नोऽभोन्निरिति त्रयमणमपिज्ञेयम् वसुपं
चकंधनिष्ठोत्तराद्यंपंचनक्षत्राणि अभिजिन्मुहूर्तश्चदक्षिणेवर्ज्यएतेपंचांगदोषाः १११ अथलग्नदोषा
नभ्यधत्थाह लग्नेइति जन्मराशेर्जन्मलग्नाद्यः ष्टमगृहेऽहितर्क्षाच्चुजन्मराशेर्जन्मलग्नाद्यषष्ठम्
जन्मलग्नंयात्रालग्नेतदीशाः तेषांजन्मराशिजन्मलग्नाभ्यामष्टमभवनयोःस्वामिनः रिपुजन्मराशिजन्म

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लग्नात्यांषष्ठभवनयोःस्वामिनोर्वायात्रालग्ने कुंभमीनयोर्नवलवोनवांशलग्नंच पृष्ठोदयगोजाश्विकर्कीमिथुनाः समृगानिशास्याःपृष्ठोदयाविमिश्रकनाद्युत्याद्युक्ताः पृष्ठाशासंस्थमृक्षंगंतव्यादिग्विलोमलग्नम् दशमेशनिः सप्तमे काव्यः शुक्रःकेंद्रेवक्राः वक्रिणोग्रहाः वक्रिग्रहवाराश्च एतेदोषाः विवाहोक्तदोषाः उत्पातान्सहपातदग्धतिथि भिरित्याद्युक्ताःतेसर्वेयात्रायांवर्ज्याः तत्रसप्तमशुक्रव्यतिरिक्तोजामित्रदोषोनास्तीतिज्ञेयम् ११२ इतिप्रभिना क्षरायांयात्राप्रकरणंसमाप्तम् अथवास्तुप्रकरणंव्याख्यायते गृहनिर्माणप्रयोजनंभविष्यपुराणे गृहस्थ

पृष्ठाशामृक्षसंस्थंदशमशनिरथोसप्तमेचापिकाव्यःकेंद्रेवक्राश्चवक्रीग्र हदिवसविवाहोक्तदोषाश्चनेष्टाः ११२ इतिमुहूर्तचिंतामणौयात्रा प्रकरणंसमाप्तम् ७ ७ अथवास्तुप्रकरणप्रारंभः यद्भंकक्षते शादिञ्जितमसौग्रामःशोभनाभात्स्ववर्गीहृगुणंविधायपरवर्गाढ्यंगजैःशे षितम्

स्यक्रियाः सर्वानसिध्यंतिगृहंविना यतस्तस्माद्गृहारंभप्रवेशसमयौब्रुवे गृहंस्वस्तात्कंन सिध्यंतिनिःफलाभवंतीत्यर्थः इत्याद्यर्थमनस्यालोच्यग्रामादिषुस्वस्यशुभाशुभंलाभालाभादिविचारंशार्दूल विक्रीडितेनाह यद्भमितिनामभात्व्यावहारिकनामभात् व्यावहारिकनामराशेर्ऋक्षिकास्या यस्यग्रामादेर्भ यथा चरणादिसंज्ञकोग्रामराशिः मीनास्यः सचेद्वितीयोनवमः पंचमः एकादशसंस्थोदशमश्चस्यात्तदासौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रामस्यस्यशभः स्यात् अन्यथानशभइत्यर्थः यथानीलकंठराशेर्ऋक्षिकाख्यातत्पंचमोमीनराशिश्चरणा
द्वेरतश्चरणाद्दिर्नीलकंठस्यवासयोग्यःनामर्क्षेउक्तंच अत्रनामराशेरेवग्राह्यः काकिण्यांवर्गशुद्धौचवादे
द्यूतेस्ववोदये मंत्रेपुनर्भूवरणेनामराशेःप्रधानतइति अथग्रामात्मनोरुत्तमर्णाधमत्वंचाह स्ववर्गमिति
वर्गास्तुअकचटतपयशवर्गाःस्वगेशमार्जारसिंहशनांसर्पाखुमृगावीनांनिजपंचमवैरिणामष्टौइत्युक्ता
तत्रयस्यपुंसोयत्संख्याकोवर्गोगरुडादिस्तद्वर्गसंख्यांद्विगुणंविधायपरस्यग्रामादेर्वर्गसंख्यायाढ्यांचकु
र्यातैरष्टभिःशेषितमवशिष्टंतत्पुंसः काकिण्योज्ञेयाः एवंग्रामादेरपिवर्गसंख्यांद्विगुणीकृत्वापरस्यपुंसो

**काकिण्यस्तुलनयोश्चतूद्विवरतोयस्याधिकाःसोर्थदोथहारंद्विजवैश्यशू
द्रनृपराशीनांहितंपूर्वतः १**

वर्गसंख्यायाढ्यांकृत्वागजैर्भजेदवशिष्टाः ग्रामस्यका
किण्योभवंति एवंअनयोःपुरुषग्रामयोःकाकिणीनांविवराद्यस्याधिकाअवशिष्यंतेसोर्थदः परस्यलाभ
दःयथा नीलकंठस्यवर्गःसर्पः तत्संख्या ५ द्विगुणः १० चरणाद्विर्वर्गःसिंहः ३ तत्संख्ययायुक्ता १३ गजभ-
क्तावशेषं ५ नीलकंठस्यकाकिण्यः एवंग्रामवर्गसंख्या ३ द्विगुणा ६ नीलकंठवर्ग ५ संख्ययायुक्ताः ११ अ
ष्टभक्ताशेषं ३ ग्रामस्यकाकिण्यः द्वयोरंतशेषं २ नीलकंठस्याधिकत्वेनदातृत्वाद्व्यहानिरित्यर्थःउक्तंच
स्ववर्गद्विगुणीकृत्यपरवर्गेनयोजयेत् अष्टभिस्तुहरेद्भागंयोधिकःसऋणीभवेदिति अथद्वारवेशन
माह अथेति द्विजादिराशीनांपुंसांक्रमेणपूर्वतः प्राच्यादिदिक्कचतुष्टयेद्वारंहितम् यथा द्विजराशीनां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्कवृश्चिकमीनानांपूर्वदिशि वैश्यराशीनांवृषकन्यामकराणांदक्षिणदिशि शूद्रराशीनांमिथुनतुलाकुंभानांपश्चिमदिशिनृपराशीनांमेषसिंहधनुषांउत्तरदिशिद्वारंहितम् १ अथराशिपरत्वेनग्रामनिवासेनिषिद्धस्थानानिवसंतनिलकयाह गोसिंहेति वक्तुमिष्टस्यग्रामस्यवस्त्रविभागवन्नवधाविभागंकृत्वामध्येविभागेगोसिंहनक्रमिथुननिवसेन्नमध्येग्रामस्यवृषसिंहमकरमिथुनराशिमंतःपुरुषानवसेयुः अथपूर्वककुभःपूर्वदिशातोष्टदिग्गतोदक्षिणदिक्कअलिर्वृश्चिकस्तदादिराशिमंतःपुरुषानवसेयुः यथा पूर्वस्यांवृश्चिकः आग्नेय्यांमेषोमीनः दक्षिणस्यांकन्यानैर्ऋत्यांकर्कः पश्चिमायांधनुः वायव्यांतुलाउत्तरस्यांमेषः ईशान्यांकुंभःनव

गोसिंहनक्रमिथुननिवसेन्नमध्येग्रामस्यपूर्वककुभोलिमेषांगनाश्च
कर्कोधनुस्तुलमभमेषघटाश्चतद्वद्वर्गाःस्वपंचमपराबलिनःस्युरेद्याः २
एकोनितेष्टर्क्षहृताद्विनिघ्नोरूपोनितेष्टायहतेंदुनागैः

सेदित्यर्थः यथा अवर्गःपूर्वस्याम् कवर्गआग्नेय्याम् चवर्गोदक्षिणस्याम् टवर्गोनैर्ऋत्याम् तवर्गःपश्चिमायाम् पवर्गोवायव्याम् यवर्गउत्तरस्याम् शवर्गईशान्याम् बलीइत्यर्थः कीदृशःवर्गाःस्वपंचमपराःस्वस्मात्पंचमःपरःशत्रुर्येषांते यथा अवर्गःपूर्वस्यांबली अनेनपश्चिमायांद्वारंनिवासोनविधेयः एवंकवर्गादीनामपिवायव्यादौद्वारंनिवासोवानविधेयः २ अथेष्टनक्षत्रायाभ्यांदृष्टभूम्याविस्तारायामभिद्वघ्नेद्वंशापूर्वार्धेनाह एकोनितेति स्वेष्टायेतिच तत्रराशिकूटादिदंपत्योरिवचिंतयेदिनिवसिष्ठोक्तेः यदेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नक्षत्रंव्यवहारनाम्नाविवाहोक्तमेलापकविधिनाशुभदंस्यात् तदेवस्वेष्टभंकल्प्यम् यश्चध्वजादृष्टा
येविषमआयर्दीप्सितःस्यात्सएवेष्टायः कल्प्यःताभ्यांविस्तारायामज्ञानम् यथा नीलकंठस्यानुराधान-
क्षत्रंतस्यरोहिण्यासहमेलापकःसंभवतीतोष्टभंरोहिणीकल्पितम् तत्संख्या ४ एकोनितेष्टर्क्षे ३ अने
नहतिघ्नो १५२ हताः ४५६ इष्टायः सिंहः कल्पितः तृतीयःरूपोनितइष्टायः २ अनेनेंदुनागाः ८१ गु
णिताः १६२ युताः ६१८ घनेभ्र १७ युताः ६३५ भूपाश्विभि २१६ विभक्तःशेषे २०३ इदमेवक्षेत्रफलं
गृहस्यइष्टायनक्षत्रभवम् अथकल्पितदैर्घ्यम् २९ अनेनभक्तेलब्धोविस्तारः ७ अथकल्पितविस्तृ
तिः ७ भक्तोलब्धंदैर्घ्यं २९ अत्रगोपीराजाचार्यकृतंसूत्रम् विष्णुंव्येकायगोभू १९ हतिभयुजिफ-

युक्ताधनै १७ श्चापिसुताविभक्ताभूपाश्विभिःशेषमितोहिपिंडं ३

लंगोपिराजोभशेषात्सायंवेशाष्टिहृद्घ्या २१६ युतमहि ८ हतादृक् २ प्रकृत्या २१ स्व्यविश्वे १३॥ बाणाः
५ सिद्ध २४ ष्टि १६ नागो ८ द्ध २७ निधृति १९ गिरिश ११ घ्या ३ कृतीं २२ द्र १४ र्तु ६ तला २५ त्स्व
१७ क ९ क्षा १ नस्वे २० ना १२ र्णव ४ विकृति २३ दिना १५ द्या ७ कृती २६ भेंदु १८ काष्टा १० गोपीराजः
कथयतिविष्णुम् गोभूहतिभयुजिसतिअहिहतादृक्प्रकृत्यास्व्यविश्वादयः कलंआह विगतः एकोय
स्मात्सव्येकः सचासौंआयश्चव्येकायः ध्वजादिरिष्टायः सचगोभवश्चएषांपरस्परगुणानांव्येकायगोभू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हतिश्चभंचव्येकायगोभूहतिभेतयोर्युक्व्येकायगोभूहतिभयुक्तस्मिन्त्सतिभशेषात्भै २७ भक्तेस-
तियच्छेषम् तस्माद्विष्णुनामानंशिष्यंअहिहता अष्टगुणितादृक्द्वौ यक्त्यारव्याएकविंशति विश्वेत्रयोद्
शेत्यादयोगृहक्षेत्रफलम् सायइष्टायसहितंआहवदति अत्रोदाहरणम् इष्टायः ३ व्येकः २ गोभू १९ हतिः
३८ इष्टर्क्षंरोहिणीतत्संख्यया ४ युतम् ४२ अस्मात्भैः २७ शेषं १५ एतत्संख्यायाफलम् २५ अहि ८ हत
म् २०० सायम् २०३ इदंस्वेष्टायनक्षत्रभवंक्षेत्रफलंपूर्वसममेव महद्गृहमाणमाह येनि वाऽथवातनइ
ष्टायसहितंजातंयत्क्षेत्रफलंअष्टिदृग्भ्येषुयुतंअष्टिभ्यदृशभ्यअष्टिदृशः अष्टिदृग्भिःषोडशाधिकद्विशत्या
२१६ हतोगुणितोयइष्टःएकहित्याद्यंकः तेनयुक्तंकार्यमित्यर्थः अत्रैवाचार्यप्रपौत्रगोपिराजस्यापिपद्यम्

स्वेष्टायनक्षत्रभवोथदैर्घ्यंहत्स्याद्विस्तृतिर्विस्तृतिहृच्चदीर्घता आ
याध्वजोधूमहरिश्वगोखरेभध्वांक्षकाःपिंडइहाष्टशोषिते ४

इष्टर्क्षाद्यमुनींदवोद्विरहि ८ हृच्छेषात्यजेत्स्वायतोनोचेच्छुद्धातिशोध्यमष्टसहिताच्छेषंत्रिहृत्सायकम्
चेत्स्यादिष्टयुतंयथातुतदशेषंस्यादथोरामहृत्यासघ्नाद्विकरान्विताः फलमभीष्टायर्क्षजंजायते सिद्धैर्भक्तः
स्यात्करादिष्टदीर्घमानार्थंचेकादिनिघ्नान्भभोगान् तावद्यावत्यक्षिपेदिष्टभानविस्तारस्यादिष्टदैर्घ्येणभक्ते
३ अथोनरार्धेनध्वजाद्यायानाह आर्यैर्वर्णपरत्वेनचहारनिवेशनमुपजात्याह आयाइति ध्वजादिकाइति
पिंडेक्षेत्रफलेअष्टशोषितेयदवशिष्टंतत्परिमिताध्वजादिकाआयाःस्युः ध्वजधूमौगजसिंहौ हरिःसिंहः श्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुक्कुरगौरैषःखरोगर्दभःरभोहस्ती ध्वांक्षःकाकःस्वार्थेकः ४ सर्वदिशीति ध्वजारव्येआयेसर्वदिशि दिक्चतुष्टयेपिगृहद्वारंकार्यम् हरौसिंहाख्येपूर्वदक्षिणोत्तरदिक्द्वारंकार्यम् नपश्चिमादिशि तथावृषा रव्येप्राच्यांदिश्येवद्वारंनान्यदिक्क गजाख्येआयेपाग्यमयोःपूर्वदक्षिणदिशोःगृहद्वारंकार्यम् आयानांप्र योजनमाह विश्वकर्मा वृषंसिंहंगजंचैवखुंटेकर्पटकाटयोः द्विपःपुनःप्रयोक्तव्योवापीकूपसरस्सुच मृगेंद्रमासनेदद्याच्छयनेषुगजंपुनः वृषंभोजनपात्रेषुछत्रादिषुपुनर्ध्वजम् अग्निवेश्मसुसर्वेषुगृहेवन्ह्युपजी विनाम् धूमंनियोजयेत्तेनिस्थानंस्लेंछादिजातिषु खरोवेश्यागृहेशस्तोध्वांक्षश्चापिकुटीषुच वृषसिंह

ध्वजादिकाःसर्वदिशिध्वजेसुखंकार्यंहरौपूर्वयमोत्तरेतथा प्राच्यांवृ षेप्राग्यमयोर्गजेयवापश्चादुदक्पूर्वयमेद्विजादितः ५

ध्वजश्चापिप्रासादपुरवेश्मनि गजायेवाध्वजायेवागजानांसदंशकम् अश्वाख्येध्वजायेचखरायेवृष भेपिवा अमंत्रशस्त्रवस्त्राणांवृषायेवाध्वजेपिवा आदुकोपानहोकार्येसिंहाख्येप्यथवाध्वजे उक्तानामप्य नुक्तानांसर्वेषांचध्वजःशस्यइति अथब्राह्मणादिवर्णपरत्वेनद्वारनिवेशनमाह अथवेति द्विजादितोब्राह्म णादिवर्णविभागेनपश्चादुदक्पूर्वयमे यथा ब्राह्मणस्यपश्चान्मुखम् क्षत्रियस्योदङ्मुखम् वैश्यस्यपूर्व मुखम् शूद्रस्यदक्षिणामुखमित्यर्थः श्रीपतिः ध्वजेप्रतीचीमुखमग्रजानामुदङ्मुखंभूमिभृतांचसिंहे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशोवृषे शाग्वदनंगजेतुशूद्रस्यवास्याननभामनंतांति ॥ अथगृहारंभेविशिष्यकालनिषेधमुपजात्या ह गृहेशेति अर्केंद्वोज्यशुक्रेबिबलेनिर्बलेअस्तेअस्तंगतेनीचेनीचराशिगतेसतिक्रमात् गृहेशतत्स्त्री सुखवित्तनाशोभवति यथा सूर्येनिर्बलेनीचस्थितेगृहेशस्यनाशः इंदौचंद्रेनिर्बलेअस्तमितेनीचगतेवा गृहेशस्यस्त्रीनाशः गुरौईज्येनिर्बलेऽस्तगेनीचगतेवागृहेशस्यसुखनाशः शुक्रेनिर्बलेऽस्तगेनीचगेवावित्त नाशः वसिष्ठस्तु नीचेशत्रुगतेजीवेशुक्रेचंद्रेऽथवारौ निर्गतंसदनंशश्वदतिनिस्वत्वमाप्नुयादिति अस्तदोषोनग्राह्यः प्राहुर्दैवज्ञकोबुधः नास्तिदोषः सदाचंद्रेनमेत्रेऽस्यनीचतइति कर्तुरिति यन्न

गृहेशतत्स्त्रीसुखवित्तनाशोऽर्केंद्वोज्यशुक्रेबिबलेऽस्तनीचे कर्तुःस्थि तिर्नोविधुवास्तुनोर्भेपुरस्थितेपृष्ठगतेरवनिःस्यात् ॥

क्षत्रेदिनचंद्रस्तद्विधुभम् यत्गृहस्यविस्तारायामवशादुत्पन्नभंतद्गृहभंतस्मिन्पुरस्थितेसंमुखस्थिते सतिकर्तुर्गृहनिर्माणकर्तुस्तद्गृहेस्थितिर्निवासोनस्यात् पृष्ठगतेवाविधुवास्तुनोर्भेसतिस्वनिःस्वननंचो रकृतायद्वारंतद्दोषात्सर्वस्वहानिःस्यादित्यर्थः पुरःपृष्ठस्थितत्वंचदिग्द्वारभक्रमेण यथा गृहेद्वारंयस्यां दिशिविधिस्तिर्तंतद्दिक्षत्रेषुचगृहारंभोनकार्यः वामदक्षिणनक्षत्रेषु गृहारंभःसुखेनकार्यः यदुक्तंब ह्मयांमना गृहायलब्धऋक्षेचयन्नक्षत्रेचचंद्रमाः बालाकासप्तकेदेयंछत्तिकादिक्रमेणच वामदक्षि णभागेतत्प्रशस्तंशांतिकारकम् अयपृष्ठेनदातव्यंयदिच्छेच्छ्रेयआत्मनः ऋक्षचंद्रस्यवास्तोश्चअयपृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्टेनशस्यतदति अयमाशयः कृत्तिकादिसप्तनक्षत्रेषु अनुराधादिसप्तसक्वागृहनक्षत्रेचंद्रनक्षत्रे
चसतिपूर्वद्वारंपश्चिमद्वारंवानकार्यम् तत्रचंद्रः पृष्ठस्थितोअग्रस्थितोवाभवति एवंमघादिसप्तसक्ध
निष्ठादिसप्तसक्वागृहनक्षत्रेचंद्रनक्षत्रेवासतिदक्षिणद्वारमुत्तरद्वारंवानकार्यमित्यर्थः ६ इदानींव्यय
कथनपुरःसरसफलमंशकज्ञानंउपजात्याह भमिति प्रागुक्तदिशाकल्पितंयद्गृहंतत्रनागैरष्टभिस्त
ष्टंअवशिष्टंव्ययईरितः यथा रोहिणीषं ४ अयमेवव्ययः असौव्ययः ध्रुवादिनामाक्षरयुक् ध्रुवादिना
मान्यधुनैववक्ष्यतियत्नयानिदिक्षनामानिदिक्षुद्वाराणिचिकीर्षितानितदनुरोधेनयदागतंध्रुवादिना

भंनागतष्टंव्ययईरितासौध्रुवादिनामाक्षरयुक्सपिंडः तष्टोगुणैरिं
द्रकृतांतभूपाहंशाभवेयुर्नशुभोतकोत्र ७ दिक्षुपूर्वादितःशाला
ध्रुवाभूहौकृतागजाः

मतदक्षरसंख्ययायुक्तः ततःसपिंडः प्रागानीतपिंडाढ्यकः गुणै-
स्त्रिभिस्तष्टोभक्तावशिष्टः एकद्वित्रिशेषेण इंद्रयमराजसंज्ञकास्त्र्यंशाःस्युः अत्रगृहारंभेंशकोयमा
स्त्र्यंशकोनशुभः अर्थादिंद्रराजानौशुभफलदौ ७ अथशालाध्रुवाद्यानयमनुष्टुभाह दिक्ष्विति पा
च्यांद्वारचिकीर्षितेशालाध्रुवांकएकः दक्षिणस्यांद्वौ पश्चिमायांकृताश्चत्वारः उत्तरस्यांगजाअष्टौ अथ
दिक्परत्वेनयावंतिद्वाराणिएकंद्वेत्रीणिचत्वारिवाचिकीर्षितानितावतांशालाध्रुवकानांसंयोगः सैकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकयुतःसन् ध्रुवादिकंवेश्मगृहंस्यात् यथा पूर्वस्यांपश्चिमायांद्वारेअभीष्टेशालाध्रुवो १।४ अनयोर्यो गः ५ सैकः ६ गृहंजातंकांताख्यम् एवंपूर्वदक्षिणोत्तरदिक्षुशालाध्रुवाणां १।२।८ संयोगः ११ सैकः १२ धनदास्यंगृहम् दिक्चतुष्टयेविजयाख्यंगृहंषोडशमिति ८ अथध्रुवादीनांनामाक्षरसंख्यायथाच क्रंछंदसाह तिथ्यर्केति दिक्षुपूर्वादितइत्यादिनायत् ध्रुवादिवेश्मसमागतंशालाध्रुवांकसंयोगः सैकोवे श्मेत्यक्तदिशासंख्यामवधारयेत् सात्वेसंख्यापंचदशीद्वादशीअष्टमीषोडशीनवमीएकादशीचतुर्दशी वास्यात्तदागृहनामाक्षरंत्रयात्मकंस्यात् १५ १२ ८ १६ ९ ११ १४ अत्रत्रीण्येवाक्षराणिसैवसंख्या मथ

शालाध्रुवांकसंयोगःसैकोवेश्मध्रुवादिकम् ८ तिथ्यर्काष्टाष्टिगोरुद्रश
केनामाक्षरंत्रयम् भूद्व्यब्धिखगदिक्पवह्निविश्वेषुहीनगेऽब्धयः ९ ध्रुव
धान्येजयनंदीप्तवरकांतमनोरमंस्फुरत्सुखंदुर्मुखंवाग्यम्

माद्वितीयाचतुर्थीपंचमीषष्ठीदशमीतृतीयात्रयोदशीवास्यात् तदागृहनामद्वयंअक्षरद्वयात्मकंस्यात् सासंख्यासप्तमीस्यात् तदाध्रुवश्चतुरक्षरंगृहनाम ९ अथयद्यपिध्रुवादिनामाक्षरसंख्याज्ञानंपाकृप-द्येनैवजातंतथापितन्मध्येकानिशुभानिकान्यशुभानिइत्यसदृशफलसूचनार्थंषोडशगृहाणांनामानि अयोगीतिछंदसाह ध्रुवधान्येइति अत्रार्यागीतिलक्षणंवाआर्यापूर्वार्धेयदिगुरुणैकेनाधिकेननिध नैर्युक्तंइतरत्तद्वन्निखिलंयदीयसुदितेयमार्यागीतिरिति अत्रार्यासापूर्वार्द्धे॥ १०१॥ ११०॥ १०॥ ॥११०११उ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नरार्कैः ॥ ७-१ ॥ ११-॥ १-।१-॥ ।-१-१।१-११ सामान्यलक्षणमप्यनुसंधेयम् विशेषलक्षणस्यसामान्यलक्षणा धीनत्वात् निधनेभांतेऽकंमूर्ध्वमुखंप्रथमंगृहम् धान्यंपूर्वद्वारंद्वितीयंजयंदक्षिणद्वारंतृतीयम् नंदंभाक्दक्षिणद्वारंचतुर्थम् खरंपश्चिमद्वारंपंचमम् कांतंभाक्पश्चिमद्वारंषष्ठम् मनोरमंदक्षिणपश्चिमद्वारंस प्तमम् ऋक्षंभाग्दक्षिणपश्चिमद्वारमष्टमम् दुर्मुखमुत्तरद्वारंनवमंक्रूरंपूर्वोत्तरद्वारंदशमम् रिपुदंदक्षि णोत्तरद्वारमेकादशम् वित्तदंपूर्वदक्षिणोत्तरद्वारंद्वादशम् नाशाख्यंपश्चिमोत्तरद्वारंत्रयोदशम् आक्रं दंभाक्पश्चिमोत्तरद्वारंचतुर्दशंविपुलाख्यंदक्षिणपश्चिमोत्तरद्वारंपंचदशम् विजयंचतुर्दिक्द्वारंषोडशम्

रिपुदंवित्तदनाशेत्वाक्रंदंविपुलंविजयास्त्यंस्यात् १० पिंडेनवांकांग रजाग्निनागनागाब्धिनागैर्गुणिते क्रमेण विभाजितेनागनगाकसू र्यनागर्क्षतिथ्यर्क्षरवभानुभिश्च ११

इति ॥ अथकेषांचिन्मतेनगृहस्थापादिनवकम पुजातिका पथ्यावक्रास्थाभ्यामाह पिंडइति आयइति पिंडे क्षेत्रफलेनवधास्थापितेक्रमेणनवादिरंकै र्गुणितेक्रमेणनागादिभिरंकैर्भक्तेचसतियदवशिष्टंतदायादिकंस्यात् यथा क्षेत्रफलंनवभिर्गुणितं अष्ट भिर्भक्तंशिष्टमायःस्यात् तद्यथापिंडः २०३ नवगुणितः १८२७ अष्टभक्तेशेषम् ३ सिंहायोजातः एवंसर्वे प्यानीताः इमेवारः ७ अंशकः ५ द्रव्यम् ४ ऋणम् १ नक्षत्रं ४ रोहिणीतिथिश्चतुर्थी ४। योगः २ प्रीतिः आ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युः६४ उक्तंच गोः९ कः९ वे६ ष्ट८ गुणा३ ष्ट८ नाग८ जलधि४ व्यालै८ र्हतंभूफलंनागा८ ब्धिः७ कः९ दि-
वाकरा१२ ष्ट८ भ२७ तिथी१५ योगैः२७ खसूर्यै१२० र्भजेत् आयंवारमथांशकंधनमृणंतारांतिथिंचिंत
येद्योगंचासुरिनीहशेषकपदेभागेहृते तांत्रिकैरिति यथेषांप्रयोजनम् विषमायःशुभायैवसमायःशोक
दुःखदःताराणां सूर्यारवारराश्यंशाःसदावन्हिभयप्रदाः यथागणितगतोभौमवारः सनिंद्यः तद्राशी मे
षवृश्चिकौतौनिंद्यौ तदंशायस्मिन्कस्मिंश्चिल्लग्नेमेषवृश्चिकनवांशानिषिद्धाः एवंसूर्यवारोपि अन्येषां-
वारराश्यंशाःशुभाः अंशानांच गृहस्थागतनक्षत्रंतद्विराश्यात्मकंयदि तन्नवांशवशात्तत्रज्ञातव्यंसर्वदागृह
इति कृत्तिकाद्विराश्यात्मिकावशेषेमेषः द्व्यादिशेषे वृषः मृगेद्व्यधिकशेषेमिथुनम् अन्यथावृषः पुनर्व-
सावप्यंशकत्रयंयावन्मिथुनम् अन्यथाकर्कः एवमुत्तरफाल्गुन्यादिषुद्विराश्यात्मकेषूहनीयंनतुनिः सं-
दिग्धेषश्विन्यादिषु धनर्णयोश्च धनाधिकंगृहंवृद्धौनिर्धनंयदृणाधिकमिति नक्षत्रस्य विपत्प्रदाविप
त्तारापत्यराप्रतिकूलदा निधनारव्यातारकानुसर्वदानिधनप्रदा अस्यार्थः गृहकर्तुर्नक्षत्राद्गृहभसंख्या
नवभक्तावशिष्टंयदिविपत्तारादिकंस्यात् तदागृहमनिष्टंस्यात् अन्यथाशुभानि कथयेत् दत्तेदुःखंतृ-
तीयर्क्षेपंचमर्क्षेयशः क्षयम् आयुःक्षयंसप्तमर्क्षेकर्तृभाद्यादिसद्यभमिति यदातुगृहकर्तुर्गृहस्यचैक
मेवनक्षत्रंतत्रस्थमेवनिर्णयमाह गृहेति गृहेशर्क्षस्वामिनक्षत्रंप्रागुक्तप्रकारेणानीतंगृहभंचतयोरै
क्यंएकमेवचेद्भंस्यात्तद्गृहकर्तुर्मरणप्रदंस्यात् गृहस्थतत्पतेस्त्वेकंधिष्ण्यंचेन्निधनप्रदमितिवसिष्ठोक्तेः
वास्तुशास्त्रेद्विराश्यात्मकभेषुराश्यादिनिर्णयोन्यथाभिहितः अश्विन्यादित्रयंमेषेसिंहेप्रोक्तंमघात्रयम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलादित्रितयंचापेशेषेषुनवरांशपइति अयंपक्षोवास्तुशास्त्रेनवांशानुक्रमेरुक्तः गृहस्यनक्षत्रराशिज्ञा
नेवर्णोवश्यमित्यादयुक्तप्रकारेणगृहस्वामिनक्षत्रराशिवशात्घटितादिविचारोविधेयः तत्रनाडीवेधेप्रा
शस्त्यमुक्तंचिंतामणौ सेव्यसेवकयोश्चैवगृहतत्स्वामिनोरपि परस्परंमित्रयोश्चेदेकनाडीप्रशस्यतइति
तिथिप्रयोजनंदर्शरिक्तांश्चवर्जयेदिति योगानामपिदुष्टयोगाश्चवर्ज्याः आयुःप्रयोजनंतावत्कालंगृहाव-
स्थितिरिति अत्राभीष्टांशादिसिध्यर्थं अंगुलादिकंप्रक्षिप्यविशोध्यवाक्षेत्रफलंसाध्यम् १२ अथगृहा
रंभेवृषवास्तुचक्रंशालिनीप्यामाह गेहाद्यारंभइति लाभोरामैरिति गेहंगृहंआदिशब्देनप्रासादयामा

आयोवारोंशकोद्रव्यमृणमृक्षंतिथिर्युतिः आयुश्चाथगृहेशर्क्षंगृहभैक्यं
मृतिप्रदम् १२ गुणकाः ९ १ ६ ८ ३ ८ ८ ४ ८ भाजकाः ८ ७ ९ १२ ८
२७ १५ २७ १२० गेहाद्यारंभेऽर्कभाद्दत्सशीर्षेरामैर्दाहोवेदभैरग्रपादे शून्यं
वेदैःपृष्ठपादेस्थिरत्वंरामैःपृष्ठेश्रीर्युगैर्दक्षकुक्षौ १३

दितदारंभेसतिअर्कभात्सूर्यो
क्तनक्षत्रात्रामैस्त्रिभिर्भैर्वृषस्यवत्सस्यशीर्षस्थितैःसद्भिःदाहःफलंस्यात् ततोवेदभैः अग्रपादेपुर-
स्थितपादद्वयस्थितैःशून्यगृहंजनवासरहितंस्यात् ततश्चतुर्भैःपृष्ठपादद्वयस्थैः स्थिरत्वंगृहकर्तुः ततो
रामैःपृष्ठस्थैःश्रीस्यात् ततोयुगैःचतुर्भिःदक्षिणकुक्षिस्थितैः लाभःततस्त्रीभिःपुच्छगैःस्वामिनोगृह

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्तुर्नाशः ततोवेदैः वामकुक्षौस्थितैः नैस्व्यंदारिद्र्यम् ततस्त्रिभिर्मुखस्थैः गृहकर्तुः पीडासंततंअनवरतंस्यात् उक्तंचभात्तृचरणैः त्रिवेदवेदाग्नियुगाग्निवेदत्रिकेषुभानोः शशिभंगृहेषु दाहोविनाशः स्थिरताधनंस्थीः शून्यंचदारिद्र्यमृतिः क्रमेणेति अथैतत्स्थानिष्कृष्टार्थमाहवेंति अर्कधिष्ण्यादशैः सप्तभैस्सफलम् ततोरुद्रैरेकादशधिष्ण्यैः सफलम् ततोदिग्भिर्दशनक्षत्रैरसत्फलमुक्तंस्यादितिनिष्कृष्टोर्कः उक्तंच रविभात्सप्तनेशानिशुभान्येकादशाष्टभात् दशशेषाण्यनिष्टानिसाभिजिद्वृषवास्तुनीति १३

लाभोरामैः पुच्छगैः स्वामिनाशोवेदैर्नैस्व्यंवामकुक्षौमुखस्थैः रामैः पीडासंततंवार्कधिष्ण्यादशैरुद्रैर्दिग्भिरुक्तंत्यसत्सत् १४ कुंभेर्केफाल्गुनेप्रागपरमुखगृहंश्रावणेसिंहकर्क्योः पौषेनक्रेचयाम्योत्तरमुखसदनंगोजगेर्केचराधे मार्गेजूकालिकेसत्क्रमृदुवरुणस्वातिवस्वर्कपुष्यैः सूतीगेहंत्वदित्यांहरिभविधिभयोस्तत्रशस्तःप्रवेशः १५

१४ अथसूर्यचंद्रमासैक्येनप्रागादिदिक्कद्वाराणिगृहनिर्माणनक्षत्राणिचस्वग्धरयाह कुंभेर्केइति कुंभस्थेसूर्येफाल्गुनेचमासिप्रागपरमुखंगेहंप्राङ्मुखंपश्चिममुखंवागृहंसत्शुभफलंस्यात्श्रावणेमासेसिंहकर्किसंक्रांत्योश्चप्राङ्मुखंपश्चिममुखंवागृहंस्यात् पौषेमासेनक्रेमकरसंक्रांतौचप्रागपरमुखंगृहंस्यात् अथगोजगेःकेवृषमेषगेसूर्येराधेवैशाखेमासियाम्योत्तरमुखंसदनंशुभंस्यात् मार्गेमार्गशीर्षेजूकालिगेतुलावृश्चिकगतेसूर्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सतियाम्योत्तरमुखसदनंदक्षिणमुखमुत्तरमुखंवासदनंगृहंस्यात् गृहसंस्थापनंसूर्येमेषगे शुभदंभवेत् वृषस्थेधनवृद्धिःस्यान्मिथुनेमरणंध्रुवंकर्कटेशुभदंमोक्तं सिंहेभृत्यविवर्धनम् कन्या रोगंतुलासौख्यंवृश्चिकेधनवर्धनम् कार्मुकेचमहाहानिर्मकरेस्याद्धनागमः कुंभेतुरत्नलाभःस्यान्मीने सद्यभयावहमिति चांद्रमासानाह श्रीपतिः शोकोधान्यंमृतिपशुहृतीद्रव्यवृद्धिर्विनाशोयुद्धंमृत्यक्षति रथधनंश्वाश्ववद्भैर्भयंच लक्ष्मीप्राप्तिर्भवतिभवनारंभकर्तुःक्रमेणचैत्रादूचेमुनिभिरितिफलंवास्तुशा स्त्रोपदिष्टंइति अत्रसौरचांद्रेमासानांमहान्शुभाशुभफलविरोधः अत्रचिंतितगृहद्वारानुकूल रविसंक्रमसमीचीनविहितमासेष्वेववैशाखादिषुगृहारंभःकार्यइतिविरोधाभावइतितथैवोपनिबद्धं हरनियममाह श्रीपतिः कर्किनक्रहरिकुंभगतेर्केपूर्वपश्चिममुखानिगृहाणि तौलिमेषवृषवृश्चिकयो गेदक्षिणोत्तरमुखानिचकुर्यात् अन्यथायदिकरोति दुर्मतिर्व्याधिशोकभयनाशमश्नुते मीनचाप मिथुनांगनागतेकारयेत्रगृहमेवभास्करेइति तत्रकुंभार्कसहितेफाल्गुनेप्रागपरमुखंगृहंकार्यम् उ- भयोर्विहितयोरेकवाक्यताश्रयणात् एवमन्येपिसर्वत्र जगन्मोहने पाषाणेष्टादिकेहानिर्निंद्यमासेन कारयेत् तृणदारुगृहारंभेमासदोषोनविद्यतइति अथनक्षत्राण्याह ध्रुवाणि रोहिण्युत्तरा त्रयम् मृदुनिमृगरेवतीचित्रानुराधाचरुणःशततारकास्वाती चसूर्धनिष्ठा अर्कोहस्तःपुष्यश्चएषु भेषुगृहनिर्माणंसत्शुभंस्यात् गर्गः श्रुतरेपिचरोहिण्यांपुष्येमैत्रेकरद्वये धनिष्ठाहितयेपौष्णे- गृहारंभःप्रशस्यतइति अत्रमृगोनोक्तः तदुक्तिश्चमहेश्वरासुक्तेः सूतीगेहमिति अदित्यांपुनर्वसौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूतिकागृहनिर्माणंप्रशस्तम् तत्रेति तत्रसूतीगृहेहरिभविधिभयोःश्रवणाभिजितयोर्नक्षत्रयोःप्र
वेशःशस्तःस्वातिःपुनर्वसौ नृपादीनांकर्तव्यंसूतिकागृहम् श्रवणाभिजितोर्मध्येप्रवेशंतत्रकारयेदिति
अत्रनृपपदोपादानात् ब्राह्मणानांपूर्वोक्तनक्षत्रमेवकार्यम् आवश्यकत्वेतुश्रवणाभिजितोर्मुहूर्तेन
दुदयोवागात्यः तच्चसूतिगृहंनैर्ऋत्यांकार्यम् नैर्ऋत्यांसूतिकागृहमितिवसिष्ठोक्तेः वराहेणात्रानेकन
क्षत्राण्यभिहितानि हस्तादित्यशशांकपुष्यपवनप्राजेशमित्रोत्तराचित्राश्विश्रवणेषु वृश्चिकघटौहि
त्वाविरिक्तेतिथौ शुक्राचार्यशनैश्चरज्ञशशिनांवारेनुकूलेविधौसद्भिर्वेश्मनिसूतिकागृहविधिः क्षेमं-
करःकीर्त्यतेइति नवमेमासिसूतिकागृहेप्रवेशःकार्यःगर्गः मासेतुनवमेप्राप्तेपूर्वपक्षेशुभेदिने सूति-
कासंभवेकालेसद्यएवप्रवेशयेत् रोहिण्यैंदवपौष्णेषुस्वातीवारुणयोरपि पुष्येपुनर्वसौहस्तेधनि-
ष्ठात्र्युत्तरासूचमैत्रेत्वाष्ट्रेतथाश्विन्यांसूतिकागारप्रवेशनम् सर्वेशुभग्रहाःकेंद्रेपणाश्चत्रिषडायगाः
शुभांशेशुभसंदृष्टौसूतिकाप्रवेशनंशुभमिति अथप्रागभिहितानांसौराणांचांद्राणांमासानांप्र
कारांतरेणैकवाक्यतांशार्दूलविक्रीडितेनाह कैश्चिदिति पूर्वदिग्द्वारप्रवेशनैकवाक्यतोक्तान्इदानींमेष
स्थेरवौमधौचैत्रमासेगेहंप्रारब्धंशुभंस्यात् तथावृषस्थेसूर्येज्येष्ठमासेकर्कस्थेशुचावाषाढेसिंहग
तेर्केभाद्रपदेमासितुलास्थेरवौआश्वयुज्याश्विनेमासे अलौवृश्चिकस्थेर्केऊर्जेकार्तिकमासे मृगे
मकरस्थेर्केपौषमासे नक्रघटेमकरेकुंभेर्केमाघेप्रारब्धंगृहंशुभंस्यादित्यर्थइतिकैश्चिन्निगदितम् अ
नेनमेषेर्केचैत्रेपिगृहंशुभम् यत्तुचैत्रनिषेधःसमीनार्कविषयःवृषस्थेर्केज्येष्ठेपिशुभम् यत्तुज्येष्ठ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निषेधःसमिथुनार्कविषयः कर्कस्थेर्केआषादेपिशक्रभम् आषाढनिषेधस्तुमिथुनार्कविषयः सिंहेर्के भाद्रेपिशक्रभम् भाद्रनिषेधस्तुकन्यार्कविषयः श्रावणस्तुतत्रविहितत्वादेवशक्रभः वृश्चिकेर्केकार्तिके-पिशक्रभंनिषेधविषयंस्वयमेवचवक्ष्यति मार्गशीर्षस्तुविहितएव मकरस्थेर्केपौषेपिशक्रभम् धनुरर्क साहित्येसोप्यशक्रभः मकरकुंभस्थेर्कमाघेपिशक्रभंनिषेधस्तुधनुरर्कविषयः अतएव सौम्यफाल्गुनवै शाखमाघश्रावणकार्तिकाः मासास्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाइतिनारदवाक्यम् मासेतपस्ये तपसिमाधवेनभसिलिषे ऊर्जेचगृहनिर्माणंपुत्रपौत्रभवर्धनमितिवसिष्ठवाक्यंच आश्विनकार्ति-

कैश्चिन्मेषरवौमधौवृषभगेज्येष्ठेशुचौकर्कटेभाद्रेसिंहगतेधटेश्वयुजिचोर्जेलोमृगेपौषके

कमाघानांशक्रभत्वप्रतिपादकंतुलावृश्चिकमकरकुंभार्कसाहि-त्येप्राशस्त्यपरम् वचनांतरैरबोधितनिषेधःप्रागुक्तविषयएव एवंफाल्गुनस्यशक्रभत्वंकुंभार्कविषयंकुंभा र्कसाहित्येतुनिषिद्धः ननुकार्तिकमाघमासौश्रीपतिनानिषिद्धौतयोःकोविषयइत्यतआह अथेति ऊर्जःका र्तिकोमासः कन्यागतेर्केनसन्नशक्रभः चपुनस्तथामाघमासः धनुष्यपिधनुरर्केनसन्नन्वेतदयुक्तम् यतःशुक्लादिचांद्रमासेचैत्रादिमाससंज्ञाःसंति तत्रकार्तिकेकन्यासंक्रांतिर्माघेधनुसंक्रांतिश्चकदापिन-संभवति अतआह कृष्णादिमासादिति मासोद्विविधः शुक्लादिः कृष्णादिश्च तत्रचैत्रशुक्लप्रतिपदामार- १६३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यामावास्यापर्यंतंशुक्लादिःकृष्णप्रतिपदमारभ्यपूर्णिमापर्यंतंकृष्णादिःउभयत्रापिशास्त्रेव्यवहारः अश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदिनइति मासिभाद्रपदेदृश्यांकृष्णपक्षेऽर्धरात्रकेभवेत्सोष्टपदे-मासिजयंतीनामसास्मृतेतिच अत्रयदिदर्शातोमासोविवक्ष्यतेनदाभाद्रपदकृष्णपक्षेश्रावणेमासेचेत्से वंब्रूयात् तदेतन्मासस्यकृष्णादित्वेप्रमाणम् तत्राश्विनपूर्णिमातःकार्तिकपूर्णिमांतंकृष्णादित्वेनव्यव-हारात्तत्रकन्यासंक्रांतिसंभवान्निषेधउपपन्नोभवति एवमेवमाघेमासिधनुरर्कसंभवेननिषेधसार्थक्य-मित्यलम् १६ अथतिथिपरत्वेनद्वारनिषेधमुपजातिकयाह पूर्णेंदुतइति पूर्णेंदुतःपूर्णिमातःकृष्णाष्ट

माघेनक्रयटेशुभंनिगदितंगेहंतथोर्जेनसत्कन्यायांचतथाधनुष्य
पिनसत्कृष्णादिमासाद्भवेत् १६ पूर्णेंदुतःप्राग्वदनंनवम्यादिपूर्त्त
रास्यंतथपश्चिमास्यम् दर्शादितःशुक्लदलेनवम्यादौदक्षिणास्यंनशु
भंवदंति १७

मापर्यंतंप्राङ्मुखंगृहंशुभंनवदंति कृष्णानवमीतःचतुर्दशीपर्यंतंक्रियमा णमुत्तरास्यंनशुभम् अथदर्शादितःशुक्लाष्टमीपर्यंतंपश्चिमास्यंगृहंनशुभं शुक्लनवमीतश्चतुर्दशीए र्यंतंदक्षिणास्यंगृहंशुभंनवदंति तासुतासुतिथिषुतत्तद्दिक्मुखंगृहंनकर्त्तव्यमित्यर्थः व्यवहारोच्चये पू र्णिमातोष्टमीयावत्पूर्वास्यंवर्जयेद्गृहम् उत्तरास्यंनकुर्वीतनवम्यादिचतुर्दशीम् अमायाश्चाष्टमीयावत् पश्चिमास्यंविवर्जयेत् नवम्यादौदक्षिणास्यंयावच्छुक्लचतुर्दशीमितिवेधादिविचारोनलिखितःग्रंथगौरवात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथपंचांगशुद्धिलग्नशुद्धिंचानुष्टुभाह भौमार्केति भौमार्कवारोरिक्तास्वमसिद्धा अमाअमावास्या आदितःयत्उपलक्षणत्वादष्टम्यपि एतैरूनेकाले तथाचरराशिमेषकर्कतुलामकरैःरहितेलग्नेस्थिरे द्विस्वभावेवेत्यर्थः तथाविपंचकेरुगनलनृपचोरामृत्यसंज्ञकपंचकरहितेत्यर्थः उक्तंच दारिद्र्यंप्रतिपत्कु र्याच्चतुर्थीधनहारिणी अष्टम्युच्चाटनंचैवनवमीशस्त्रघाति न दर्शेराजभयंज्ञेयंभूतेदारविनाशनमि ति मांडव्येनस्तंभोच्छ्राये धनिष्टापंचकेनैवकुर्वात्तंभसमुच्छ्रयः सूत्रधारशिलान्यासप्राकारादिसमा रभेदिति व्यष्टांत्यइति अष्टमद्वादशस्थानव्यतिरिक्तस्थैःशुभैःपापैरूतीयैकादशषष्ठस्थानस्थैश्चो

भौमार्करिक्तामाद्यूनेचरेनेंगेविपंचके व्यष्टांत्यस्थैःशुभैर्गेहारंभस्त्र्या यारिगैःखलैः १८ देवालयेगेहविधौजलाशयेराहोर्मुखंशांशकदिशोविलो मतः

पलक्षितेलग्नेगृहारंभःकार्यः १८ अथदेवालयादौविदिक्षुराहुमुखमिंद्रवंशयाह देवालयइति अत्रयथासंख्यंसंबंधः देवालयप्रारंभेराहुमुखंमीनार्कतस्त्रिराश्यवस्थितेसूर्येऐशानीतो विलोमतोविपरीतंविदिक्षुवायव्यादिषुराहुर्मुखंस्यात् यथा मीनमेषवृषराश्यवस्थितेसूर्येईशान्यांरा हुमुखम् मिथुनकर्कसिंहस्थितेर्केवायव्याम् कन्यातुलावृश्चिकस्थितेर्केनैर्ऋत्याम् धनुर्मकरकुंभ स्थेर्केआग्नेय्यांराहुमुखमित्यर्थः एवंगृहारंभेपि सिंहार्कतस्त्रित्रिराश्यवस्थितेर्केविलोमतऐशान्यां राहुमुखंस्यात् वृश्चिकादित्रिभेवायव्यांकुंभादित्रिभेनैर्ऋत्याम् वृषादित्रिभेआग्नेय्यांराहुमुखंस्यात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथाजलाशयप्रारंभेपि मकरतस्त्रिराशयवस्थितेर्केविलोमतऐशान्यांराहुमुखंस्यात् मेषादित्रिभेवा
यव्यामू कर्कादित्रिभेनैर्ऋत्यामू तुलादित्रिभे आग्नेय्यांराहुमुखंस्यादित्यर्थः फलमाह खातेइति दे
वालयादिविषयकेखातेभूमिशोधनेकर्तव्येसति राहुमुखात्कांतदिशःसकाशात्पृष्ठवर्तिनीविदिक्शु
भाभवेत् यथैशान्यांराहुमुखंतत्पृष्ठदिगाग्नेयीतस्यांप्रथमखातारंभःशुभफलदः एवंवायव्यांराहु
मुखंतत्पृष्ठविदिगैशानीतस्यांखातारंभःशुभः एवंसर्वत्र उक्तंच ईशानतः सर्पतिकालसर्पोविहायसृ
ष्टिंगणयेद्दिदिक्षु शेषास्यवास्तोर्मुखमध्यपुच्छंत्रयंपरित्यज्यखनेच्चतुर्थम् वृषार्कादित्रयंवेद्यांसिंहा

मीनार्कसिंहार्कमृगार्कतस्त्रिभेरखातेमुखात्पृष्ठविदिक्शुभाभवेत्
१९ कूपेवास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्यादौपुष्टिरैश्वर्यवृद्धिःक्रमेणो
र्नाशःस्त्रीविनाशोमृतिश्चसंपत्तीडाशत्रुतःस्याच्चसौख्यम् २०

दिगणयेद्गृहे देवालयेचमीनादितडागेमकरादिकमिति खातारंभादिनक्षत्राण्याहमांडव्यः अधो
मुखैर्भैर्विदधीतखातंशिलास्तथैवोर्ध्वमुखैश्चपद्मम् तिर्यङ्मुखैर्हारिकपाटदानंगृहप्रवेशोमृदुभि
र्ध्रुवर्क्षैरिति १९ अथगृहेकूपनिर्माणदिगवस्थित्याफलंशालिन्याह कूपेइति वेश्मभूर्वास्तुरस्त्रिया
मितिवास्तुशब्दःपुल्लिंगः वास्तोर्गृहस्यमध्यभागेकूपेजलकूपेसति स्वामिनोर्थनाशःस्यात् अथैशा
न्यादिषुसृष्टिमार्गेणाष्टसुदिक्षुपुष्टिरित्यादिफलम् यथैशान्यांकूपेपुष्टिः पूर्वस्यामैश्वर्यवृद्धिः आग्ने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यांपुत्रनाशः दक्षिणस्यांस्त्रीविनाशः नैर्ऋत्यांगृहपतेर्मृतिः पश्चिमायांसंपत् वायव्यांशत्रुतः सकाशात् पीडास्यात् उत्तरस्यांकूपेसत्वंगृहस्वामिनएव वसिष्ठः ऐश्वर्यंपुत्रहानिश्चस्त्रीनाशोनिधनं भवेत् संपत्शत्रुभयंसौख्यंपुष्टिःपागादितःक्रमात् कूपेकृतेमध्यमेतुधनहानिर्हिवास्तुनीति अथकूपारंभेचक्रमाह कूपेर्कभान्मध्यगतस्त्रिभिर्भैः स्वादूदकंपूर्वदिशस्त्रिभैः खंडजलंस्वादुजलंजलक्षयंस्वादूदकंक्षारजलंशिलाश्च जलंक्षारजलंविष्टंक्रमाद्वेद्यासूर्यभात्त्रिभिर्मितैःक्रमाश्चभमिति २० अथदिकूपरत्वेनउपकरणगृहाणिवसंततिलकयाह स्नानस्येति पूर्वतः पूर्वाद्यष्टदिक्षु

स्नानाग्निपाकशयनास्त्रभोजेश्वधान्यभांडारदेवतगृहाणिचपूर्वतः स्युः

स्नानतः गृहाणिस्युः यथा पूर्वस्यांस्नानगृहम् आग्नेय्यांपाकगृहम् दक्षिणस्यांशयनगृहम् नैर्ऋत्यांशस्त्रगृहम् पश्चिमायांभोजनगृहम् वायव्यांधान्यसंग्रहगृहम् उत्तरस्यांभांडारं कोशगृहम् ऐशान्यांदेवतगृहम् वसिष्ठः ऐंद्यादिशिस्नानगृहमाग्नेय्यांपचनालयम् याम्यायांशयनं वेश्मनैर्ऋत्यांशस्त्रमंदिरम् वारुण्यांभोजनगृहंवायव्यांधान्यमंदिरम् उदीच्यांहाटकंसद्मऐशान्यांदेवमंदिरमिति नारदस्तु भांडागारंतुवरस्यांवायव्यांपशुमंदिरमिति पूर्वाद्यष्टदिक्तन्मध्यतस्तयोर्दिग्विदिशोर्मध्येऽष्टसंख्याकेमथनाद्यष्टौगृहाणिस्युःयथा पूर्वाग्नेययोर्मध्येलोऽनस्यगृहंस्यात् आग्ने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्यादक्षिणयोर्मध्ये आज्यस्यघृतसंग्रहस्य दक्षिणनैर्ऋत्योर्मध्येपुरीषस्यविष्टात्यागस्यगृहम् नैर्ऋती पश्चिमयोर्मध्येविद्याभ्यासस्य पश्चिमवायव्ययोर्मध्येरोदनस्यगृहम् वायव्योत्तरयोर्मध्येरतस्यसंभोगस्यगृहम् उत्तरैशान्ययोर्मध्येऔषधस्यगृहम् ऐशानीप्राच्योर्मध्येउक्तव्यतिरिक्तसर्ववस्तूनांधामगृहंकार्यंस्यादित्यर्थः वसिष्ठः रुद्राग्न्योर्मथनंमध्येयाम्याग्न्योर्घृतमंदिरम् यमराक्षसयोर्मध्येपुरीषत्यागमंदिरम् राक्षसांबुपयोर्मध्येविद्याभ्यासस्यमंदिरम् तोयेशानिलयोर्मध्येरोदनंमंदिरंततः कामोपभोगसदनंवायुकौबेरमध्यमे कौबेरैशानयोर्मध्येचिकित्सामंदिरंसदा गृहंहरीशयोर्मध्येसर्ववस्तू

तन्मध्यतस्तक्रमथनाज्यपुरीषविद्याभ्यासाख्यरोदनरतौषधसर्वधाम
२१ जीवार्कविच्छुक्रशनैश्चरेषुलग्नात्रिजामित्रसुखव्ययेषु स्थितिः
शतंस्याच्छरदांसितार्करेज्येतनुव्यंगसुतेशतेद्वे २२

सुखसंग्रहम् सदनेकारयेदे
वंक्रमादुक्तानिषोडशेति २१ अथविशेषमुपजातिकयाह जीवार्केति अत्रयोगद्वयेग्रहस्थानयोर्यथासंख्यंसंबंधः यथा जीवोलग्ने अर्कोरोषष्ठे विद्युधोजामित्रेसप्तमे शुक्रश्चतुर्थे शनिस्तृतीये एवंविधेलग्नेप्रारब्धस्यगृहस्यस्थितिरब्दशतंवर्षशतंस्यात् अयमेकोयोगः सितेति शुक्रोलग्ने अर्कस्तृतीये आरःषष्ठे ईज्यःपंचमे एवंविधेप्रारब्धस्यगृहस्यस्थितिर्द्वेशतेवर्षशतद्वयंस्यात् २२ ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथान्ययोगद्वयमिंद्रवंशयाह लग्नांबरायेषिति अत्रापियोगद्वयेस्थानग्रहयोर्यथासंख्यंसंबंधः लग्नेशुक्रः दशमेबुधः एकादशेसूर्यः लग्नव्यतिरिक्तकेंद्रेगुरुः तदैवंविधेयोगेप्रारब्धआलयगृहंवर्षशतमायुरवस्थानंयस्यतादृशंस्यात् अथद्वितीयबंधाविति चतुर्थेगुरुदशमेचंद्रः मंगलशनैश्चरावेकादशेनदागृहमशीतिसमावर्षाण्यायुर्यस्यतादृशंस्यात् २३ अथान्ययोगत्रयमनुष्टुभाह स्वोच्चस्थेति स्वोच्चस्थेमानस्थेशुक्रेलग्नगते अथवास्वोच्चस्थेकर्कस्थेगुरौचतुर्थस्थानगतेसति अथवा स्वोच्चस्थेतुलास्थेशनौ एकादशस्थानगतेसतिचिरंलक्ष्म्यायुक्तंगृहंस्यात् यदासमुदायोभवेत्तदा

लग्नांबरायेषुभृगुज्ञभानुभिः केंद्रेगुरौवर्षशतायुरालयम् बंधौगुरुर्व्योम्निशशीकुजार्कजौलाभेतदाशीतिसमायुरालयम् २४ स्वोच्चेशुक्रेलग्नगेवागुरौवेश्मगतेथवा शनौस्वोच्चेलाभगेवालक्ष्म्यायुक्तंचिरंगृहम् २५ द्यूनांबरेयदेकोपिपरांशस्थोग्रहोगृहम् अब्दांतःपरहस्तस्थं कुर्याच्चेदूर्णपौबलः २६

यतनावधिलक्ष्म्यायुतंस्यात् २७ अथगृहस्यपरहस्तगामित्वयोगमनुष्टुभाह द्यूनांबरेइति एकोपियहोत्कृष्टशुभफलदातापरांशस्थसन्यदिद्यूनेसप्तमेस्यात् अथवांबरेदशमेस्यात् तदासग्रहःगृहंप्रारब्धंअब्दांतःवर्षमध्येएवपरहस्तस्थंअन्यहस्तगामिकुर्यो १६६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नूचेद्वर्णपब्राह्मणादिवर्णस्वामीविप्राधीशोभार्गवेज्यावित्याद्यभिहितःसचेदबलःस्यात् यदास्ववर्णाधीशःसबलस्यात्तदापरहस्तगामीनस्यादित्यर्थः ॥ अथान्यंविशेषंचसंततिलकयाह पुष्येति पुष्यःध्रुवाणिप्रसिद्धानि इंदुर्मृगःहरिःश्रवणःसर्पोऽश्लेषा जलंपूर्वाषाढा एतैर्नक्षत्रैःसजीवैःगुरुयुक्तैःतद्वासरेणगुरुवासरेणकृतंकर्त्तुमारब्धंगृहंसकृतान्पुत्रान्राज्यंचददातितादृशंस्यात् अत्रसंमतिर्वसिष्ठस्यदवाक्यतः द्वीशेति द्वीशंविशाखा अश्विनीनक्षत्रचित्रावसूर्धनिष्ठा पाशीशतभम् शिवआर्द्रा एतैर्नक्षत्रैःसशुक्रैःशुक्रसहितैःसितस्यशुक्रस्यवासरेचकृतंगेहम् धनानिसुवर्णानिधान्यानिव्रीह्यादीनिद

पुष्यध्रुवेंदुहरिसर्पजलैःसजीवैस्तद्वासरेणचकृतंसकृतराज्यदंस्यात्
द्वीशाश्वित्वसुपाशिशिवैःसशुक्रैर्वारेसितस्यचगृहंधनधान्यदं
स्यात् ॥ सारैःकरेज्यात्यमघाबुमूलैःकौजेन्हिवेश्माग्निसुतार्तिदं
स्यात्

दातितादृशंगृहंस्यात् तथाचनारदः श्रवणाषाढयोश्चैवरोहिण्यांचोत्तरात्रये गुरुवारेकृतंवेश्मराजयोगमिहोच्यते तद्गृहेजातपुत्रस्यराज्यंभवतिनिश्चयात् अत्रवसिष्ठवाक्येनक्षत्राधिक्यंतदनुसारेणमूलेनक्षत्राभिधानम् ईज्योत्तरात्रयाहींदुविष्णुधान्यजलोडुषु गुरुणासहितेषेषु कृतंगेहंश्रियान्वितमितिवसिष्ठोक्तेः अश्विनीशततारासुविशाखाचार्द्रचित्रके धनिष्ठाशतभेशुक्रसंयुक्तेशुक्रवासरे तद्वेश्मनिप्रजातस्तुकुबेरसदृशोभवेत् अत्रापिनक्षत्रभेदःप्राग्वत्समाधिः ॥ अथान्ययोग

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हूयमिंद्रवज्रमाह सारैरिति हस्तपुष्यरेवतीमघापूर्वाषादामूलैः सारैर्मंगलसहितैः कौजेभौमसंबंधिनिअन्हिवारेकृतंगृहंअग्निरुतार्तिदंअग्निपीडांरुतपीडांददातिनादृशंस्यात् उक्तंच मूलंचरेवतीचैवकृत्तिकाषादमेवच एषुभौमेनयुक्तेषुवारेतस्यैवनिर्मितम् अग्निनादह्यतेकृत्स्नंपुत्रनाशश्वजायतइति सज्ञैरिति रोहिण्यश्विन्युत्तराफाल्गुनीचित्राहस्तैः सज्ञैः बुधयुक्तैः तस्यचवारेकृतंगृहंसुखदंपुत्रदंचस्यात् उक्तंच हस्तार्यमत्वाष्ट्रदास्रउत्तरास्योडुभेपिवा सबुधेबुधवारेचधनपुत्रसुखप्रदमिति २७ अथान्ययोगमनुष्टुभाह अजैकपादिति पूर्वाभाद्रपदोत्तराभाद्रपदाज्येष्ठानुराधास्वातीभर

सज्ञैःकृदास्त्वार्यमतक्षहस्तैर्जस्यैववारेसुखपुत्रदंस्यात् २७ अजैकपा
दहिर्बुध्न्यशक्रमित्रानिलांतकैः समंदेर्मंदवारेस्याद्रक्षोभूतयुतंगृहम्

२८ णीनक्षत्रैः समंदैः शनैश्चरयुक्तैः मंदस्यैववारेचभारब्धंगृहंरक्षोभूतैश्चयुतंस्यात् उक्तंच अजपाद्हितयेयाम्यमित्रेंद्रानिलभेपिवा समंदेमंदवारेचगृह्यतेयक्षराक्षसैः पुत्रेजातेःथवानस्मिन्गृह्यतेयक्षराक्षसैरिति अत्रायंनिष्कृष्टोर्थः पूर्वंगृहारंभनक्षत्राण्यवधेयानिततोवृषवास्तुचक्रेशोध्यानिपश्चादिदंयोगपंचकंविचार्यमेवंगृहारंभः शुभफलदोभवेत् २८ अथकेषांचिन्मतेनद्वारचक्रं सफलंशार्दूलविक्रीडितेनाह सूर्यर्क्षादिति सूर्याधिष्ठितनक्षत्रात् युगभैश्चतुर्भिर्नक्षत्रैःशिरस्युपरिअवस्थितैः फलंकर्तुः लक्ष्मीप्राप्तिःस्यात् ततः नागभैः अष्टभिः कोणगैः कोणेष्ववस्थितैः उद्वसनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जनवासरहितंस्यात् तदग्नभैर्गजभितैरष्टभितैर्द्वारशाखावस्थितैर्गृहस्वामिनः सौख्यंस्यात् तदग्निभैः गुणभैस्त्रिभिर्नक्षत्रैर्देहल्यामवस्थितैर्गृहस्वामिनोमृतिःस्यात् ततस्तदग्निभैर्वेदभैश्चतुर्भिर्नक्षत्रैर्मध्य रूपेअवकाशेस्थितैःसौख्यंस्यात् फलितार्थमाह चक्रमिति इदंचक्रंविलोक्यसुधियाशुभंशुभफलदं द्वारंविधेयंकर्तव्यमिति मयेनोपसंहरति २९ इतिमुहूर्तचिंतामणिटीकायांग्रभिताक्षरायांगृहारंभप्रक रणंसमाप्तंद्वादशम् १२ अथगृहप्रवेशप्रकरणंव्याख्यायते तत्रप्रवेशश्चतुर्धा अपूर्वप्रवेशःसपूर्व

सूर्यर्क्षाद्यृगभैःशिरस्यथफलंलक्ष्मीस्ततःकोणभैर्नागैरुद्वसनंततोग
जभितैःशारवासुसौख्यंभवेत् देहल्यांगुणभैर्मृतिर्गृहपतेर्मध्यस्थितै
र्वेदभैः सौख्यंचक्रमिदंविलोक्यसुधियाद्वारंविधेयंशुभम् २९ इतिश्री
वास्तुप्रकरणंसमाप्तम् अथगृहप्रवेशप्रकरणप्रारंभः सौम्यायने
ज्येष्ठतपोत्थमाधवेयात्रानिवृत्तौनृपतेर्नवेगृहे प्रवेशःद्वंद्वाभयप्रवेशःवधूप्रवेश-
श्चेति तत्रवधूप्रवेशस्यान्वर्थसंज्ञकत्वाल्लक्षणंनोक्तम् सचप्रागभिहितः अन्येषांलक्षणमाह यस्मिन्नः
अपूर्वसंज्ञः प्रथमप्रवेशोयात्रावसानेतुसपूर्वसंज्ञः द्वंद्वाभयस्त्वग्निभयादिजातस्त्वेवंप्रवेशस्त्रिविधःम-
दिष्टइति नवंगृहंनिर्मायप्रथमःप्रवेशः सोपूर्वसंज्ञःप्रवेशः यस्तुयात्रानिवृत्यनंतरंगृहप्रवेशः ससपू
र्वसंज्ञः यस्तुअग्निभयेनाग्निदाहेनआदिशब्देनशत्रुणाराज्ञापातितेनगृहनाशस्तद्गृहंयदापुनःसंपाद्यते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मिन्प्रवेशः सद्वंद्वाभयइत्युच्यते अन्वर्थसंज्ञाचेयंद्वंद्वंशीतोष्णम् अत्रशीतशब्देनजलम् उष्ण शब्देनाग्निरुच्यते लक्षणयाजलाप्लावेनानवरतवृष्टिपातेनवागृहपातस्तज्जलभयम् अग्निकृतदाहेन योगृहनाशस्तदग्निभयम् तस्माच्छीतोष्णरूपाद्द्वंद्वात्पुनरुत्थापनेनयदभयमित्युच्यतेद्वंद्वाभयंविध्य तेतस्मिन्नित्यर्थः आदिभ्योजितिमत्वर्थीयोचूप्रत्ययः तादृशःप्रवेशोद्वंद्वाभयइति तत्रापूर्वसपूर्वप्रवेशा योः कालशुद्ध्यादिकमिंद्रवंशायाह सौम्यायनेइति एषुसौम्यायनेइत्यादिकेषुपदार्थेषु सत्सुनृपतेर्या त्रानिवृत्तौ अथवानवेनूतनोत्थापितेगृहेवेशनंप्रवेशनंस्यात् अत्रसौम्यायनइतिमंदबुद्धीनांशीघ्रप तिपत्त्यर्थं ज्येष्ठेति ज्येष्ठमाघफाल्गुनवैशाखेषुप्रवेशनंशुभम् नारदः अपिसौम्यायनेकार्यंनववेश्मप्रवे

स्याद्देशनद्वास्थमृदुध्रुवोडुभिर्जन्मर्क्षलग्नोपचयोदयेस्थिरे १

शनम् राज्ञायात्रानिवृत्तौचेति तथा माघफाल्गुनवैशाखज्येष्ठमासेषुशोभनः प्रवेशोमध्यमोज्ञेयःसौ म्यकार्तिकमासयोरिति मध्यमोक्तिरावश्यकविषया द्वास्थेति यस्मिन्गृहेप्रवेशः कर्तुमिष्यतेतस्ययस्यांदि शिमुखंतद्दिङ्मुखर्क्षैः पूर्वादिषुचतुर्दिक्षुसप्तसप्तानलर्क्षैत इत्युक्तैः मृदुध्रुवनक्षत्रैःप्रवेशनंस्यात् यद्दि कद्वारमंदिरंतद्दिगृक्षैरुक्तर्क्षैस्यात्प्रवेशोनसर्वैरितिवसिष्ठोक्तैः अन्यदपितत्रैव अर्कानिलार्यादितिद स्रविष्णुऋक्षेप्रविष्टंनवमंदिरंयत् अब्दत्रयात्तत्पर हस्तयातंशेषेषुधिष्ण्येषुचमृत्यवेदंस्यादिति जन्म र्क्षेति जन्मर्क्षंजन्मराशिः जन्मलग्नंप्रसिद्धम् नाभ्यामुपचयंतृतीयषष्ठदशमैकादशस्थानंतस्मिन्नुदये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लग्नेस्थिरेस्थिरारव्येवृषसिंहवृश्चिककुंभारव्येलग्नेप्रवेशानंशुभम् नारदः कर्तुर्जन्मभलग्नेवाताभ्यासु
पचयेपिवा प्रवेशलग्नेस्याद्दृष्टिरन्यभेशोकनिस्वतेति सौम्येस्थिरेभेशुभदृष्टियुक्तेलग्नेऽथवा द्यूंगगृ
हेविलग्नेइति सौम्यग्रहयुक्ते द्यूंगेदृस्वभावराशौ ॥ अथजीर्णगृहप्रवेशेविशेषमिंद्रवज्रमाह
जीर्णेगृहइति जीर्णेपुरातनेऽन्यनिर्मितेगृहेअग्निभयात् अग्निनादाहात् आदिशब्देनबहुदृष्टिरा
जकोपाद्युपद्रवात्पतितेगृहेपुनरपिसम्यगेवकृतेउत्थापितेपूर्वोक्ता सर्वेपिमासाज्ञेया किंच मार्गोर्ज
योः मार्गशीर्षकार्तिकयोः नश्रावणिकेपिश्रावणेपिवेशः प्रवेशःसन् शुभफलदःस्यात् सनत्कुमारः गृ
हारंभोदितैर्मासैर्धिष्ण्येवारैर्विशेद्गृहमिति अत्रसामान्यतोगृहारंभोदितामासागृहप्रवेशेऽभिहिताः

जीर्णेगृहेग्न्यादिभयान्नवेपिमार्गोर्जयोःश्रावणिकेपिसत्स्यात्

तेच सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः मासाःस्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाइति नार-
दोक्तेर्मार्गशीर्षफाल्गुनश्रावणकार्त्तिकाविहिताः तत्रोत्तरायणएवगृहप्रवेशस्यवाक्यांतरविहितत्वात्
श्रावणकार्त्तिकमार्गशीर्षाणामुत्तरायणलाभावात् विरोधेनूतनजीर्णगृहप्रवेशाभ्यांव्यवस्था कथंप्राग-
भिहितनारदवाक्येनउत्तरायणसाहचर्येणनूतनगृहप्रवेशसपूर्वप्रवेशयोर्विधानात् गृहारंभोदितैर्मा
सैरित्यनेनतुसामान्यतस्त्रिविधस्यापिप्रवेशस्यविधानादुत्तरायणीयमासास्त्रिविधगृहप्रवेशेशुभाः द
क्षिणायनीयमासाश्रावणादयस्तुजीर्णगृहप्रवेशविषयाः अतएवनारदोमार्गशीर्षकार्तिकयोर्नूतनप्रवे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेमध्यमत्वमाह अर्थादेवजीर्णगृहप्रवेशेउत्कृष्टमध्यत्वेस्यातामू अंबुपेति अंबुपःशततारका ई-ज्यःपुष्यः अनिलस्वाती वासवंधनिष्ठा एषुशुभेषुजीर्णगृहेअग्न्यादिभयान्नवेपिगृहप्रवेशःशुभःप्राक्प द्योक्तनक्षत्रेषुतुशुभएवेतिकेसुतिकन्यायादवगम्यते ज्योतिःप्रकाशेप्रवेशोनूतनेहर्म्येऽकैर्मित्रैःस्व स्वामये पुष्यस्वातीयुतैस्तैस्तैर्जीर्णेस्याद्वासवद्वयेइति नावश्यमिति अत्रैवंविधेजीर्णगृहे अग्न्यादिभ यान्नवेपिआवश्यकमस्तादिविचारणाशक्रास्तगुर्वस्तबाल्यवार्धकसिंहस्थगुर्वादिदोषाणांविचारणा विचारोनास्ति अस्तादयः कालदोषाः संतुभावासंतुतथापिगृहप्रवेशःकार्यः सोपिपंचांगशुद्धिमात्रमंगी कृत्यविहितनक्षत्रेषेवकार्यः ज्योतिःप्रकाशे नित्ययानेगृहेजीर्णेप्राशनेपरिधानकेवधूप्रवेशेमांगल्येन

वेशोंबुपेज्यानिलवासवेषुनावश्यमस्तादिविचारणात्र २ मृदुध्रुवक्षिप्रचरे षुमूलभेवास्त्वर्चनंभूतबलिंचकारयेत् मौढ्यंगुरुशुक्रयोरिति वसिष्ठः नवप्रवेशेत्व थकालशुद्धिर्नद्वंद्वसौपूर्विकयोःकदाचित् प्रवेशपंचांगदिनेशुभलग्नेवास्त्वर्चनंपूर्ववदेवकुर्यात् पूर्ववदेवनूतनप्रवेशेयथावास्तुपूजातथाद्वंद्वसौपूर्विकयोरपिकार्येत्यर्थः नारदेनतुयात्राविधेर्निवृत्तिप्रवेशे कालशुद्धिरपेक्षितैवेतिनद्वाक्यंपागभिहितंतदेतयोर्वाक्ययोरावश्यकानवश्यत्वेनव्यवस्था अत्रत्रिविधे पिप्रवेशेप्रवेशनक्षत्रंक्रूराक्रांतंक्रूरविद्धंवासर्वथावर्ज्यम् वसिष्ठः क्रूरग्रहाधिष्ठितविद्धभंचविवर्जनीयं त्रिविधप्रवेशइति २ अथगृहप्रवेशादिनात्प्राक्कर्त्तव्यंवास्तुपूजांविवक्षुस्तन्नक्षत्राण्युपजातिकापूर्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्देनाह मृदुध्रुवेति एषुसप्तदशसूक्तनक्षत्रेषु वास्तुपुरुषस्यार्चनंभूतबलिंचकारयेत् गृहपतिर्वास्तुपू
जांकुर्यात् पुरोहितोवास्तुपूजांकारयेत् स्थपतेरन्यतरस्यामित्यणौकर्तुः कर्मत्वम् वास्तुपूजाप्रकार
माहवसिष्ठः निर्माणेमंदिराणांचप्रवेशेत्रिविधेपिच वास्तुपूजाप्रकर्त्तव्यायस्मात्तांकथयाम्यतः गृहम
ध्येहस्तमात्रंसमंतात्तंदुलोपरि एकाशीतिपदंकार्यंतत्रैस्तकल्पंसुशोभनम् एकद्वित्रिपदाःपंचचत्वारिं
शत्सूत्रार्चिताः द्वात्रिंशद्बाह्यतोवक्ष्यमाणाश्चांतस्त्रयोदश तेषांस्थानानिनामानिवक्ष्यामीश्वरकोण
तः तत्राग्निःशंभुकोणस्थस्तत्रैवैकपदेश्वरः आकाशंचापूरयतःक्रमादेकपदेश्वरौ एवंप्राच्यांनवज्ञा
त्वेवमेवान्यदिक्षुच आद्यश्चांत्यावेकपदौद्विपदाःपंचमध्यगाः शिख्याद्यष्टावाकाशांताअमराःपूर्व

त्रिकोणकेंद्रायधनत्रिगैःशुभैर्लग्नेत्रिषष्ठायगतैश्चपापकैः ३

भागगाः आद्यश्चांत्यावेकपदौद्विपदाःपंचमध्यगाःपूषाद्यष्टौयमांताःस्युरमरायाम्यभागगाः आद्य
श्चांत्यावेकपदौद्विपदाःपंचमध्यगाःअष्टौपितृगणाधीशात्पापांताःपश्चिमेसूराः आद्यंतौद्वावेकप
दौद्विपदाःपंचमध्यगाःरोगादिदित्यंतसूराःससप्तसौम्यदिशिक्रमात् तत्राधस्थश्चतुःकोणेत्वीशान्यादिषु
चक्रमात् आपःसावित्रविजयरुद्राश्चैकपदेश्वराः मध्येनवपदोब्रह्मातस्यैशानादिकोणगाः आपव
त्सोथसवितासावुधाधिपसंज्ञकः राजयक्ष्माचचत्वारःसूराश्चैकपदेश्वराः ब्रह्मणःपूर्वतोदिक्षुत्रिप
दाश्चामराअमी अर्यमाचविवस्वांश्चमित्रःपृथ्वीधरःक्रमात् स्वस्थकेलेषुदेवेषुस्थापितेष्वीदृशंभ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेत् कोणेषुपंचपंचैवचतुर्थैकपदाःसदा भागादिदिक्षद्विपदाः पंचपंचयथाक्रमम् ब्रह्मणःपूर्वतो दिपिनेष्वीदृशंभवेत् कोणेषुपंचपंचैक्षद्विपदाःस्युःसमीपगा हरण्यरेताःपर्जन्योजयंतःपाकशासनःसूर्यःसत्योभृशाकाशौवायुपूषाश्चवैतथा गृहक्षतःपितृपतिर्गंधर्वोभृंगराजकः यमःपितृगणाधीशस्तथादौवारिकाह्वयः सुग्रीवःपुष्पदंतश्चजलाधीशोनिशाचरः शोषःपापश्चरोगोहिर्मुख्योभल्लाटएवच सोमसर्पौदितेदित्यदितीद्वात्रिंशदमराःस्मृता आपश्चैवापवत्सश्चअजपोरंध्रस्तथैवच मध्येनवपदो ब्रह्मातस्थौतस्यसमीपगा आद्याद्यंतरितादेवाःपरितोब्रह्मणःस्मृता अर्यमासवितात्वेवविवस्वान्विबुधाधिपः मित्रोथराजयक्ष्माचतथापृथ्वीधरःक्रमात् आपवत्सोष्टमःपंचचत्वारिंशत्सुरोत्तमाःसार्द्धैवंस्थाननामानिब्रह्मणासहितान्यजेत् वास्तुजोवास्तुमंत्रेणगंधपुष्पाक्षतादिभिः षणवेनार्चयेद्वापि अथवास्वस्वनामभिः शुक्लवस्त्रयुगंदद्याद्धूपदीपफलैःसह अपूपैर्भूरिनैवेद्यैर्वाद्यैःसहसमर्चयेत् नांबूलंचततोदद्याद्देवेभ्यश्चपृथक्पृथक् दत्वापुष्पांजलिंकर्तापार्थयेद्वास्तुपूरुषम् वास्तुपुरुषनमस्तेस्तुभूशय्यानिरतप्रभो मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदा इतिप्रार्थ्यततोदद्याद्दक्षिणामर्चकायच विप्रेभ्योभोजनंदत्वास्वयंभुंजीतबंधुभिः एवंयःकुरुतेसम्यग्वास्तुपूजांप्रयत्नतः आरोग्यंपुत्रपौत्रादिधनंधान्यंलभेन्नरः वास्तुपूजामकृत्वायःप्रविशेन्नवमंदिरम् रोगान्नानाविधान्क्लेशानश्नुतेबहुसंकटम् इतिवसिष्ठसंहितायांवास्तुशांतिः नारदीयः पंचांगशुद्धिमात्रयुक्तेपूर्वदिनेएववास्तुपूजामाहुः विधायपूर्वदिवसेवास्तुपूजांबलिक्रियामिति तृतीयश्लोकार्धस्यटीका अथलग्नशुद्धिंतिथि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वारशुद्धिंचोपजातिकोत्तरार्द्धेनेंद्रवज्रयाह त्रिकोणेति शुद्धांबुरंध्रइति नवमपंचमप्रथमचतुर्थस प्तमदशमैकादशद्वितीयतृतीयस्थानानामन्यतमस्थानस्थितैः शुभैरुपलक्षिते तथातृतीयषष्ठैका दशस्थानस्थैः पापग्रहैरुपलक्षितेच तथांबुचतुर्थस्थानंरंध्रमष्टमस्थांनंतस्मिन् शुद्धेसर्वग्रहरहि ते अंबुरंध्रेयस्मिंस्तादृशेलग्नेगृहंविशेत् कीदृशेलग्नेविजनुर्भमृत्यौभंराशिर्लग्नंचजनुषिजन्मका लेभेजनुर्भेताभ्यांमृत्यरष्टमभवनम् जनुर्भमृत्युः विगतोजनुर्भमृत्युर्यस्मिन्स्वजन्मलग्नात्स्वज न्मराशेर्वाऽष्टमराशिःप्रवेशलग्नेनप्रेक्षितइत्यर्थः पुनःकीदृशेलग्नेव्यर्काररिक्ताचरदर्शचैत्रे अर्का

शुद्धांबुरंध्रेविजनुर्भमृत्यौव्यर्काररिक्ताचरदर्शचैत्रे अग्रेंबुपूर्णं कलशंद्विजाभ्यं कृत्वाविशेद्वेश्मभकूटशुद्धम् ४

रौप्यसिद्धौवारौरिक्ता ४ ९ १४ उपलक्षणत्वाद्दग्धतिथयोपि चरलग्नानिमेषकर्कतुलामकराख्या नितदंशाश्च दर्शोमावास्याचैत्रमासः विगतार्कोदयोयस्मिन् अर्कोदयःप्रवेशदिनेनिषिद्धइत्य र्थः अग्रइति गृहप्रवेशसमयेजलपूर्णंकलशंस्वसंमुखंकृत्वाद्विजान्ब्राह्मणांश्चाग्रेकृत्वावेश्मगृहं विशेत् वसिष्ठः कृत्वाशुक्रंपृष्ठतोवामतोर्कंविधान्पूज्यानग्रतःपूर्णकुंभम् अभ्यर्ह्यगृहंतोरणस्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्वितानैः स्त्रीभिः स्तूयमानो गीतवाद्यैर्विशेत्तदिति अयंविधिः प्रवेशेसाधारणः कीदृशंवेश्मभकूट शकटं भकूटंषष्ठाष्टकादि उपलक्षणत्वाद्विवाहप्रकरणोक्तंवर्णोवश्यंतथातारेत्यादिकंचतेनापिशक्रम् वसिष्ठः राशिकूटादिकंसर्वंदंपत्योरिवचिंतयेदिति ॥ अथवामगतार्कज्ञानंपूर्वादिमुखगृह प्रवेशंचेंद्रवंशयाह वामोरविरिति अष्टमपंचमद्वितीयैकादशस्थानेभ्यः पंचसूस्थानेषुस्थितेरवौ सतिप्राग्वदनादिकेमंदिरेप्रवेष्टव्येगृहप्रवेशंकर्तुर्वामोरविर्ज्ञेयः यथातस्मिन्लग्नेगृहप्रवेशः कर्तु

वामोरविर्मृत्युसुतार्थलाभतोऽर्केपंचमेप्राग्वदनादिमंदिरे पूर्णा तिथौप्राग्वदनेगृहेशुभोनंदादिकेयाम्यजलोत्तराननेऽ

मिष्यतेतस्मादष्टमंयत्स्थानंततःपंचसूस्थानेष्वर्केसतिपूर्वाभिमुखेगृहेप्रवेशकर्तुर्वामः सूर्यः स्यात् तथालग्नाद्यत्पंचमस्थानंततः पंचसूस्थानेषुरवौस्थितेदक्षिणाभिमुखेवामोर्कः तथैवल ग्नाद्यद्द्वितीयस्थानंततः पंचसूस्थानेषुरवौस्थितेपश्चिमाभिमुखेवामोऽर्कः तथैवलग्नाद्यदेकाद शस्थानंततःपंचसूस्थानेषुसूर्येस्थितेउत्तराभिमुखेगृहेप्रवेशकर्तुर्वामः सूर्यइत्यर्थः उक्तंच रंध्रा त्पुत्रादनादायात्पंचस्वर्केस्थितेक्रमात् पूर्वाशादिमुखंगेहंविशेद्वामोभवेद्यतइति पूर्णातिथाविति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भाग्वदनेपूर्वाभिमुखेगृहेपूर्णातिथौपंचम्यांदशम्यांपूर्णिमायांवाप्रवेशः नंदादिकेतिथिगणेयाम्य
जलोत्तराननेगृहेप्रवेशः शुभः यथा दक्षिणाभिमुखेगृहेनंदायांप्रतिपदिषष्ठ्यामेकादश्यांवाप्रवेशः
शुभः जलंपश्चिमादिकृतादृङ्मुखेगृहेभद्रायांद्वितीयायांसप्तम्यांद्वादश्यांवाप्रवेशःशुभः उत्तराभिमु
खेगृहेजयायांतृतीयायामष्टम्यांत्रयोदश्यांवाप्रवेशःशुभः गुरुः नंदायांदक्षिणद्वारंभद्रायांपश्चिमा
मुखम् जयायामुत्तरद्वारंपूर्णायांपूर्वतोविशेदिति ५ अथप्रवेशकलशवास्तुचक्रंशार्दूलविक्रीडिते

वल्केभूरविभात्प्रवेशसमयेकुंभेग्निदाहः कृताःप्राच्यामुद्वसनंकृता यमगतालाभः कृताःपश्चिमे

नाह वल्केभूरिति गृहप्रवेशसमयदिनेसर्वत्रापिसं
बध्यते कुंभेकलशाकृतिवास्तौरविभात् सूर्यर्क्षात्नक्षत्रात्प्रत्यृक्षंपंचमीरविभमारभ्यक-
लशस्थमुखेभूरेकंसूर्यर्क्षंतनक्षत्रमेवस्थाप्यम् तत्फलंगृहस्याग्निदाहः ततः सूर्यभात्कृताः अ
ग्निमाणिचत्वारिभानिप्राच्यांस्थाप्यानि फलमुद्वसनंजनवासशून्यंगृहंस्यात् ततः कृतायमगताः
तदग्निमाणिचत्वारिभानिदक्षिणेस्थाप्यानि फलंगृहपतेर्लाभः द्रव्यप्राप्तिः ततः कृताः पश्चिमेतद
ग्निमाणिचत्वारिभानिपश्चिमायांस्थाप्यानिफलंगृहपतेः श्रीप्राप्तिः ततोवेदाउत्तरेतदग्निमाणिच-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वारिभानिउत्तरस्यांस्थाप्यानि फलंकलिःलोके सहगृहसंबंधीनिरर्थकोवादः श्लकटः स्यात् न-
तोयुगमितास्तदग्रिमाणिचत्वारिभानिगर्भेकलशमध्येस्थाप्यानि फलंविनाशोगर्भस्थैर्यमतोरा
मास्तदग्रिमाणित्रीणिभानिगुदेबुध्येस्थाप्यानि फलंस्थैर्यंगृहपतेर्बहुकालंतत्रनिवासःततोऽन-
लास्तदग्रिमाणित्रीणिभानिकंठेस्थाप्यानि फलंस्थिरत्वंगृहपतेर्भवेत् एवमभिहितानिसप्तविंशति
भानिस्युःज्योतिःप्रकाशेभूवेदपंचकंत्रिस्थिः १ ४ ४ ४ ४ ४ ३ २ प्रवेशेकलशेर्कभात् मृति

श्रीर्वेदाःकलिरुत्तरेयुगमितागर्भेविनाशोगुदेरामाःस्थैर्यमतःस्थिर
त्वमनलाःकंठेभवेत्सर्वदा ६

र्गतिर्धनंश्रीस्याद्वैरंशुकृस्थिरतासुखमिति अत्रक
लशचक्रेशुभफलस्थानपतौसत्येवविहितनक्षत्राणांपरिग्रहोयुक्तस्तत्रापियद्दिङ्मुखेप्रवेशोविधि-
स्तितेतद्दिङ्मुखनक्षत्रपरिग्रहः यथा पूर्वस्यांप्रवेशेविधिस्तितेरोहिणीमृगोवायाःस्वातिदक्षिणमुखगृहप्र
वेशेउत्तराफाल्गुनीचित्रेएवपश्चिमाभिमुखेअनुराधोत्तराषाढेएवउत्तराभिमुखेउत्तराभाद्रपदारेव
त्यौग्राह्येइतिनिष्कृष्टोर्थः अतएवोक्तंवसिष्ठेन यद्दिग्द्वारंमंदिरंतद्दिगृक्षैरुक्तर्क्षैःस्यात्सन्निवेशोनसर्वै

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिति तद्दिगृक्षैरितिवानयो सामानाधिकरण्येनान्वयः भिन्नवाक्यत्वेतुचकारः कर्तव्यःस्यात् अतए व अर्कानिलार्यादितिदस्रविष्णुऋक्षेप्रविष्टंनवमंदिरंयत् अब्दत्रयात्तत्परहस्तमेतिशेषेषुधिष्ण्येषु चमृत्कदंस्यादितिनिषेधोप्युपपन्नोभवति ६ अथगृहप्रकरणप्रवेशोपसंहारंसूचयन्प्रवेशोत्त रकालीनकर्त्तव्यविधिमुपजात्याह एवंसलग्नेइति एवंप्रागुक्तप्रकारेणविचारितसुलग्नेशोभनगु णयुतेस्थिरराश्यादिकेराजावितानपुष्पश्रुतिघोषयुक्तंवितानानिचसुवस्त्रमंडपाःपुष्पाणिस्वकाल

एवंसुलग्नेस्वगृहंप्रविश्यवितानपुष्पश्रुतिघोषयुक्तम्

र्तुजानिमालत्यादीनिश्रुतिघोषोवेदध्वनिस्तैर्युक्तंउपलक्षणत्वात्तोरणाद्यनेकमांगल्यवस्तुसहि तमेतादृशंस्वसत्ताकंगृहंप्रविश्यपश्चात्शिल्पज्ञान्गृहोत्थापकान्स्थपतिर्वर्द्धक्यादीन्दैवज्ञान्- ज्योतिर्विद्विधिज्ञान्वास्तुपूजाभूतबलिगृहप्रवेशविधिज्ञान्पुरोहितप्रभृतीन्पौरान्नागरिका न्पंडितदीनानाथांधकृपणांश्च भूमिहिरण्यवस्त्रैर्यथाशक्त्याव्यस्तैःसमस्तैर्वा उपलक्षणत्वादन्या दिभिर्वाअर्चयेत्पूजयेत् अत्रविशेषमाहवसिष्ठः यद्वास्तुपूजारहितंत्वदत्तबलिंत्वनाछन्नगृहंवि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपम् कपाटहीनंनविशेद्यतस्तत्सर्वाः पदामालयमेवतत्स्यादिति तस्मात्सकवाटमुपरिष्टाच्छादि तंकृतवास्तुपूजादत्तबलिमेवगृहंप्रविशेत् प्रवेशोत्तरविधिमाह श्रीपतिः ततोनृपोविप्रसुहृत्सुरोध सः शिल्पज्ञभूगोलविदश्वलिंगिनः धनैश्चरत्नैः पशुभिःसमर्चयन्सदांधदीनान्पुरवासिनस्तथेति ७ इतिगृहप्रवेशप्रकरणंसमाप्तम् अथयंथसमाप्तौपितामहवर्णनंशार्दूलविक्रीडितेनाह आ

शिल्पज्ञदैवज्ञविधिज्ञपौरान्राजार्चयेद्भूमिहिरण्यवस्त्रैः ७ इति दैवज्ञरामविरचितेमुहूर्तचिंतामणौगृहप्रवेशप्रकरणंत्रयोदशंसमाप्तम् १३ ७ ७ आसीद्धर्मपुरेषडंगनिगमाध्येतृद्विजैर्मंडितेज्योतिर्विन्तिलकःफणींद्ररचितेभाष्येकृतातिश्रमः

सीदिति धर्मपुरेनर्मदातीरग्रामविशेषेसप्रसिद्धश्चिंतामणिरासीत् किंभूतेधर्मपुरेषडंगानिशिक्षा दीनितानिविद्यंतेयस्यएतादृशोयोनिगमोवेदस्तद्ध्येतारोयेद्विजाब्राह्मणादयस्तैर्मंडितेभूषिते कीदृशश्चिंतामणिर्ज्योतिर्विन्तिलकइवतिलकः ज्योतिर्विच्छ्रेष्ठइत्यर्थः पुनः कीदृशः फणींद्रः शेषनागः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्रचितेभाष्येमहाभाष्येकृतोतिश्रमोऽत्यभ्यासोयेन सुनः कीदृशश्चिंतामणिः तत्तज्जातकसंहिता गणितकृत् तानितानिस्वल्पबृहदादिभेदेनानेकविधजातकानिजातकशास्त्राणिसंहिताःसंहिताशास्त्राणिकरोतिनादृशः गणितानिगणितशास्त्राणिकरोतितादृशः पुनः कीदृशः महाभूभृज्जानांमान्यः पूज्यः पुनः कीदृशः तर्कालम् कृतिवेदवाक्यविलसद्बुद्धिः तर्कोन्यायशास्त्रम् अलंकृ

तत्तज्जातकसंहितागणितकृन्मान्योमहाभूभृजांतर्कालंकृतिवेदवाक्यविलसद्बुद्धिःसचिंतामणिः ज्योतिर्विदृणवंदितांघ्रिकमलस्तत्सूनुरासीत्कृतीनाम्मानंत इतिप्रथामधिगतोभूमंडलाहस्करः

तिअलंकारशास्त्रम् वेदवाक्यंवेदवाक्यविचारप्रतिपादकोग्रंथोमीमांसाशास्त्रंवेदांतशास्त्रं विलसतीविलासयुक्ताबुद्धिर्यस्यसः अथक्रमप्राप्तंतातवर्णनंतेनैवसूत्रेनाह ज्योतिर्विदनुरक्तस्यचिंतामणिदैवज्ञस्यसूनुःपुत्रोऽनंत इतिनाम्नाप्रथांख्यातिमधिगतःप्राप्तः ज्योतिर्विदृणवंदितांघ्रिकमलःज्योतिर्विदांगणेनसमूहेनवंदितंचरणकमलंयस्यस

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंडलेऽहस्करइवअध्यापनद्वाराप्रकाशइत्यर्थः पुनः कीदृशः कृतीकुशलः ग्रंथक
र्ता ग्रंथकर्तृत्वमेवोत्तरार्द्धेनप्रकाशयति योरम्यांजनिपद्धतिंजातकपद्धति ञ्च
नींदुष्टाजन्मपद्धतिमार्गसंप्रदायानभिज्ञास्तेषामाशयमभिप्रायंध्वंसयतिदूरंनिदुष्टाशयञ्च
मकरोत् तथाउत्तमेब्रह्मपक्षार्यपक्षप्रतिपादकेकामधेनुगणितेग्रंथविशेषेटीकांचसतांप्रीत

योरम्यांजनिपद्धतिंसमकरोद्दुष्टाशयध्वंसिनींटीकांचोत्तमकाम
धेनुगणितेऽकार्षीत्सतांप्रीतये ॥ तदात्मजउदारधीर्विबुधनील
कंठाब्जोगणेशपदपंकजंहृदिनिधायरामाभिधः गिरीशनगरेव
रेफजमुजेषुचंद्रे १५२२ मितेशकेविनिरमादिमंखलुमुहूर्तचिंता
मणिम् १० इतिश्रीदैवज्ञरामविरचितमुहूर्तचिंतामणिःसमा
प्तिमगमत् १३ ७ ७ षीत्कृतवानित्यर्थः २ अथस्वनामकथनपूर्वकंग्रंथसमा
प्तिंपृथ्वीछंदसाह तदात्मजइतितस्यानंतस्यात्मजोरामाभिधोगिरीशनगरेवाराणस्यांमुहूर्तचिंतामणिंमुहू
र्तचिंतामणिनामधेयंग्रंथंफजमुजेषुचंद्रे१५२२मितेशकेद्वाविंशत्यधिकपंचदशशतमि तेशकेविनिरमा
दकार्षीत्शेषंस्फुटम् १० इतिश्रीदैवज्ञानंतसूनुदैवज्ञरामविरचितायांस्वकृतमुहूर्तचिंत मणिटीकायां
प्रमिताक्षरायांगृहप्रवेशप्रकरणंत्रयोदशंसंपूर्णम् १३ श्रीकृष्णार्पणमस्तु ७॥ ७॥ ७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मणगौडलक्ष्मीनारायणपरशरामपुरकाबासीतिसनेसुहूर्तचिंतामणिसटीकप्रमिताक्षरा बापूस
दाशिवशेटशेठ्येदसकेछापखानेमेछपाया शके १७७९ पिंगलनामसंवत्सरेकार्तिकेमासेशुक्लपक्षे १२
द्वादश्यांतिथौभृगुवासरेतद्दिनेसुहूर्तचिंतामणिःसमाप्तः मुकामसुंबई ७ ५ ५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private And Personal Use Only